श्रीगणेशायनमः॥श्रीगुरुभ्योनमः॥गायत्र्यर्थात्मकत्वाद्याधिकदशगणेभास्करस्यस्थितत्वात्संपूर्णश्रौत
मार्गविधियजनकृत्कर्मसंतुष्टत्वात्॥अत्यादौसात्विकत्वात्प्रकृतिगुणत्रयेवायुपुत्राश्रयत्वात्कर्मस्यस्थाप
कत्वाद्धृतिविषयपिदेविसुमेधाश्रयामि॥१॥एवं॥स्मृत्वाविघ्नजगन्नाथंगुरुंनत्वासुबुद्धिदं॥आरभ्यामात्मा
र्कबोधस्यस्वयंथस्यकरोम्यहं॥२॥निर्विघ्नग्रंथपरिसमाप्त्यर्थंत्रिभंगकृष्णात्मकंमंगलमाचरतिप्रणम्यनि
तिप्रणम्यपितृपत्यन्नंध्यात्वादेवंमहेश्वरं॥आत्मार्कबोधमिच्छामिस्वांतेहृदिविभुद्रुये॥३॥पितृपतिर्जन
कचरणःपदंघ्रिश्चरणोस्त्रियामित्यमरः॥पद्मिवकमलमिवतत्प्रणम्यभक्तिश्रद्धाभ्यांनमस्कृत्यएकवच
नंतुवंदेमहापुरुषतेचरणारविंदमित्यादिवत्॥किंवदेवंप्रकाशकंमहेश्वरंसर्वथासेव्यंध्यात्वाएकाग्रेणम
नसास्मृत्वास्वांतेहृदिविभुद्रुयेस्वांतेहृदीनांमनश्चंद्रादीनांस्वांतंहनुमानसंमनइत्यमरःविभुद्रुयोनितरांनै

र्मल्यायआदिशब्देनेंद्रियग्रहःनैर्मल्यंतुमनश्चंद्रादीनांबाह्यविषयपरित्यागेनात्ममात्रविषयकलंतज्ञात्मार्कबो
धसत्वेनभवतिआत्मार्कस्यपरप्रेमास्पदत्वात्॥तदुक्तंविनापुत्रःप्रियःपुत्रात्पिंडःपिंडान्नथेंद्रियं॥इंद्रियेभ्यःप्रियः
प्राणःप्राणादात्माप्रियःपरइतिआत्मार्कबोधंआत्मार्कप्रत्यक्षंइच्छामिकरोमीतिकबक्तव्येइच्छामीतिवचनंदुर्ल
भत्वप्रतिपादनायनन्वात्मार्कबोधमित्यत्रात्मार्कइवात्मार्कइत्युपमितसमासेआत्मनःप्राधान्यंप्राप्तेवार्कआ
त्मार्कइतिमयूरव्यंसकादित्वात्समासेर्कस्यप्राधान्यमेवंसतिकिंश्रेयइतिचेत्॥उभयमपिअत्रोपास्यत्वेनार्कस्य
प्राधान्यंविवक्षितंउपासनाजन्यज्ञानद्वारामोक्षरूपफलभागितयात्मनःप्राधान्यंतथाचात्रकुत्रचित्सूर्यचंद्रबुध
शुक्रशनिगुरुभौमानांप्राधान्येनवर्णनंकुत्रविदात्मनःश्रोत्रत्वक्चक्षुरसनघ्राणानांप्राधान्येनकुत्रविदुभयेषांप्राधा
न्येनतत्तुयथासंभवमुपरिष्टात्स्फुटीभविष्यतिनन्वत्रार्कयोःसादृश्यवर्णनेप्राचांविदुषामप्रहत्नत्वात्अधुनातद्वर्णी

नमयुक्तमितिचेन्नइतीनइतिपदस्यव्याख्यावसरेउदाहृतायांयत्रासुपर्णाइत्यृचिताहृग्वर्णेनेयास्काचार्यस्यप्रवृत्तात्
त्रनथाहि।यत्रासुपर्णाअमृतस्यभागमनिमेषंविदथाभिस्वरंति।इनोविश्वस्यभुवनस्यगोपाःसमाधीरःपाकमित्राविवेश।
यत्रसुपर्णाःसुपतनाःआदित्यरश्मयोऽमृतस्यभागमुदकस्यानिमिषंतोवेदनंनाभिस्वरंतीतिवाभिप्रयंतीतिवेश्वरः
सर्वेषांभूतानांगोपायिताऽदित्यःसमाधीरःपाकमत्राविवेशेतिधीरोधीमान्पाकःपक्वोभवतिविपश्चित्प्रज्ञआदित्य
इत्सुपनिषद्वर्णोभवतीत्यधिदैवतमथाध्यात्मंयत्रसुपर्णाःसुपतनानींद्रियाएयमृतस्यभागंज्ञानस्यानिमिषंतोवै
दनेनाभिस्वरंतीतिवाभिप्रयंतीतिवेश्वरःसर्वेषामिंद्रियाणांगोपायितात्मासमाधीरःपाकमत्राविवेशेतिधीरोधीमान्
पाकःपक्वोभवतिविपश्चित्प्रज्ञआत्मेत्यात्मगतिमावष्टइतिसउक्तरूपंसूर्यआत्मावमाशास्त्रव्यचित्तंमामित्यर्थः॥उपनिषद्वर्णोगोप्यस्वरूपःउपनिषद्गम्यश्चउपनिषदावेदांतेनवर्ण्यतेज्ञाप्यतइतिव्याख्यानात्॥हेभगवंस्य २

एंभरणेनेवबोधेनपूर्वंधीतमसेहृतेतत्रआविर्भवेदात्मास्वयमेवांशुमानिवेत्यादिवचनात्र।नलेतिउपजातिरुक्तंवाधं
तासुपजानतयइतिलक्षणात्॥नत्वास्मान्यान्निरवलंक्रतिज्ञानुदारचित्तान्निजरांदयालुत्र॥गोविंदस्वामीकुरुतेत्रयत्नं
सतांसुखार्थंगतमत्सराणां॥५॥॥गोविंदस्वामी=गोविंदःहरिःशर्मशरणंसुखसाधनंवाआनंदोवायस्यसःत्रंथकृते
अत्रात्मकृबोधयत्नंतत्प्रतिपादकंग्रंथंकुरुतेआत्मनेपदेयत्नसाध्यस्यफलस्यस्वगामित्वायस्वरितचित्तःकर्त्रभिप्रा
येकिमालंफेइतिस्वेत्रात्।ननुकस्मेप्रयोजनायेत्यतआह॥सतांसुखार्थंब्रह्मविदांहर्षायेत्यर्थः।ननुसन्मार्गवर्तिवा
विनःसत्पदस्यब्रह्मविद्रूपविशेषणंवाविलेकिंप्रमाणमितिचेन्न॥ओंसन्नेवसभवति।असद्ब्रह्मेतिवेदचेत्।अस्ति
ब्रह्मेतिचेद्वेदसंतमेनंततोविदुरितीतिश्रुतेःप्रमाणत्वात्॥कीदृशानांगतमत्सराणांगतोविनयादिभिर्नष्टोमत्स
रःपरोत्कर्षासहनंयेषांतेषांकिंकृत्वास्मान्यान्स्वस्यशून्यान्नत्वामान्यत्वेहेतुःनिरवलंक्रतिज्ञानसकलवेदार्थ

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

विहउद्धारचिंतान्कार्पण्यरहितान्नितरामुद्यान्भूयादतीवपरदुःखदूरीकरणशीलान्॥४॥प्रयोजनांतरमाहविद्यावतामितिवसंततिलकावृत्तंवसंततिलकातोभगाविति लक्षणात्।विद्यावतांविनयबोधयुजांद्विजानामापद्विनाशरसिकंप्रभुमात्मभाजां॥धर्मप्रधानमवनीश्वरमानपात्रंरुक्मं प्रसादयितुमप्यनिशंस्वतंत्रं॥५॥विद्यावतांविद्याज्ञानंतद्धेतुःपुराणादियंथाध्ययनंतद्वतांविनयबोधयुजांइत्युक्ताध्ययनजन्यनम्रताज्ञानयुक्तानांएतेनसम्यगाराधितविद्याप्रबोधविनयाविवेतिरघुवंशेव्याख्यातःद्विजानांब्राह्मणानांआपद्विनाशरसिकंविपत्तिध्वंसेतत्परंआत्मभाजांस्वसेवकानांप्रभुंपालकंधर्मप्रधानंश्रुतिस्मृतिविहितवर्णाश्रमधर्मस्यस्थापकंसद्मद्वायुधिष्ठिरेकमुख्यंसकलकार्येषुतत्सहायत्वात् अवनीश्वरमानपात्रंश्रराजतेपिराजसूयेयज्ञेराजद्भ्रायाःप्रथमंस्थानंरुक्मंवासुदेवंअनिशंनिरंतरंप्रसादयितुमपिप्रसन्नंकर्तुमपिअपिःसमुच्चयार्थेकृतइतिशेषेणान्वयइतिभावःपु ३

नःकीदृशंरुक्मंस्वतंत्रंस्वाधीनंस्वोपाधिमायानधीनमितियावत् अतएवसकलस्यपरिब्रह्मतंतुदुकूलंभागवतेरुक्मरुक्मभगवान्स्वयमितिनचात्रसमाप्तपुनरुक्तदोषः केकारःस्मरकार्मुकस्यसुरतक्रीडापिकीनांरवोसंकारोरतिमंजरीमधुलिहांलीलाचकोरीध्वनिः॥तन्व्याःकंचुलिकापसारणभुजाक्षेपस्खलत्कंकणक्वाणःप्रेमभृतोतुवोनवनवयोलासायवेणुस्वनइतिवत्।एवंविशेषणानिमायामनुष्यस्यदरंतुब्रह्मरूपस्येत्यर्थतात्पर्यात्।तथाचमायेरुक्मंप्रतिनारदस्योक्तिः उरीकृतारागप्रतिरोधकंजनैरभीक्ष्णमक्षुण्णतयातिदुर्गमं॥उपैमुषोमोक्षपथंमनस्विनस्त्वमग्रभूमिर्निरयायसश्रयेतियद्वा अनिशंस्वतंत्रंसर्वदामायासंबंधशून्यंस्वप्रकाशत्वात् मुमुक्षूणांसगुणंब्रह्मोपास्यंवब्रह्मैवनिर्गुणंब्रह्मप्राप्तिर्भवतीतिभावः॥५॥अथमितिशिखरिणीवृत्तंशिखरिणीयमोनस्भौलगुरुरुद्रैरितिलक्षणात्।अथयत्रधरःसंतःसकलदुरितध्वंसजननीमनिंसम्यग्ज्ञातोवितरतिसदावेदविषयां।रमांरुक्मांतस्मान्मयिनमतिन

४ मेकृतधियःसशोध्योयुष्माभिःश्रुतिविमलदृग्भिर्गतमदैः॥७॥हेसंतोहेब्रह्मविदःअयंवक्ष्यमाणरूपःग्रंथःशब्द
संदर्भःसम्यक्निर्मत्सरेणैकाग्र्येणमनसाज्ञातःविचारितःसन्सकलदुरितध्वंसजननीआत्मार्कभेदभासकदोष
रूपसर्वपापविनाशहेतुंवेदविषयंवेदःवेदार्थःसच्चिदानंदात्मकंद्वितीयंब्रह्मतत्प्रणांमतिंबुद्धिंसदानिरंतरं
वितरतिददातितस्माद्ब्रह्मबुद्धिदानात्तन्मेनमनशीलेनाभिकंपिसम्यङ्नसकृमहिंसदीपोरक्षिताच्छील्या
दिषूर्यषुरत्ययःअधुनापिनमतिनमस्कुर्वतियुष्मानुत्कृष्टेनज्ञानिमर्ग्ययंग्रंथकृतिकृपांप्रीतिंकृत्वाहे
कृतधियःहेपक्वप्रज्ञाःपंडिताःश्रुतिविमलदृग्भिःवेदार्थपरिशीलनेनकार्पण्यादिदोषरहितबुद्धिभिःअतर
वगतमदैर्निरभिमानैर्युष्माभिर्विवेकिभिःसःपूर्वोक्तगुणकोयंग्रंथःशोध्यःविचारणीयइतिप्रार्थना॥६॥ ४

हो ९

दृदानोयंग्रंथविषयप्रयोजनाधिकारिसंबंधानदर्शयन्नाहइहरवीतिमालिनीवृत्तमालिनीनौम्यौस्वेतिलक्षणात्इह
हितरणिरात्माचंद्रमाश्चित्तमेवंवदतिमुनिगणोमांचैवेवासंरवीद्वौ॥कृतमतिसुखमत्राद्रुमाद्रुपितृणांभवतिये
दृषवर्गद्वारमात्मैकभावात्॥७॥इहआधिदैविकेप्रपंचेतरणिःसूर्यःद्रुमणिस्तरणिःसूर्यश्चित्रभानुर्विरोचनइत्यमरः
आत्माभवतिइहखलुरविरात्मेतिवक्ष्यतेतरणिवचनंसंसारसिंधुतरणोपायःसूर्योपासनमेवेतिज्ञापनार्थंचंद्रमाश्चे
नंमनोभवतिचित्तंतुचेतोहृदयंस्वांतंहृन्मानसंमनइत्यमरःएवमनेनप्रकारेणमुनिगणाऋषिसमूहोवदतिशिष्या
न्प्रतिकथयति॥हिप्रसिद्धंतथाचश्रुतिःसूर्यआत्माजगतस्तस्थुषश्चेतिवागग्निश्चक्षुरसावादित्यश्चेद्रामनोदि
शश्रोत्रमितिब्राह्मणंचएकआत्मावद्धुधास्तूयतएकस्यास्यमनोन्येदेवाःप्रत्यंगानिभवंतीतिनिरुक्तंचसम्यगात्मानश्चे
द्रइत्यादिवचनंचएतेनवाच्यवाचकभावःसंबंधोदर्शितःरवीद्वोःसूर्यचंद्रयोरेकवासंएकस्मिन्नक्षत्रेस्थितिमत्तामता

वास्योच्यतेमुनिगणः अत्रामावास्यायांहतंविहितंसूर्यापरागप्रमुक्तंचश्राद्धंपितृदेवोनक्रियमाणंवैधंकर्मपितॄणांवसुरुद्रादित्यानांअतिसुरवंचकृत्वाप्रीणकरेआहुः उपदिशंतियाज्ञवल्क्यादयःननुसर्वेषांस्वस्वपितृतृप्तयेप्रवृत्तिर्दृश्यतेतथाचतेषामेवातिसुरवमितिवक्तुमुचितंकिंवस्वादित्यस्येतिचेन्नवस्वादीनामेवतत्रदेवतात्वतथायाज्ञवल्क्यःवसुरुद्रादितिसुताःपितरःश्राद्धदेवताःप्रीणयंतिमनुष्याणांपितॄन्श्राद्धेनतर्पिताइतिअत्रेदंबोध्यंअस्मिन्जन्मनिजन्मांतरेवाभ्यस्तानामतपआदिसाधनैर्निर्मलमनसांवेदार्थविदामात्ममनःश्रोत्रत्वक्चक्षुरसनघ्राणवाक्पाणिपादपायूपस्थेषुसूर्यवह्निदिग्वातादित्यवरुणाश्विन्यग्नींद्रोपेंद्रमित्रप्रजापतिताहात्म्यापासनयातद्रूपतापाप्तिः यावतीर्वैदेवताःस्तासर्वावेदविद्विप्रास्तृणेवसंतितस्माद्ब्राह्मणेभ्योवेदविद्भ्योविवेदैवनमस्कुर्यात्नाश्लीलंकीर्तयेदेतावदेवदेवताःप्रीणातीतिश्रुतेः तथाचमनआदीनांप्रत्यात्मंभिन्नत्वेपि

नदेवतानांसर्वथाभिन्नत्वाद्देवविद्विप्रास्तृणेतृप्तेतादेवतास्तृप्ताःसत्योज्ञानयोगेनदेवत्वादिपितृत्वंप्रपंचितंतत्रब्राह्मणाद्याश्रास्तारतम्यप्रयुक्तंपितृतृप्तितारतम्यमितियद्यस्मात्कारणादात्मैकभावात्प्रत्यगात्मनोरात्मत्वेनज्ञातयोःसूर्यचंद्रयोःसूर्यचंद्रस्थलीनत्वेनैक्यात्श्राद्धंपूर्वोक्तमपवर्गद्वारंमोक्षहेतुरित्यंतदुरवनिवर्तकमित्यर्थः अयंभावः यथाभूतलैकदेशवर्तिनामस्माकंस्वमध्यगतेसूर्येमध्याह्नः तथाचंद्रमंडलैकदेशगतानांपितॄणांतदानींमध्याह्नःसूर्यस्यतत्स्वमध्यवर्तित्वात्यथातदाभोजनेनाप्तितृप्तिः तथेहपुत्रादिभिर्दत्तंतदमुत्रोपस्थितंतेनतेषांतृप्तिःउपरागेतुतेषांकेवलोमध्याह्नःतदानींतेषामतिक्षुद्रदयः अतोतिसुरवंअन्यदातनःपूर्वंक्रियमाणंसुरवंतथाचानयोर्लोकयोर्द्वैःस्वमेवद्वैतरत्सर्वमुपरिष्टात्स्फुटीकरिष्यते अथेहाध्यात्मिकेआत्मातरणिर्भवतिचित्तंचंद्रमाभवतिएवंवदंतिमुनिगणाःरवींद्वोःआत्ममनसोरेकवासमेकस्यानाड्यांवासंनिवेशंअमांचवदंतिमुनिगणाःअमाशब्देनात्रसुषुप्तिःकदाचित्समाधिः

तरानीमानां ज्ञानानामभावात्मारादस्यमितिवाचकत्वात्अत्रसुषुप्तौकृतंसुषुप्तधिकारिणोजीवात्मेःसंपादितंभा
दृश्रद्दयाविहितंसकलंकर्मपितृणांविश्वतेजसप्राज्ञानांअतिसुखमाहुःयद्यस्मादपवर्गःद्वारंफलप्राप्तिकारणं
अपवर्गेतृतीयेतिसूत्रेतथाव्याख्यानात्भवतितस्मादतिसुखमित्यर्थःसमाधिस्थैःकृतंतुतेषांसुखंसमाधिना
तत्त्वज्ञानोदयेतेषांनाशसंभवात्यद्यस्मान्मोक्षकारणंभवतिआत्मैकभावात्आत्मनितदानींसहनिकांतःकर
णलयादेकस्यात्मनःसत्वात्सुषुप्तिसमाध्योस्तुतमःप्रकाशभेदाद्भेदःइदमत्रावधेयंआधिदैविकेयद्दृश्यते
यच्चप्रत्यक्षंतदाध्यात्मिकेप्रत्यक्षमप्रत्यक्षंवृत्तभयत्रयच्चकिंचिज्जगत्सर्वंदृश्यतेश्रूयतेवा॥अंतर्बहिश्चतत्सर्वं
व्याप्यनारायणस्थितइतिश्रुतेःयथामुत्रसूर्यादियोग्रहाश्चाश्विन्यादीनिनक्षत्राणिप्रत्यक्षाणितथात्रात्ममनइंद्रि
याणिनाड्यश्चनेंद्रियग्राह्याःयथाचसूर्यादीनांकर्मणिनेंद्रियग्राह्याणिकिंतुश्रुतिगम्यान्येवतथात्रात्मादीनांक

र्माणिइंद्रियग्राह्याण्यपिनश्रुतिगम्यान्येवतत्रत्वयंविशेषःअसुत्रदर्शःसर्वदाकदाचिदुपरागःअत्रतुसुषुप्तिःसर्व
दाकदाचित्समाधिःपरंतुआत्मनिसूर्यैवसुषुप्त्युपरागयोःसंबंधाभावोस्त्यव्यवहितात्मनांतस्मात्सर्वथाजन्मवतां
दर्शयतनीयं॥७॥सप्तदशावासरेभवतिपोर्णमासीतनोमहीप्रभृतिपंचभिर्दशभिरिंद्रियैःसातनुः॥निगद्यतदमंमनोविधुरवाच्यलोकेयशःप्रभाकरइतिस्फु
टंसततमापरेव्यात्मनः॥८॥यथाधियज्ञंस्थालीपाकादौकर्माणिपंचदशभिःसमिद्भिरग्नेःपूर्णातनुरुच्यतेतथा
चतत्रविनियोज्योमंत्रः अयंतइध्मआत्मा ज्ञानवद्भवेनध्यस्यवर्धस्वचेद्धवर्धयचास्मान्प्रजयापशुभिर्ब्रह्मवर्चस
नान्नाद्येनसमेधयस्वाहेतितथात्रतनोमावास्यातउपरागतोवासप्तदशावासरेःपंचभिःसहवर्तमानास्तवद्
रावासराश्चतेदिनैःपौर्णमासीभवतिसार्द्धं स्यचंद्रस्यतनुःमूर्तिर्निगद्यतेकथ्यतेमनोविधुर्मनइवविधुश्चंद्र

रमांपूर्णांतनुंअवाप्यप्राप्यरव्यात्मनःरविःसूर्यःआत्मेवतत्सलोकेज्योतिर्मयोवासततंनिरंतरंस्फुरंत्प्रसिद्धंप्रभाकरइतिप्रका
शाकरइतियशःकीर्तिमापप्राप्तवान्अथाध्यात्मंततःसमाधितःसुषुप्तितोवामहीप्रभृतिपंचभिःपृथिव्या[illegible]दिपंचभू
तैःआदिशब्देनात्रिजोवाय्वाकाशानिदृश्यंतेइंद्रियैःश्रोत्रत्वक्चक्षुरसनघ्राणैःपंचभिर्ज्ञानेंद्रियैर्वाक्पाणिपादपायूप
स्थैःपंचभिःकर्मेंद्रियैःतनुःपूर्णांनिगद्यतेरमांतनुंमनोविधुंविश्वसदृशमनःअवाप्यरविसदृश्यात्मनःलोकेदेहेसत्त
तंस्फुरंप्रभाकरइतिचैतन्यकरइतियशआपयथासूर्यएवप्रभातथात्मन्येवचैतन्यमितिसिद्धांतःतदुक्तंअथाप्यस्ये
कोरश्मिश्चंद्रमसंप्रतिदीप्यतइतिनिरुक्ततथाआत्मचैतन्यमाश्रित्यदेहेंद्रियमनोधियःस्वकीयार्थेषुवर्ततेसूर्यालो
कंयथाजनाइत्याचार्यैःतथाचंद्रमनसोःप्रकाशवत्वमितितुलोकानांभ्रांतिरेवेतिभावः॥८॥लोकास्तमितिप्र
हर्षिणीस्तंप्रहर्षिणीस्त्रोत्रिकदशकावितिलक्षणात्लोकास्तंसकलकलानिधिंप्रसन्नंसंप्राप्यातुलसु ७

तवं५

खमापुरंगनाभिः॥संसारेजडमतिभावतोतिसक्तामन्यंतेस्मचपरमंविधुंनभानुं॥२॥लोकाःसंसारिणोयथासक
लकलानिधिंपूर्णेंदुंप्रसन्नंनिर्मलंतंमनोविधुंचतुरमनःसदृशंरसुपकारिणंसंप्राप्यसुखंतेनाश्रित्यअंगना
भिःअंगाकल्याणइत्यनुशासनात्मत्वर्थीयोगश्चाद्यन्नप्रत्ययःतथाचकमनीयाभिःविलासिनीभिःस्त्रीभिःस
हअतुलसुखंबहुरीतिसुखमापुःप्रापुःकिंचजडमतिभावतःआत्मपरमानंदविमुखबुद्धित्वात्संसारेमायाप्रपंचअ
तिसक्ताःतत्रैवतत्परायंतंविधुंचंद्रंपरमंस्वेष्टसाधकंमन्यंतेस्मनिश्चिन्वंतिभानुंसूर्यंपरमंनमन्यंतेस्मभानावुदिते
सतितेषांदुष्करस्नानसंध्याग्निहोत्रहोमादिकर्मणआवश्यकत्वादितिभावःतथोलोकालोक्यंतेदृश्यंतेभोगा
दयोयत्रयाःसकलकलानिधिंप्रसन्नंतंमनोविधुंमनःसदृशंप्रियंविधुंसंप्राप्यस्वसमीपआसाद्यअंगनाभिः
स्वकांतिभिःअतुलसुखमापुःप्रसन्नाद्भर्तृनीयाबभूवुरित्यर्थःरोभानिशायात्किंचसंसारेसंसारसदृश्यां

नमः प्रधानायांगत्रौजडमतिभावतः डलयोरभेदः जलेस्वमंडलेमीतरभिमानोयेषांतेजडमतयः तेषांभावात् अतिसक्ताजलमंडलए
वतत्पराः संतः विधुंस्वपोषणेनशोभोत्पादनेनचपरमंनमन्यंतेस्मभानुंस्वदर्शनकलेनकांतिहरत्वेनचपरमंनमन्यंतेस्मतदुदयेत
च्छोभालोपात् अथाध्यात्मंलोकाः साक्षिभास्यत्वेनदृश्यानींद्रियाणिसकलकलानिधिसमस्तचातुर्यस्थानंप्रसन्नंअप्रमत्तं
नंमनोविधुंविधुसदृशमाह्लादकंमनः संप्राप्याश्रित्यअंगनाभिर्वनितिभिरनुलसुखमापुःप्रहसितआननिहतानिव
भ्रवुः किंचसंसारविषयप्रपंचेजडमतिभावतआत्मप्रकाशलोभावात्अतिसक्ताः संतः विधुंताहशं मनः परमंमन्यं
तेस्मभानुमात्मानंपरमंनमन्यंतेस्म आत्मज्ञानेतेषामिहविषयेअप्रवर्तनात्॥ ८॥ अथेति। अथांगनानांचवियो
गिनीनांवियोगिनांकर्मधियांचपुंसां॥ उद्वेजकोमासदृतीहमत्ताजहारनंदीनदयालुरर्कः॥ ९॥ अथानंतरंदीन
दयालुर्दुःखितदुःखदूरीकरणशीलः अर्कः सर्वज्ञत्वेनार्चयः सूर्यः वियोगिनीनांप्रियविरहवतीनांअंगनानांस्त्री

णांतथावियोगिनांप्रियाविरहिणांकर्मधियांकृतिस्मृतिप्रशस्तविषयतत्परबुद्धीनांपुंसांपुरुषाणांमुद्वेजकोदुःख
जनकोमाभूत्सचंद्रइतिमत्वाविचार्यतांविरहिदुःखोत्पादकंचंद्रंजहारस्वसमीपंनिनायकलाहरणंचकारेत्यावत्तत
दुक्तंनिरुक्तेविधुंविधमनशीलंदृशाणंदमनशीलंयुवानंचंद्रमसंपलितआदित्योगिरतीतिअथाध्यात्मंअथानंतरं
दीनदयालुरतएवार्कः पूज्यआत्मावियोगिनीनांरोगोर्विधुरियविरहिणीनामंगनानामिंद्रियवृत्तीनांतथावियोगिनां
सिद्धिविरहिणांकर्मधियांयोगाभ्यासबुद्धीनांपुंसांकर्मण्युद्वेजकोमाभूत्समनश्चंद्रइतिमत्वातंतादृशंमनश्चंद्रंजहा
रस्वाभिमुख्यसंपादनेनदेहेंद्रियधर्मीध्यासहरणंकृतवानित्यर्थः तदुक्तंभगवतासर्वधर्मान्परित्यज्यममैकंशरणंव्रज।
अहंत्वासर्वपापेभ्योमोक्षयिष्यामिमाशुचइति॥ यद्वाविरहिभिःसंसारिभिर्दुःखनाशायसंसारचतुरमपिमनःपरमेश्व
रविषयंक्रियतइत्यर्थितात्पर्यंदृहपूर्वत्रदुःखद्योतकाःश्लोकाः प्राणेशावि ज्ञप्तिरियंमदीयातत्रैवनेयादिवसाः कि

यंतः॥संप्रत्ययोग्यः किलएषदेशः कलाहिमांशोरपितापयंति १ कलाहिमांशोरपितापयंतिनेतस्मियेचेतसि वो
कनीयं॥वियोगतप्तेहृदयेमहीयेतत्रस्थितातंसमुपैधितापं॥२॥शीतरश्मिरसिचंद्रजनेस्मिन्मांद्दश्यनलगर्भमयू
खैः॥लांशोरणशतधाप्रतिकुर्यान्नानकीमुखसमोयदिनस्याः३ इत्यादयः॥९॥मासेतीतिमासतिमलाहरणंत्तदि
होनस्मातुमासोभवतीतिमन्ये॥तस्यावक्ष्येक्षयवृद्धिपक्षौविरंविभूत्यैदुरितंविनाश्य॥९१॥हृदिंदोःस्वदेशा
स्यविधोमासेतिमलाहरणंजातंतस्मात्कारणात्मासोभवतिइत्यहंमन्येजा॰॰नामीत्युत्प्रेक्षाकामिनीमुखचंद्र
स्यचंद्रमाकुरुतुल्यतां॥चंद्रमाइतियत्रोक्तंतेनायंचंद्रमाइतीतिचेत्ननुवक्ष्यतोमासचंद्रमःशब्दयोः कोर्थइतिचे
त्सत्यंमासशब्दस्यकालपरिमाणविशेषवाचकत्वंचंद्रमाश्चंद्रोमातिकालपरिमाणंकर्तीतद्यावन्निरूढं हाद
शप्रथमश्चक्रमेकमितिमासानांमासामानादितिचंद्रमाश्चायंद्रमतिचंद्रोमातावांद्रमानमस्येतिवाचंद्रश्चंद्र ९

तेःकांतिकर्मणइतिचअयमर्थस्फुरसपंचेतिश्लोकेध्वनितत्वादिहनोक्तइतिज्ञेयंमासेतीत्यत्रसोविलोपे
चेत्पादपूरणमितिसोलोपेकृतेआदृणइत्येकागुणादेशः ऋक्पादएवरक्षतइत्यत्रतुनप्रमाणंअथानंत
रंतस्यमासस्यक्षयवृद्धिपक्षौक्षयःकलाविंयोगः वृद्धिःकलांतरसंयोगः तौउभयतःस्थितत्वात्पक्षावित्युक्तंशुक्ल
पक्षोवक्ष्येकथंयेनाभिकस्तेप्रयोजनायदुरितंपापंविनाश्यप्रकर्षेणध्वंसंनीत्वाविरंबहुकालंविभूत्यैसमृद्धये
अन्नपापक्षयपूर्वंसुखानुभवःस्याभ्यर्हितत्वात्तदिछयाशुक्लपक्षादिर्मासउच्यतइतिभावः ननुतथापिकृष्ण प
क्षादोमासकिंप्रमाणमितिचेत्यस्तादेवप्रविशंतितआप्यायसेपुनः॥वायुःसोमस्यरक्षितासमानांमासआ
कृतिरितिगृह्याण॰॰॰

गानीत्यापालयतिभध्यात्मेतुमपिबंतिआत्मानइत्यर्थः विषयध्यानान्मनोधःस्रवतिआत्मप्रकाशात्संसार
विषयकवृत्तिहीनंभवतितत्प्राणःप्राणायामनरेतूर्ध्वंगमयित्वापालयतिसमानांसंवत्सराणांशोषो॰॰र्थःस्प
ष्टःयद्वामनसःप्रसादकरणेनपालयितापाणस्थैर्याधीनमनःस्थैर्येणमनःप्रसादोभवतीतिभावः तदुक्तंपातं
जलयोगशास्त्रेमैत्रीकरुणामुदितोपेक्षाणांसुखदुःखपुण्यापुण्यविषयाणांभावनातश्चित्तप्रसादनंप्रच्छ
र्दनविधारणाभ्यांवाप्राणस्यतिसमानांओदराग्नीनांमासःमनसःभोगंप्राप्यइंद्रियेभ्योनिवर्तनंक्षात्मातश्चैतन्यं
प्राप्यभोगार्थंइंद्रियंप्रतिगमनंतावान्कालःआस्तिःज्ञापकइत्यर्थः।शोषोधःस्यसः॥९१॥प्रतिदिनमितिद्रुत
विलंबितंवृत्तंद्रुतविलंबितंनभौभावितिलक्षणात् प्रतिदिनंपथिहीनकलोदयंविधुमनोव्रजतिस्मविभाक
रंस्वपतिदत्तविनाशितवैभवोनरइवप्रतियन्नृपतिंनिजं॥९२॥प्रतिदिनंदिवसंदिवसंप्रतिपथिमार्गेसूर्यप्रा १०

पकेहीनलोकेदृयंक्षीणप्रकाशविभावंविधुमनः विधुर्मनःमनःसमष्टिलान्नवात्रोपमितसमासः उपमितंव्याघ्रा
दिभिःसामान्याप्रयोगइत्यनुशासनात्विभाकरंप्रकाशदातारंव्रजतिस्मजगामअथाध्यात्मंप्रतिदिनंपथियोगमा
र्गेहीनःकलानांदेहेंद्रियधर्मीध्यासानामुदयोयस्यतत् विधुमनश्चंद्रसदृशंमनःविभाकरमात्मानंव्रजतिस्म
निरंतरंतध्यानाभ्यासवशाद्प्रतिहतगतिप्रवर्ततेस्मेत्यर्थःतदुक्तंपातंजलयोगशास्त्रेतस्यवाचकःप्रणवःतज्जप
स्तदर्थभावनंततःप्रत्यक्चेतनाधिग॰॰मोप्यंतरायाभावश्चेतिकदवस्वपतिदत्तविनाशितवैभवःस्वस्वामिनाएर्वंसमनु
ज्ञातंपश्चादूरीकृतमैश्वर्ययस्यसःनिजंस्वकीयंनृपतिंराजानंप्रतियन्प्रयागच्छन्नरइवामात्यइवइयंपूर्णेपमाउ
पमानोपमेयेसाधारणधर्मेपिभावाचकानामुपादानात्॥१२॥ ॥उदयतिवैतालीयं छंदःवैतालीयंद्विस्वराअयु
ग्मेस्युदयुग्मेवसवोंतेलगेइतिलक्षणात्द्विस्वराअयुग्मेषुचतुर्दशमात्राःयुग्मेलघोअंतेरलघुगुरवस्यर्थःउदयाल

समिंदुहृद्यदाक्षतिरस्तीहकलानिधेस्तदा॥इतिपश्यसखेस्थिरात्मनानिजगादेतितदासुधीर्जनः॥१३॥
तदाचंद्रकलाक्षयसमयेसुधीःसंसारचतुरोजनोज्योतिःशास्त्रानभिज्ञःलोकःसखायमितिनिजगा
दसंपादेशइतीतिकिंहेसखेहेमित्रइतिस्थिरात्मनाएकायबुध्यापश्यालोकयइतीतिकिंयदायास्मिन्समयेइंदुहृत्
इंदुर्हृदिवमनःसदृशश्चंद्रइत्यर्थःउदयालसंस्वप्रकाशेनिरुद्यमंभवतिविलंबेनोदेतीत्यर्थःतदाइहरात्रौकलानि
धेःक्षीणस्यापिचंद्रस्यक्षतिर्नाशोभवतिरक्तरूपनाशेरक्तःपद्मादिर्नष्टइतिवत्कलानाशोत्राभिप्रेतःअध्यौथौलंह
सखेइंदुहृत्चंद्रसदृशोमनउदयालसंभवतितदेहकलानिधेःसंसारेचतुरस्यापिमनसःक्षतिरास्तिइदंसंसारद
शाकथितंतथाचात्रासुधीर्देहाभिमानीउपदेष्टावक्तृतत्रअनर्थहेतुचातुर्यश्रियस्यमनसःचातुर्यक्षतेरभ्यहि
तत्वमेवतदुक्तंमशावक्रेणमुनिनाहरायद्युपदेष्टातेहरिःकमलजोपिवा॥तथापितवस्वास्थ्यंसर्वविस्मरणा १९

हृतइतितथाचायमुपदेशःसंसारोद्विग्नमानसंप्रतितथाचात्रसुधीरात्मज्ञउपदेष्टा इतरत्सर्वंस्पष्टतरं॥१३॥अधी
त्येतिअधीत्यविद्याःप्रतिपद्दिनादौहृदिदुरध्यासकलाविहीनः॥श्रुत्यादिलभ्यात्मनईश्वरस्यसंप्रत्यभात्यो भव
तीतिमन्ये॥१४॥॥विद्याश्चतुर्दशपुराणाद्याःतथाचयाज्ञवल्क्यःपुराणन्यायमीमांसाधर्मशास्त्रांगमिश्रिताश्चवेदा
स्थानानिविद्यानांधर्मस्यचचतुर्दशेतिअधीत्यपठित्वाद्विजराजत्वात्चंद्रमावेब्रह्मेतिश्रुतेः चंद्रमामेब्रह्मास
मेब्रह्मेतिश्रुत्वासूत्रात्ब्रह्मणार्हत्वाज्ञानसाचंद्रेणमनोवेयत्सस्यब्रह्मात्वदिदंमनःसोसोचंद्रःसब्रह्मासामुक्तिः
सातिमुक्तिरितिश्रुतेःब्रह्मैकोजातेजातेविद्यांवदतिब्रह्मासर्वविद्यःसर्वंवेदितुमर्हतिब्रह्मापरिदृढ
श्रुतेताब्रह्मपरिदृढंसर्वतइतिनिरुक्ताच्चप्रतिपद्दिनादौकलपक्षेअध्यासकलाविहीनःभ्रमसदृशप्रकाश
रहितःहृद्दिंदुःमनःसदृशश्चंद्रःश्रुत्यादिलभ्यात्मनःश्रुतिस्मृतिपुराणज्ञेयस्वरूपस्येश्वरस्यनियंतुःसूर्य

स्य संप्रतिसूर्यप्राप्तिसमयएवामात्यःसूर्यानुग्रहेणतत्सकाशवत्सेवतदैश्वर्यवानूभवतिभविष्यतीत्यर्थःव
र्तमानसामीप्यवर्तमानवद्वातिसूत्रात्तृइत्यहमन्येउत्प्रेक्षालंकारःसंभावनमथोत्प्रेक्षाप्रकृतस्यसम्मेनयदिति
लक्षणादथाध्यात्मंविद्याअधीत्याध्ययनोत्तरकालंप्रतिपद्येनादौअध्ययनप्रारंभदिवसमारभ्योत्तरोत्तरका
लेअध्यासकलाविहीनःअध्यासाःक्षमाःअतस्मिन्तदितिज्ञानरूपाःतेकलाइवषोडशांशाइवतद्रहितः इ
दिंदुश्चंद्रसदृशंमनःऋत्यादिलभ्यात्मनःश्रवणमननानिदिध्यासनैश्चज्ञेयस्वरूपस्यईश्वरस्यनुध्यादिश्च
र्तकस्यात्मनःसंप्रतिपद्यानसमयेअमात्योभवतिसर्वज्ञत्वादिविशिष्टोभविष्यतीत्यर्थःइत्यहमन्यनिश्चिनो
मिनास्यत्रोत्प्रेक्षायाश्चार्थत्वात्तदुक्तंत्यज्जनिजगज्जवाजिकथांभजभजजठेरजगद्गुहंभज॥तत्प्राप्या
ननुवेतःप्राप्स्यसिसकलंनवेपरीत्येनतिएवंसतित्वदर्वाग्भाव्येवमेवतत्रापितत्कार्यकारित्वदर्शनात्॥१४॥ १२

लब्धेतिलब्धारविंस्वीयकलाप्रसूनैःप्रभुंसमानर्चमनःसुधांशुः॥संतर्पयामासमरुन्मुनीनांगणान्पितॄणां
चतदाश्रितानां॥१५॥मनःसुधांशुर्मनःसदृशःप्रियःसुधांशुश्चंद्ररविंलब्धाप्राप्यस्वीयकलाप्रसूनैःपुष्प
सदृशैर्मनोहरैर्निजषोडशांशैःप्रभुंनियहानुग्रहसमर्थंरविंसमानर्चपुनःप्रकाशप्राप्तयेभक्तिश्रद्धाभ्यां
पूजयामासकिंचुतदाश्रितानांस्वपोष्याणांमरुन्मुनीनांदेवानामृषीणांपितॄणांचगणान्सम्यङ्मानसंतर्पया
मासतृप्तांश्चकारित्यर्थःतदाग्नींद्रदेवर्षिपितृतृप्तिर्भवतीतिभावःअथाध्यात्मंमनःसुधांशुसुधांशुसदृशा
मात्मदर्कंमनःरविमात्मानंलब्धास्वीयकलाप्रसूनैःममताविषयाःप्रसूनसदृशाअर्पणीयाःकलाःहृत्तयःता
भिःप्रभुमात्मानंसमानर्चवक्ष्यतिचहृत्तिपुष्पैःपरिपूजयंतीतिकिंचुतदाश्रितानामात्मपोष्याणांमरुन्मुनीनां
इंद्रियप्राणानांपितॄणांविश्वतेजसप्राज्ञानांगणान्संतर्पयामासपुष्पोषरोगानुत्पादनात्तथाचयाश्चवल्क्यः

दातासत्यः क्षमीप्राज्ञःशुभकर्मीजितेंद्रियः॥ तपोरतोयोगशीलोनरोगेरभिभूयतइति॥१५॥ प्राप्तामिति
प्राप्तांप्रसादेनकलासमष्टिंनिजापराधेनकृतंक्षयंच॥संस्मृत्यतुष्टावमनःसुधांशुर्महेशमात्मानमजंयतात्मा
॥१६॥ मनःसुधांशुःप्रसादेनसूर्यस्यपूर्वमनुग्रहेणप्राप्तांकलासमष्टिंप्रकाशदृष्टिंसंस्मृत्यसम्यक्ध्यात्वानि
जापराधेनविरहिजनदुःखजननरूपस्वकीयविरुद्धाचरणेनकृतंजातंक्षयंप्रकाशज्ञानावांचसंस्मृत्ययत्तात्मा
निरुद्धचित्तः अजंमजन्मानंमहेशंसर्वेनियंतारंआत्मानंस्वाश्रयंसूर्यंतुष्टावसमस्तप्रकाशगुणाश्रयंतेनप्र
तिपादितवानित्यर्थः तदुक्तंकाशीखंडेयुगानांप्रथमोसिलंतिथीनांत्वंकूररसि॥पुष्योसिनक्षत्रगणेसक
मः सर्वपर्वस्विति अथाध्यात्मंमनःसुधांशुःसदृशंमनःप्रसादेनात्मानुग्रहेणकलासमष्टिंचातुर्यदृष्टिंप्रा
प्तांसंस्मृत्ययतात्मा अजंजन्मरहितमारोपितजन्माचनंचअजःशरीरग्रहणात्सजातइतिकीर्तइतियाज्ञ

निजापराधेनकृतंक्षयंचैतन्यनिरोधंचसंस्मृत्य॥

ज्ञवल्क्यस्मृतेःमहेशंसर्वेंद्रियप्रवर्तकमात्मानंतुष्टावस्तूयतेतिस्तोतरिमनसिपुरुषत्वारोपेणनसमाधौ
सुषुप्तौवात्मनिसदृशिकस्यमनसोलयेनस्तूतिरेवनसंभवतीतिचेत्सत्यंअधिरूढसमाधियोगस्ययोगस्थःकु
रुकर्माणीतिभगवदुपदेशात्यत्रयत्रमनोयातितत्रतत्रसमाधयइत्यादिवचनेभ्यश्चसर्वसमंजसंसुप्तौस्थि
तस्यसुखमहमस्वाप्समितिस्वानंदानुभवेनपुनःसुषुप्तिप्राक्समयेतद्दानंदप्रकाशानुभवार्थंपरत्रेमास्यद्
स्यात्मनःस्तोतव्यत्वसंभवःउक्तंचास्मित्पितामहचरणैःस्वभावाज्ञाततोधायसत्संगाल्लब्धभक्तये॥निःसे
गाद्भक्ततापायकेवलंस्वात्मनेनमइति॥१६॥स्तूतिमाहनमइतिभुजंगप्रयातंहृत्तंभुजंगप्रयातंयइतिलक्ष
णात्॥नमस्तेतमोहन्सदाशोकहंत्रेप्रसादंविधात्रेजनेभूजकेस्वकैलासरूपपुष्पेमयाभूजितोतःप्रसीदप्र
सीदप्रपन्नार्तिहंतः॥७॥हेतमोहन्नमोनृतंहंतिहनिष्यतिवाताद्राभूतेब्रह्मभ्रूणहत्रेषुकिंवितिनिय

मान्निषेधःतेतुभ्यंनमोनतिरस्तुसदासर्वदानतिरस्तुवाङ्मनःकायकर्मभ्यांत्वांसर्वोत्कृष्टइतिज्ञानरूपायहोतेत्व
दुद्देश्यकंनमःहविःसदास्तुयावज्जीवमग्निहोत्रंजुहोमीतिवत्नमःशब्दस्यनित्यं
[illegible] नामसुपाठः तथाचश्रुतिः नपापासोमनामहेना
रायासोनजल्हवइतितत्रनिरुक्तंनपापामन्यामहेनाधनानज्वलनेननहीनाभस्यस्मासुभ्रस्मवर्यमध्ययनंत
पोदानकर्मत्यधिरवोचदितिकीदृग्यायंतवोकहंत्रेमनोरथप्रणेनाधिनाशकायय्द्वासदाशोकःसं
सारस्यनिवर्तकायपुनःकी[illegible]दृग्यायस्वेस्वकीयेसूर्यमात्रतत्परइत्यर्थःपूजकेअग्निहोत्रादिसेवांकु
र्वंतियद्वाप्राणायामादियोगाभ्यासंकुर्वंतिजनेअनुग्रात्वंप्रसादंइष्टंचित्तनैमल्यंवाविधात्रेकुर्वंतेह
प्रपन्नार्तिहंतःशरणागतपीडानाशकमयाकलारूपपुष्पैःकलारूपाणिप्रकाशात्मकानिपुष्पाणिपूजो १५

करणात्वालुसुमानिनेतेःत्वंपूजितःलोकेत्वमेवप्रकाशकइतिसंमानितःअतःकारणात्प्रसीदप्रसीदअ
नुग्राहकोभवद्विवचनमादरात्अथाध्यात्मेप्येवमेवएवमुत्तरत्रापि॥१७॥अपीतिअपिप्रसूनानिसमर्पितानि
सूनान्वितस्यापिशुभप्रदानि॥समर्पणस्यैवमिमंप्रभावंज्ञात्वाविदाकर्मसमर्थतेते॥१८॥हेप्रपन्नार्तिहंतःसू
नान्वितस्यापिसूनाहिंसातद्युक्तस्यापिपूजकस्यसमर्पितानितेनत्वत्प्रीतयेदत्तानिप्रसूनान्यपिपुष्पोएव
पिशुभप्रदानिकल्याणकर्तृणिभवंतिप्रसूनग्रहणंशास्त्रतःप्रकृष्टपापद्योतनार्थअर्थतःअनायासलभ्यत्व
द्योतनार्थंचतथाचपुण्यकृतःसङ्गात्सतोभ्यस्त्वत्प्रीतयेदत्तंपवित्रंपायसादिभोजनंकल्याणकर्तृभवती
त्यत्रकिमाश्चर्यमितिभावःयद्यप्रसूनानिप्रकृष्टहिंसानिपश्वादीनिकर्माणितान्यपिशेषंसमानंएवमुक्तप्र
कारेणइमंशुभप्रदत्वरूपंसमर्पणस्यत्वत्प्रीतयेदानस्यप्रभावंसामर्थ्यंज्ञात्वाश्रुतिस्मृतिपुराणेषुदृष्ट्वा

विदाजानताजनेनतेतुभ्यंकृतंकर्मानुष्ठानंसमर्प्यतेनिवेद्यते॥९८॥अधुनास्वस्मिन्सदुपकर्तृत्वंद्योतय
न्नाहसोमोहमितिसोमोहमस्मिप्रकृतिसवानांहविर्भूतेयज्ञफलंददामि॥नमामिमूर्द्धाविरंप्रसीदप्रभो ६
जनानुग्रहमुख्यहेतो॥९९॥सोमश्चंद्रःअहंएतद्देवसोमंयच्चंद्रमाइतिश्रुतेःयद्वालक्षात्मकःसवानांय
ज्ञानांप्रकृतिसाधकतमोस्मिसोमेनयजतेतिश्रुतेःयद्वासवानांमिष्टीनांदेवस्यसवितुःसवेकर्मण्वंति ७
वेधसइतिश्रुतेःकृण्वंतिकुर्वंतिवेधसःऋत्विजःप्रकृतिकालज्ञापकत्वेनास्मिन्वोनवोभवतिजायमा
नोह्नांकेतुरुषसामेत्यग्रं॥भागंदेवेभ्योविदधात्यायन्नमचंद्रमासिरतेदीर्घमायुरितिश्रुतेःनवोनवश्च
क्षुरानंदकरःअह्नांतिथीनांकेतुर्ज्योतिःशास्त्रप्रसिद्धस्वह्नादद्यौरेवज्ञापकःउषसामग्रमेतिप्रथ ९५
मंचंद्रमाउदेतिपश्चादुषाभवतिबहुवचनंपूजार्थंपूजातुरवाविर्भावोत्तरकालमेवसूर्योविर्भावकत्वा

तूएतेनकृष्णपक्षोद्योतितःसोप्यमायाआसन्नःप्रतिरतेददातिकिंचहविषतेहविर्होम्यंपयआदितदस्या
स्तीतिहविष्मान्नूतसोमत्वर्थइतिभत्वाद्वुत्वाभावःतस्मैयजमानाययज्ञफलंस्वर्गादिददामिसाधयामिअरण्यो
र्निहितोजातवेदागर्भइवसुभृतोगर्भिणीषु॥दिवेदिवईड्योजागृवद्भिर्हविष्मद्भिर्मनुष्येभिरग्निरितिश्रुतेःअर
ण्योर्वावृष्टिद्यौःअधियज्ञंतुमंथनकाष्ठयोःसुधितःव्यक्तःसन्दृश्यमानोतिहितोःसुहितःसुतरांगुप्तइत्यर्थः
दिवेदिवेप्रतिदिनंजागृवद्भिरपरोक्षंजानद्भिर्मनुष्येभिर्मननशीलैःमनुष्याःकस्मान्मत्वाकर्माणिकुर्वंतीति
निरुक्तान्सोहंत्वामूर्द्धाशिरसानमामिनमस्करोमिअथवामूर्द्धासर्वप्रकाशकत्वेनरूपेणनमामित्वासु
कृष्णंजानामितथाचनिरुक्तंमूर्धामूर्तमस्मिन्धीयतइतिहेवरदअभीष्टफलदहेप्रभोसमर्थप्रसीदप्रसन्नो
भवत्वेवंभूतस्त्वंतर्हित्वमेवेष्टंसाधयतवकिंमत्प्रार्थनयेत्याशंक्यसंबोधयतिजनानुग्रहमुख्यहेतोइति

आ·बो· अनुग्राह्यप्रसादप्रधानकारणमहंत्वाश्रित्यैवफलंदास्यामीतिभावः अथाध्यात्मंसोमःयोगाभ्यासेशिथिलहृति
१६ कत्वाहंमनःप्रवानवइतिमंत्रार्थस्तुयोगाभ्यासेऽणिमादिसिद्धिभिर्नवंनवंजायमानंसंस्क्रियमाणंअङ्गांपंच
भूतदशेंद्रियाणांउपसांतत्वज्ञानस्यवक्तृवचनंपूर्ववत्आत्मप्रकाशकत्वात्देवेभ्यइंद्रियेभ्यःदीर्घमायुःकालवं
चनात्एतेनयोगमार्गोद्योतितः सोपिसमाध्यासमःकिंचहविष्मंतेकृतशोषंभुंजतेयज्ञफलंयोगसिद्धिअरण्योः
प्राणापानयोःजाग्रवद्भिःआत्मानंजानद्भिःयानिशासर्वभूतानांतस्यांजाग्रतिसंयमी॥यस्यांजाग्रतिभूता
निसानिशापश्यतोमुनेरितिभगवद्वचनैःशोषंपूर्ववत्मन्वेहोभयत्रसोमःपवतेजानितामतीनांजनितादेवोजनिता
पृथिव्याः॥जनितोन्नजनितास्तूर्यस्यजनितेंद्रस्यजनितोतविष्णोरितिश्रुत्यासोमस्यमनुष्यंद्रस्यमत्यादिज
नकत्वंप्रतिपादितंतथाचात्मसूर्यस्यमुख्यहेतुत्वमुक्तंविरुध्यतेतिचेन्मैवंसोमोमत्यादिज्ञापकतयासूत्य १६

तद्व्यर्थात्वस्तुतस्तुआत्मसूर्यएवात्रसोमस्तेनसूत्यतेतथाचनिरुक्तं सोमःपवतेसोमः सूर्यःप्रसवःनाजनि
तामतीनांप्रकाशकर्मणामादित्यरश्मीनांदिवोद्योतनकर्मणामादित्यरश्मीनांपृथिव्याःप्रथनकर्मणामादित्य
रश्मीनामंतर्गतिकर्मणामादित्यरश्मीनांसूर्यस्यस्वीकरणकर्मणामादित्यरश्मीनामिंद्रस्येश्वर्यकरणामादि
त्यरश्मीनांविष्णोर्व्याप्तिकर्मणामादित्यरश्मीनामित्याधिदैवतमथाध्यात्मंसोमआत्मात्यतस्मादेवेंद्रियाणां
जनितेत्यर्थःअपिवासर्वाभिर्भूतिर्विभूतयआत्मेत्यात्मगतिमाचष्टइति॥१२॥इदानीजनोपकारकामः
स्वमर्थंयाचतेत्वदात्मेतित्वदात्मसाक्षात्करणेविरुद्धासंसाररात्रिर्विदुषेदुनोति॥उद्वर्तुमेतंसुखिनंविधा
तुंमांयोजयत्वंकलयाप्रसन्नः॥२०॥हेजनानुग्रहमुख्यहेतोत्वदात्मसाक्षात्करणेतवसच्चिदानंदात्मकं
स्वरूपंतत्प्रत्यक्षेविरुद्धाप्रतिकूलासंसाररात्रिःसंसारसदृशीअनेकमोहभ्रमभयदारात्रिस्तामसीविदु

केश्रोतस्मार्तमार्गकुशलायय : ह्यत्वन्योन्यत्सर्वदुःखहेतुरितिजानतेपुरुषायदुनोतिदुःखंददातितस्मात्कार
णात्एतमेवंविधंविद्वांसंउद्धर्तुंनिर्भयंकर्तुंसुखिनंसकलेष्टभोगदानेनपुष्टंविधातुंकर्तुंयदिलंप्रसन्नवरदःतर्हि
मांकलयास्वतेजसायोजयप्रकाशयेत्यर्थः त्वमिवाहंसकलांप्रजांपालयिष्यामीतिभावः अतएवोक्तंराजानो
रविशीतरश्मिरित्यथाध्यात्मंसंसाररात्रिःसर्वप्राणिरात्रिसदृशःसंसारःशेषंसमानंयद्यायतःप्रसन्नोसीतियोज
नीयंआत्माकर्तृसमत्वात्॥२०॥एवमितिएवंवदंतममृतांगममात्यवर्यंलोकप्रसादकरमात्मसमानशीलं॥
वीक्ष्योजसातमपियोजितवान्दिनेशः सोपिप्रणम्यरविमाश्रुततःप्रतस्थे॥२१॥दिनेशःसूर्यः एवमुक्तप्रकारे
णावदंतंयाचमानंअमृतांगंजलस्वरूपंपयःकीलालममृतंजीवनंभुवनंवनमित्यमरःअमात्यवर्यंअमात्याःस
चिवाःतद्वत्तत्कार्यकारिणोविद्गुशानिगुरुभौमाःतेषुवर्यंस्वप्रकाशनलोकरक्षणात्श्रेष्ठंअतएवलोक ७

प्रसादकरंजनसुखजनकंअतएवात्मसमानशीलंस्वसदृशस्वभावंचेतींक्ष्यविचार्यतमपिपूर्वापराधिनम
पियद्यपिद्यात्बुधादयस्तथापचयस्याकाशेयादृशःप्रकाशःतस्यतादृशंफलंभवतीत्युक्तंज्योतिःशा
स्त्रेओजसासामर्थ्येनयोजितवान्जगत्प्रकाशकंकृतवानित्यर्थः दिनेशायहृतंतस्मिन्सर्वदारात्र्यत्यंताभाव
प्रतिपादनार्थंचंद्रहीनांरात्रेःप्रकाशमानत्वाद्वा त्रिसंबंधोस्त्यवसोपिचंद्रोपिरविंसूर्यंप्रणम्यभक्त्यान
त्वाततःसूर्यप्रदेशात्आशुस्वर्गीघ्रगत्यासप्रतस्थेनक्षत्रांतरंगतवानित्यर्थः अथाध्यात्मंदिनेशःप्रकाशकत्वा
द्दिनंज्ञानंतस्येशःउत्पादकत्वात्आत्माअमृतांगंमुक्तिपर्यंतंमविनाशित्वादमृतमंगस्वरूपंयस्यतत्मनःन
युक्तमतेमनसोनाशप्रतियोगित्वाभावउक्तस्तथाचसवारुक्किंमुक्तिपर्यंतानुधावनेनेतिचेदअस्त्यात्मा
मर्त्येनमनसासहेतिनिरुक्तात्यावदधिकारमवस्थितिराधिकारिकाणांमितिसूत्रात्चरुक्तरुक्अमृतं

गंआत्मार्कैक्य ज्ञानहेतुंअमृतस्यभागं ज्ञानस्येत्युक्तनितत्कात्अमात्यवर्यंअमात्यसदृशेंद्रियेषुश्रेष्ठंयद्वाअ
मासहभवानिअमात्यानींद्रियाणिअचूयात्यएतेषुश्रेष्ठंतमंविमनोपिअपिवाहादींद्रियाणितदुक्तंपुरस्तात्
सोपिमनोपिरंविमात्मानंप्रणाम्यसर्वोत्कृष्टंज्ञात्वाततआत्मःप्रापकनाडीप्रदत्तादाशुचंचलत्वात्प्रतस्थे
संसारप्रवृत्तेर्नोषंपूर्ववत्॥२१॥प्रथमृतिअपरांतिकाछंदःयुगपरांतिकेतिलक्षणात्तयुग्मेतालीयस्य
युग्मःपादइत्यर्थःप्रथमदर्शनेहृद्विधोर्जनाःकृतसुमंगलाःसात्मजांगनाः॥हतविरोत्कंतावीक्ष्यतं
मुदासपर्दिनमुराह्लादकंसदा॥२२॥हृद्विधोःहृत्सदृशस्यविधोश्चंद्रस्यप्रथमदर्शनेप्रथमंदृश्यत
स्मिन्नितिप्रथमदर्शनंप्रतिपत्तिथिःतस्मिन्यथासात्मजांगनाःसापत्ययुवतयःकृतसुमंगलाःविरचि
तशोभनोत्सवाःशुक्लपक्षेसकलशोभनकर्मणांविधानात्जनांभूतलस्थाःलोकाःतंवंद्यंमुदाहर्षेणावी १८

क्ष्यहृष्टाहृतविरोत्कंताःनष्टवक्रुकालचंद्रदर्शनोत्कंठाःसंतःसदाआह्लादकंनित्यंप्रीतिवर्धनंचंद्रंसप
र्दितत्कालमेवनेमुःनमश्चक्रुःतथासात्मजांगनाःसाकूतंकांतायःजनाःज्योतिर्मयाःलोकाःनेमुर्नताबभू
वुःउत्तरोत्तरमल्पदृश्यत्वमीयुरितियावत्यहासवेत्तारोत्कृष्टंज्ञानंतिस्मप्रतिमासंसूर्यगतत्वात्तोषसमानंअथाध्यात्मंहृद्विधोःविधुसदृशस्यप्राप्तेश्चयेस्यमनसःप्रथमदर्शनेअयमुत्कृष्टोयोगीश्व
रइतिज्ञानेसात्मजांगनाःजनाःगृहमेधिनःकृतसुमंगलाःआहृताःसंतःतंयोगिनंवीक्ष्यसत्कृत्यतथा
चयाज्ञवल्क्यःसत्कृत्यभिक्षवेभिक्षांदातव्यासुव्रतायेतिआह्लादकंयोगसिद्धिभीरुंजकंअपराध्या
त्मंतुजनाःप्राणाःकृतसुमंगलाःसंपादितपुण्याःसात्मजांगनाःवातपित्तकफाश्चतज्ज्ञनन्योनाद्य
श्चतद्युक्ताःआह्लादकंदीर्घायुःसंपादनेनपोषकंतोषसमानं॥सुसोत्थितस्यतुसंसारिणःप्रथमद

रनिग्रहणलाभिमानेजनाःपुत्राद्यःआह्लादकंपोषणेनसर्वाभीष्टकरंशोषंसमानं॥२२॥हृद्विधुरितिरथो
ऽतादृत्तंरथोऽतानीलोगीतिलक्षणात्तद्धृद्विधुःप्रभुसपर्ययान्वितःप्रत्यहंनिशियथाकलोदयः॥लोकरक्ष
णाभिहाकरोत्तथाडुष्टसत्वभयतःसमंततः॥२३॥हृद्विधुःतैं हृत्सदृशःविधुश्चप्रभुसपर्ययास्त्रीभिमुख्य
क्रिययाप्रत्यहंप्रतिदिनमन्वितःकर्त्तृतेनसंबद्धेःसन्निशिरात्रोयथादेशतःकालतश्चयद्वधिकःकलो
दयःप्रकाशाविर्भावोभूत्तथातेनप्रकारेणाहरात्रौसमंततःसर्वेषुदेशेषुडुष्टसत्वभयतःहिंस्रचोरव्या
घ्रादिप्राणिदुःखात्लोकरक्षणंस्वधर्मरतजनपालनमकरोत्कृतवान्यावच्चंद्रप्रकाशोचोरादयोनो
पद्रवंतीतिदर्शनेननत्रचंद्रकर्त्तृकलाभिमानइतिभावःयद्वातत्तःलोकरक्षणोत्तरंसमंसमभावंसुकृत्त
स्यमितियावत्प्रापितिशेषःअथाध्यात्महृद्विधुःविधुसदृशोहृत्मनःप्रभुरात्मानस्यसपर्यासुकृतक्रिया

योगसाधनाग्निहोत्रादिसेवावतयानिशेसंसारेयथाकलाःयोगसिद्धयःतथाचातुर्यरूपाडुडुयः
नासामुदयोभूत्तथासर्वदावैराग्योपदेशेनइहसंसारेडुष्टसत्वभयतःस्त्र्यादिविषयेभ्योभयात्तत्संग
त्कार्पण्यादिदोषोदयेनस्त्र्यादिविषयाणांडुष्टत्वात्अश्रीरातनूर्भवतिरुशतीपापयामुयेतिश्रुतेः
श्वरुशतीप्रेः कान्तामानापापयारागद्वेषोत्पादनेनबंधनरूपयाअमुयास्त्रियाअश्लीलाकुत्सि
ताभवतीत्यर्थःलोकानांमान्यत्वेनदर्शनीयानांसुसूक्ष्मणंरक्षणंततोनिवर्तनंसमंततोकरोत्यद्वातत्तोसु
सुप्तुरक्षणानंतरंसमंसच्चिदानंदात्मकंब्रह्माकरोत्प्रकटयतिस्मसंसारित्तुमनःसमंततःदुष्टसत्व
भयतःजारादिभ्योहरणभयात्लोकस्त्री जनस्तद्रक्षणमकरोत्स्वदारनिरतश्चैवस्त्रियोरक्ष्यायतःस्म
ताइतियाज्ञवल्क्यस्मृतेः॥२३॥चंद्रइतिचंद्रेप्रशस्तपरिपूर्णरूपेसमस्तकार्यस्यवदंतिसिद्धिं॥तथैवजा

तेमनसिप्रसन्नेसिध्यंतिसर्वेपुरुषाभिलाषाः॥२३॥परिपूर्णरूपेशुक्लेकादश्यादिरुद्रपंचम्यंतासुतिथिषु
सुवृत्तमंडलेचंद्रेनिशाकरेप्रवर्त्तमानजन्मतृतीयषष्ठसप्तमदशमैकादशराशिगतत्वात्शुभेसतिसमस्तकार्य
स्यसमग्रस्यकर्तव्यस्यकर्मणःसिद्धिंशुभंफलंवदंतिज्योतिर्विदः;तथैवजागरेसकलेंद्रियवृत्तिभिःपरि
पूर्णएवज्ञातेश्रवणमननादिसंस्कृतेमनसिचित्तेशोकाद्यभावेनप्रसन्नेसमाहितेसतिसर्वेसमयाः
पुरुषाभिलाषाःपुरुषायोगिनस्तेषामभिलाषाःकामाःसिध्यंतिअप्रतिहताःफलंतितेषांनिश्चयमनुव
र्त्तेजगदितिभावःसंसारिणामपितथासतिकामाःफलंतितदुक्तंअंतर्मलिनचित्तानांसुरवंस्वप्नेपिदुर्ल
भं॥कायवाक्चित्तशुद्धानांसंपदःस्युःपदेपदइतिइतिपदंत्यध्यात्मविदोयज्ञविदश्चेत्यन्वयः॥२४॥उ
दयइतिप्रमिताक्षरावृत्तंप्रमिताक्षरास्तोसाविनिलक्षणात्उदयेव्ययेर्ध्यभिरवगेशामयंविधुराजसानपरिही २०

ननतनुः॥इतिवीक्ष्यतत्रविबुधाःस्वमनोदधतिप्रकाशवतिचित्यमले॥२५॥अयंसूर्यानुगृहीतःविधुउद
येकलाद्वितीयसमयेव्ययेपितक्षयसमयेपिअभिरवगेन्नांरवगेदांगगनचरेश्वरंसूर्यमभिमुखंलक्षीकृत्य
लक्षणेनाभिप्रतीत्याभिमुख्यइतिअव्ययीभावेभेः पूर्वेनिपातःओजसातेजसापरिहीनतनुःशून्यमूर्ति
र्भवतीतितत्रद्वितीयक्षयपक्षयोर्वीक्ष्यसाक्षात्कृत्यविबुधाःविशिष्टाःपंडिताःस्वयोगबलेनस्वाधीनंम
नश्चित्तंप्रकाशवतिप्रकाशश्चैतन्यंतद्वतिआत्मनिदधतिनिवेशयंतिननुतार्किकादिमतइवात्रात्माज
ड:स्यादितआहचितीतिचितेश्चैतन्यात्मकस्यार्थः ननुतर्हिअत्रचैतन्यंद्विविधमुक्तंअज्ञानोपहित
मज्ञानानुपहितंचेतत्राद्यंदधतिउतद्वितीयंइत्याशंक्यतत्राद्वितीयाऽइत्याहअमलइतिअज्ञानसंबं
धशून्यइत्यर्थः इदमत्रोभयत्रबोध्यंचंद्रःपृथिवीछायययावावत्सूर्यव्यवहितोभवतितावान्प्रकाशा

रहितोभवतिराहुग्रहइतितुकथामात्रंअथवाराहोरूपछायारूपत्वेनसोमरूपत्वाद्रहयतिप्रकाशरहितंकरोतितीरा
हुशब्दस्यार्थाच्चेतेहादित्यानंगीरसोयाजयंस्तेभ्योयाजयञ्छ्रमांपृथिवींपूर्णांदक्षिणांनामददुस्तानियंप्रति
गृहीतानपत्नीन्यरुंजन्नाहिंस्रन्वाविदभंतीजनानचरतीतिश्रुत्याराक्षसजनन्याःसिंहिकायाःपृथिवीत्व
प्रतिपादनाच्चएवंमनोदेहाभिमाननयादावेत्मव्यवहितंभवतितावच्चेतन्यहीनंभवतितदुक्तंकाशरिवं
डेभूतानांप्राणिनःश्रेष्ठाःप्राणिनांमतिजीविनः॥मतिमत्सुनराःश्रेष्ठानरेषुब्राह्मणाःस्मृताः॥ब्राह्मणेषु
चविद्वांसोविद्वत्सुकृतबुद्धयः॥कृतबुद्धिषुकर्तारःकर्तृषुब्रह्मवादिनइति॥एतावंतानिबंधेनकृतो
यस्मान्महेश्वरश्चआत्मसूर्यततःसर्वमस्माकंकामाक्षरेण॥९॥ ॥इतिश्रीकालोपनामकाहितास्नि
ग्धनाथभट्टात्मजगोविंदकृतआत्माकबोधेमासकथनंनामप्रथमउपदेशः॥ ॥श्रीसूर्यनारायणार्पणम्॥ २९

×श्रुतेतिकश्चिद्गुरुतोमनीषीशुश्रूषुरेतंनिजगादशिष्यः॥वदानुमासंकथमात्मभानोःसमस्यवैषम्यमिदंदयालो॥×९

संप्रतिस्पष्टप्रतिपत्तयेगुरुशिष्यसंवादंनिबध्नातिश्रुतेतिकश्चिद्गुरुमनीषिषुमध्येकश्चनमनीषी
विद्वान्शुश्रूषुपुनरापप्रोतुमिच्छुःशिष्यउपदेशार्हंगुरुतःउपदेष्टुःसकाशादितिएवंरूपंश्लोकंवधार्यएतं॥गु
रुंनिजगादउक्तवान्किंनिजगादतदाहहेदयालोसमस्यब्रह्मरूपस्यात्मभानोरर्कस्यानुमासंमासंमासंप्रति स्मा३
इदंदृश्यमानवैषम्यंनानारूपत्वंकथंकेनप्रकारेणभवतितद्दयउपदिशेतिप्रार्थना॥२६॥जिज्ञासुमितिजिज्ञा
सुमेतंनिजगादशिष्यंगुरुर्जनरक्षायुपकारकर्ता॥एकाग्रबुध्याशृणुतातत्वंगोप्यंवदामीहतवाग्यभक्त्या॥
॥२७॥जनस्यापिपरंपरयासर्वस्यवैदिकलोकस्यअपिशब्दात्साक्षादुपदेश्यस्यप्रष्टुःज्ञानप्रदानेनउपका
रकर्तादुःखादुर्धर्तीगुरुरुपदेष्टाजिज्ञासुंसमस्यात्मार्कस्यपतिमासंविषमभावःकेनहेतुनेतिज्ञानुमिच्छुएतं
प्रष्टारंशिष्यंसर्वथोपदेश्यंनिजगादसर्व मुपदिदेशकिंनिजगादतदाहहेतातहेपुत्रतातेतिसस्नेहसंबोधनं

लंसमाहितः तत्त्वत्त्वं तस्योत्तरंएकाग्रबुध्यास्थिरेणांतः करणेनश्रृणुअवधारयइहात्मार्कबोधेतवप्रष्टुः
अथयस्त्रिद्वयाभक्त्यासिव्यबुध्यावदामिउपदिशामिकीदृशंतत्त्वोप्यंअनधिकारिणेअप्रकाश्यं॥२१॥चंद्रमंदौजि
स्वागताहृत्तंस्वागतानौभौगितिलक्षणात् चंद्रमंदवशगेअयनेद्वेदक्षिणंप्रथममुत्तरमन्यत्॥मित्रवैरि
भवनेतत्तइत्थंदृश्यतेऽल्पबऊतामूरोर्कः॥२२॥चंद्रमंदवशगे चंद्रःकर्कीपतिःमंदोमकरपतिःतद्वशगेतज्जू हा
भ्यांप्रवर्तमानत्वात्तदधीनेहेअयनेभवतःतत्रप्रथमंककीदिदक्षिणंदक्षिणायनंसूर्यस्यदक्षिणाभिमुख
गमनाद्भवतिअन्यत्मकारादिउत्तरं उत्तरायणंसूर्मस्योत्तराभिमुखगमनाद्भवतितेउभेअयनेसूर्यस्य
कर्मणामित्रवैरिभवनेमित्रंचंद्रःवैरिस्थानिःतयोर्गृहेभवतःततस्तस्मात्कारणात्अर्कःसूर्यः इत्थमनेनप्र
कारेणदृश्यतेसाक्षात्क्रियतेइत्थंकथंअल्पबऊतामकरःमित्रभवनेदक्षिणायनेईषद्दाहकोभवति २२

वैरिभवनेउत्तरायणेभूरिसंतापकारीभवतिअथाध्यात्मंचंद्रमंदवशगेचंद्रमंदौमनश्चक्षुषीमंदस्यचक्षुष्टं
वक्ष्यतिचंद्रस्यमनस्त्वंतूक्तं तदधीनेअयनेद्वेकर्मज्ञानात्मकेगतीभवतः तत्रप्रथमंकर्मदक्षिणंसर्वपालक
त्वात्औदार्ययुक्तंभवतिवथामातरमाश्रित्यसर्वेजीवंतिजंतवः॥वर्तंतेगृहिणस्तद्वदाश्रित्येतरआश्रमा
इतिवचनात्अन्यत्ज्ञानंउत्तरंश्रेष्ठंभवतिप्रकाशनात्उभेकर्मज्ञानेमित्रवैरिभवनेमित्रंस्वप्रकाशनात्
मनःअनात्मविषयप्रकाशकत्वात्वैरिचक्षुःतयोस्थानेज्ञापकेभवतःततःकारणादर्कआत्माइत्थं
दृश्यतेअनुभूयतेइत्थंकथंअल्पबऊतापकरःवयोबुध्यर्थवाग्वेषश्रुताभिजनकर्मणां॥आचरेत्सद्
वृत्तिमाजितात्मशतांतथेत्यादियाज्ञवल्क्यवचनोक्तसन्मार्गस्थितानांविदुषामात्माईषद्दुः
खदोभवतिपश्चादुत्तरोत्तरं सुखोदयात् तथाचस्मृतिः आचारःप्रथमोधर्मोनृणांश्रेयस्करोमहा

न॥ इहलोकेपराकीर्तिःपरत्रपरमंसुखमतिकेवलविषयदर्शनमार्गेस्थितानांसंसारिणांतुसद्विद्यादानंदात्
मस्वरूपप्राप्त्युपायाकारणात्अत्यंतदुःखदोभवतितद्दुःखंभगवताआत्मैवह्यात्मनोबंधुरात्मैवरिपुरात्मन इ
तिनचात्रकर्णकर्मनिक्रांतिविरोधःसत्स्याःनिर्विषयकेज्ञानेब्रह्मणिआत्ममात्रविषयकेज्ञानेचतात्पर्यात्॥२८॥
एवमयनेउल्कासंप्रतितदंतर्वर्तिककीदिदृक्षादशमासानांमध्येकर्कसिंहौमासौमित्रस्मरणसुखवशात्प्रह
र्षिण्याह॥उद्युक्त इतिउद्युक्तोभवतिर्यत्नंकरोतिकिंवयावच्छक्तिपावतीशक्तिःकोमुदीरूपातावद्वति
रक्षतितदानीचोराद्युद्योगाभावदर्शनात्पालनमितिभावःततःसज्ञानरक्षणात्कारणात्भानोःसूर्यस्य
चंद्रःहितोमित्रमस्तिमित्रत्वेनाभिमतोभवतिअतएवएवमित्रादेवआदौप्रथमतःतद्गृहंतस्यचंद्रस्यगृ
हंकर्कदृष्टिपूर्णंअमृतदानेनानुत्कंउत्कंतांविधायपश्चाद्धितोस्तीतियोजनीयंमुख्यंमित्रमित्यर्थः २२
×जनायनेनिशीदुर्यश्चछत्रंभवतिततोहितोस्तिभानोः॥आदौतद्गृहमतएवदृष्टिपूर्णंकृत्वास्वंगृहमकरोत्तथैव×
मित्रः॥२९॥इंदुःश्वंइंदुःनिशिराजोजनायनेलोकानांचोरादिहिंस्रेभ्योरक्षणेउद्युक्तोभवति××

तेननसमानकर्तृकयोःपूर्वकालइतिक्त्वाप्रत्ययविरोधःवस्तुतस्तुआदौतद्गृहमित्येवान्वयःएतेनकर्मणःत
त्सज्ञानहेतुत्वमप्युक्तंभवत्यध्यात्मंस्वंस्वकीयंतेनाभिमतंगृहंसिंहंतथैवदृष्टिपूर्णमेवाकरोत्कृतवान्तथा
वयाज्ञवल्क्यःआकूत्याप्यायतेसूर्यःसूर्यादृष्टिरथौषधीरिति॥अथाध्यात्मंकर्मबुद्धीआहइंद्रमनःनिशि
संसारेउद्युक्तोयत्नवत्भानोरात्मनःतद्गृहंमनस्थानंकर्मदृष्टिपूर्णंसकलेष्टसिद्धिसमृद्धंतदुत्तरंस्वप्रसूता
त्मप्रतिपादकंगृहंस्थानंबुद्धिंसर्वप्रकाशसमर्थत्वोषंस्पष्टंकर्कशब्दकर्मशब्दयोःसिंहशब्दबुद्धिशब्दयोः
श्वेकोर्थःरुदाधारार्विकलिभ्यःकृत्यनुशासनात्हृधातोःक्रियार्थकलाञ्छसिंहःसहनादितिनिरुक्तात्
सहनस्यबुद्धिमत्यवसंभवःतदुक्तंभगवतायांहिनव्यथयंत्येतेपुरुषंपुरुषर्षभ॥समदुःखसुखंधीरमृत
त्वायकल्पतइतिएतेविषयसंबंधाःधीरेमंतं॥२९॥एवंकर्कसिंहावुक्त्वाकन्यामाहमित्रस्येतिमित्रस्यभोम

धी

स्यतथाचगुरोर्विद्वैरीतथेंदोर्हितउच्चसंस्थः॥अतःसमस्येष्यगृहंबुधस्यपित्रादितुस्यात्तरणिर्हितोभूत्॥ ३०॥
विद्बुधःकुजजीवयोःसूर्यमित्रंवक्ष्यतितथाचमित्रस्यसूर्यहितस्यभौमस्यमंगलस्यतथासूर्यहितस्यगुरोः
बृहस्पतेश्चवैरीवक्ष्यमाणरीत्याशत्रुर्भवतितथासूर्यहितस्येंदोश्चंद्रस्यहितःवक्ष्यमाणरीत्यामित्रंभवतिउ
च्चसंस्थः कन्याबुधस्यउच्चंभवतितत्रसंस्थास्थितिर्यस्यतः तत्स्वाम्यात्तादृशोभवतिइदंतुसंभवमात्रंए
तेनविदातत्रस्वप्रशस्तिसंपादनेनसवीत्मनः सूर्यस्यप्रशस्तिःसंपादितेत्युक्तंभवतिअतोमित्रशत्रुत्वान्मि
त्रमित्रत्वाच्चसमस्यमित्रवैरिभावहीनस्यबुधस्यगृहंकन्यामित्यप्राप्यतरणिः सूर्यः पित्रादितुष्यावखादी
नांतस्याकन्यागतेसूर्यमहालयश्राद्धविधानात्चंद्रादीनांनैर्मल्यकरणेनचहितः इष्टकृद्भूत्अथाध्या
र्मकर्मज्ञानेउक्तोवेदवावमाहबुधस्यारुरुक्षुयोगित्वंभौमस्यघ्राणोपस्थेंद्रियरूपत्वंगुरोः रसनपायुरू २४

पत्वंचवक्ष्यतितथाचारुरुक्षुर्योगीवक्ष्यमाणप्रकारेणात्मप्रियघ्राणोपस्थरसनपायुनियंतृत्वात्तद्वैरीभवति
योगाभ्यासेनस्वास्थ्यजननात्अणिमादिसिध्युत्पादनाच्चात्मप्रियमनोरंजकत्वात्तन्मित्रंभवतिउच्चसंस्थः
उच्चोऽन्नतिहेतुर्वेस्वाकृतत्रसंस्थातदर्थानुष्ठानेनस्थितिर्यस्यतादृशः तथाचयाज्ञवल्क्यः यज्ञानांतपसा
चैवशुभानांचैवकर्मणां॥वेदएवद्विजातीनांनिःश्रेयसकरःपरइति अतःसमस्यबुधस्यारुरुक्षोर्योगिनोग्र
हसर्वसंपत्स्थानंवेदवावंप्राप्यात्मापित्रादितुष्यापितृदेवर्षितर्पणेनमनआदीनांप्रसादेनचहितोजातःकन्या
भवति राद्वेदवाक्शब्दयोरेकोर्थःकन्याकमनीयाकेयंनेतव्येतिवाकमनेनानीयतइतिवाकनतेर्वास्यात्कांतिकर्मे
णइतिनिरुक्तात्॥ ३०॥संप्रतिशत्रुस्मरणेदुःखवशाच्चुजंगप्रयातेनाहविदोपीतिविदोपित्वशब्दोहितलंवि
दित्वावकारातपस्येतगेहेल्पतीक्ष्णं॥तथापिप्रसादंधियांप्रेक्ष्यतस्यप्रसन्नप्रकाशोवभूवग्रहेशः॥ ३१॥ग्रहेशः

सूर्यः विदोपिबुधस्यापिस्वशत्रोर्भृगुशन्यो हितत्वंवक्ष्यमाणप्रकारेणमित्रत्वंविदित्वाज्ञात्वातस्यबुधेस्य
ग्रहकन्यायामल्पतीक्ष्णंमेधावृततत्वादल्पःशीतलःसचासौतीक्ष्णश्चदाहकःमेघानावृततत्वात्तादृशमा
तपंघर्मंचकारकृतवान्परस्मैपूर्वंतुआतपकरणेजन्यदुःखस्यपरगामित्वप्रतिपादनायउक्तमन्यानुशा
सनंकृतंपुण्यतमेदेशेदृष्टिर्भवतिशारदीतिवचनाद्देवमुक्तिमितिभावःतथापिस्वशत्रुमित्रत्वेपितस्य
समस्यापिबुधस्यधियांस्वविषयाणांबुद्धीनांप्रसादनेमल्यंप्रेक्ष्यज्ञाताप्रसन्नप्रकाशःस्वयमपिनिर्मल
तेजाःबभूवतस्यगृहेदर्शनीयप्रभश्वासीदित्यर्थःअथाध्यात्मंलक्ष्यचक्षुषोःभृगुशनिरूपत्वंतयोरात्मशत्रु
त्वंचवक्ष्यतितथाचयेहशःइंद्रियेशाःतत्प्रवर्तकत्वादात्मायोजागरेबहिरनुक्षणधर्मिणोर्थान्भुंक्तेसमस्त
करणेर्हृदितत्सदृक्षान्॥स्वप्नेसुषुप्तउपसंहरतेसएकःस्मृत्यन्वयादखिलहृत्तिदृगिंद्रियेशइतिभागव

तात्पर्यविदोपिआरुरुक्षोर्योगिनोपिस्वशत्रोरनात्मप्रकाशकत्वेनात्मद्वेषोःलक्ष्यचक्षुषोर्विषयेवीर्थदर्शनग
मनादौतत्स्नानदानादौहितत्वमिदंममेष्टसाधनमितिबुध्यातदभ्यासरक्षणेपरत्वंविदित्वातस्यारुरुक्षोर्योगि
नोगृहेसर्वसंपत्करेयोगाभ्यासेअग्निहोत्रसेवनेवाल्पतीक्ष्णंआरंभकालेश्रमःपश्चादुत्तरोत्तरंसुखंअतःका
रणान्मंददुःखंचकारतथापितस्यारुरुक्षोर्योगिनोधियांप्रसादंसमाधानंप्रेक्ष्यस्वयंप्रसन्नप्रकाशोबभूवसर्व
दाकर्मफलदानेनभासमानएवासीदित्यर्थः॥ ३१॥तुलामाहअथेतिअथश्रौतमार्गविरुद्धात्ममंत्रीसखाम्लेछ
राजस्यमंदस्यशुक्रः॥पुरस्थःसदाकार्यनाशस्यकर्तारिपुःसर्वथास्यारितुंगस्यनाथः॥ ३२॥अतस्तद्गृहेदा
हकत्वेग्मरश्मिस्तथातुंजनानंतकोपिप्रहृष्टः॥गृहंरक्षितुंभागवोदीपदानेःसपर्यारतःस्नानभोज्यादिभि
श्च॥ ३३॥अथशनिरुक्तो दक्षिणेवगोलःसुमेरुस्थानांलोकानांरात्रारंभस्यनिज्ञापनार्थःतथाचेतःप्रवृष

आ० को० २६

एमा साऽजरगो लोदिवसश्चेतिज्ञेयं अथानंतरं श्रौतमार्गविरुद्धात्ममंत्रीऽपदेशम्लेछराजस्या
नार्यपालकस्यातएवमेदस्यअल्पगतेःज्ञानेःसखावक्ष्यमाणरीत्यामंत्रंपुरस्कृत्यपश्चिमेदेशागामिनांमनुष्या
णांमध्येस्थितःसदाकार्यनाशस्यनित्यमिष्टध्वंसस्यप्रतिबंधस्यवाकर्तासंपदकःतदुक्तंज्यो तिःशास्त्रेवा
मेभुक्तेनवोदायाःसुखंहानिश्चदक्षिणे॥धनंधान्यंचरुष्टस्थेसर्वनाशःपुरस्थितइतिहदमुपलक्षणंरा
रितुंगस्यसूर्यशत्रुःशनिंतस्योच्चस्यतुलायानाथःपतिःएवभुक्तःसूर्यस्यसर्वथा सर्वप्रकारेणरिपुःशत्रुर्भवति
अथाध्यात्मंअथशब्दश्चतउत्तमजन्मशरीरावछिन्नानामात्मनांकेवलसंसारकृत्यारंभप्रतिपादनार्थःश्रोत
मार्गेनित्यशुद्धबुद्धमुक्तस्वभावात्मबोधकेविरुद्धात्ममंत्रीऔपनिषदात्मविमुखत्वेनजडानित्यास्थविचारी
राभिमानिनःतेषांस्वरक्षणेप्रवर्तकःम्लेछराजस्यम्लेछाःव्याकरणलक्षणासंस्कृतशब्दभाषिणःतदुक्तंव्या

२६

करणाध्ययनप्रयोजनकथनावसरेमहाभाष्येतेःसुराहेळयोहेलयइतिकुर्वंतःपराबभूवुस्तस्मान्ब्राह्मणेनन
म्लेछितवैनाएभाषितवैम्लेछोहवाएषयदपशब्दःम्लेछामाभूमेत्यध्येयंव्याकरणमित्तेषांराजानात्मनिदेहादौ
प्रवर्तकःतस्यामंदस्याल्पप्रकाशैकस्यवक्ष्यमाणःएथिव्यप्तेजोयाहकत्वसाधर्म्येणमित्रंपुरस्कृत्यस्त्रीवारीरप्रत्यक्ष
विषयःस्वरूपःतत्रानुरक्तस्तुत्यादेनकार्यस्यास्मिन्जन्मनिसदाश्रवणमननादेर्नाशस्यकर्तातदुक्तंचक्रुताभव
तितापायदृष्टाचोन्मादकारिणीस्पृष्टाभवतिमोहायसानामदयितेकथमितिहिजराजमुखीमृगराजकटिर्गा
नराजविराजितमंदगतिः॥यदिसावनिताहृदयेवसतिकृतपःकृतपःकृतसमाधिगतिरितिचएवंसर्वथात्मस्वरूप
मात्मनःशत्रुमुक्तंतस्यैवकररूपेतनचशत्रुत्वमाहस्वारितुंगस्यनाथइतिस्वस्यात्मनोरिनात्मप्रकाशकैत
नविरुद्धंवक्ष्यमाणस्यतुंगंमहास्तिथाप्रिस्थानंलेखनादिकर्मतस्यनाथस्तत्प्रवर्तकःचणकदलादौव्यक्तावयवा

आ-बो २७

दिहस्यालेरव्येलेखनेनवक्षुषःप्रावास्यंभवतीतिभावःअधिदैवेतथैवबिंबप्रतिबिंबयोरेकरूपत्वात्॥२२॥अत
इतिअतःशत्रुलातिग्मरश्मिस्त्रीक्षणकिरणस्तद्दृश्यशुक्रस्थानेतुलायांदारुकदृल्लोकसंतापकरोजातःतथाज्वरता
पकरणोनांतकोपियमोपिजनात्लोकानतुंनाशयितुंप्रवृत्तउच्चुक्लोजातःसूर्यपुत्रत्वात्तदुक्तंआश्विनस्यदिनान्य
होसर्वेकार्तिकेरासुराः॥यमदृष्टेतिविख्याताभितभुक्तत्रजीवतीतितदाभार्गवःभुक्तःग्रहंतुलांताकालिकंजनमि
मित्यर्थःरक्षितुंनिर्भयंकर्तुंदीपदानेहपेदानेश्वगवादिदेयाणांस्नानभोज्यादिभिश्चस्नानेश्वभोज्येरत्नेश्वभोज्यं
भक्ष्यइतिनियमात्आदिशब्दात्तुलसीवनपालनादयोधर्माःतुलासंस्थेदिवाकरेतेषांविधानात्सपर्यास्कैयार
तःसूर्यप्रीतयेइत्यजायांतसरोभूतअथाध्यात्मंअतःशत्रुत्वात्तद्दृश्यत्वेग्रहेयहणसाधनेकरेतिग्मरश्मिरात्मा २७
त्रालणानांप्रतियहंप्रयच्छेत्तेनक्षत्रियाणांमनुष्याणांयुद्धादिकर्मणित्रणाद्यूत्पादनंदुःखंभवतितथांतकोमृत्युर्व

नात्त्रालणक्षत्रियादीनतुंप्रतियहयुद्धादिकर्मसुहंतुंप्रवृत्तोभवतितदाभार्गवःकरःग्रहंवारीरंरक्षितुंदीपदा
नैःस्नानभोज्यादिभिश्चपुण्येरात्मनःसपर्यारतोभवतिधर्मनिरतस्यनरस्यशुचीनांश्रीमतांगेहेजन्मनाप्रतियह
युद्धादिक्रूरंकर्मविनेवसकलेष्टसिद्धिर्भवतीतिभावःतत्रऋतयःस्मृतयश्चदक्षिणावतामितिमानित्रादक्षिणे
वतांदिविसूर्यसः॥दक्षिणावंतोअमृतंभजंतेदक्षिणावंतःप्रतिरंतआयुरित्याद्याःत्रिविधानिकर्माणिद
क्षिणावतांदक्षिणावतइत्यर्थःप्रथमार्थेषष्ठीसूर्यसःसूर्यप्रभाःदक्षिणावंतोज्योतिर्मयेलोकेतद्वंतोभवंतीत्य
र्थःअमृतंपुरोडाशादिरूपंतथाचमाद्यःअमृतंनामयत्संतोमंत्रजिह्वेषुजुह्वतिशोभेवमंदरक्षुब्धक्षीरांभोधिव
र्णनेतिसावाएषाऽमृताऽऽहुतिरेवयद्वपाऽऽहुतिरमृताऽऽहुतिरन्याऽऽहुतिरमृताऽऽहुतिराज्याऽऽहुतिरमृताऽऽहुति
रितित्रालणंचप्रतिरंतेप्राप्नुवंतिभूरीपाश्चान्नवस्त्रांभस्तिलसर्पिःप्रतिश्रयान्॥नवेशेकंस्वर्णधुर्यंदत्वा

स्वर्गेमहीयते॥ गृहधान्याभयोपानत्छत्रमाल्यानुलेपनं॥ यानंवस्त्रंप्रियंशय्यांदत्वात्यंतंसुखीभवेदिति
याज्ञवल्क्यादयः तुलाशब्दोऽर्घव्यवहारसाधनेनैकोऽर्थः॥ २३॥ ऋश्विकमाहुरितोमित्रद्रोषस्मरणवशात्स ३
मितोक्षराहृत्तंतिदुरितैस्तालिभिर्हहतिहीनहृतिंभुविमंगलोभवतिपुण्यकृते॥ इतितद्विचित्रचरितेर्मधुरस्तदगा
रंगोमुदितएवरविः॥ २४॥ मंगलोभुविपृथिव्यांदुरितालिभिः अलयोऽश्विकाइत्युक्तंज्योतिःशास्त्रेतथाचा
लिसदृशैरपीडाकरैर्दुरितैःपापैर्हनक्षतिंस्वाश्रयस्यकृतोद्योगंजनंदहतिदुःखयतिपुण्यकृते धर्मकुर्वतेमंगलः
सुखकरोभवतिअत्रमंगलपदस्यादृष्टिः अथवाभवतिभवः शिवःसद्वाचरतिकल्याणरूपोजायतइत्यर्थः
अथवाभवतिसत्तासद्रूपतातदाश्रयः भूसत्तायामितिधातुपाठात्पुण्यकृतइष्टंसाधयतिइत्यर्थःतथा
चोक्तंसमालिंग्यस्वैरंघनेकठिनपीनोन्नतकुचौरमंतेहेमंतेरसिकरमणीभिःसुकृतिनः॥ नयत्रप्रस्वेदोनचयु २८

नात्ब्राह्मणक्षत्रियादीनन्तुंप्रतिग्रहयुद्धादिकर्मसुहंतुंमरणोभवतितदाभागवैः कृतःगृहंशरीरंरक्षितुंदीपदानैःस्वा
नभोज्यादिभिश्चपुण्येरात्मकःसपर्यारतोभवतिधर्मनिरतस्यनरस्यभुवीनांश्रीमतांगेहेजन्मनाप्रतिग्रहयुद्धादिक्रूरं
कर्मविनैवसकलेष्टसिद्धिर्भवतीतिभावः तत्रऋतयःस्मृतयश्चदक्षिणावतामिदमानित्रादक्षिणावतादिवि
सूर्यासः॥ दक्षिणावंतोअमृतंभजंतेदक्षिणावंतःप्रतिरंतआयुरित्याद्याः चित्राविविधानिकर्माणिदक्षिणावतांदक्षि
णावंतइत्यर्थः प्रथमार्थेषष्ठीसूर्यासःसूर्यप्रभाःदक्षिणावंतोज्योतिर्मयेलोकेतद्वंतोभवंतीत्यर्थःअमृतंपुरोडा
शादिरूपंतथाचमाद्यःअमृतंनामयत्संतोमंत्रजिह्वेषुनृचति॥ रोभवमंदरक्षुभितांभोधिवेणेतिसावाएषाऽमृते
नस्यमगच्छत्यविचित्राणियथायोग्यंनानाप्रकाराणिचरितानिकर्माणितेमधुरःस्निग्धोरविःतद्गारगःतस्यमं
गळस्यअगारंगृहंगृहंरश्विकस्तद्रूपतिप्राप्नोतिसःतद्गारगःसन्मुदितएवमासीनांमार्गशीर्षेऽसीतिभग

वद्वचनात् प्रशस्तेमासेमंगलगृहेप्रीतमनाएवासीदित्यर्थः अथाध्यात्मंउपरुध्यमाहमंगलउपरुंतद्विष
येरविरात्मामुदितोभवतिएतत्सुखप्राप्तिः पुण्यकृतएवभवतितदुक्तंउरसिनिपतितानांस्तनेषुधम्मिल्लतानां
मुकुलितनयनानांकिंचिदुन्मीलितानां॥सुरतजनितखेदस्विन्नगंडस्थलीनामधरमधुवधूनांपुण्यवंतःपिबं
तीतितद्विषयस्यसुखदुःखहेतुत्वंश्रुतथाहिसत्यंजनावल्लभेनपक्षपातालोकेषुसर्वत्रापितथ्यमेतत्॥ना
न्यन्मनोहारिनितंबिनीभ्योदुःखैकहेतुर्नचकश्चिदन्यइतिचतुर्थपादस्तुपुण्यवद्विषयःसर्वकाव्यानुराधात्॥इत
रत्सर्वसमानं। दाश्विकुशिश्नयोर्नाशकर्तेकोर्थः ओव्रश्चूछेदनइतिधातुपाठात्वृश्चंश्चथतेरितिनिरुक्तात्व्रश्च
तेर्वधकर्मणात्उक्तंचैतत्संतप्तादरामध्वजाद्यगतिनासम्यक्छितानिर्जलेतुर्यद्वादशावद्वितीयमतिमन्वेकाद २८
शाभरतनी॥साषष्ठीनृपपंचमस्यनवमश्चूःसप्तमीवर्जिताप्राप्तोत्यष्टमवेदनांप्रतिदिनंतूर्णंतृतीयोभवेतिअष्टमवे

वतिरवेदोनिधुवनेत्रियामानक्षामाविरमतिनरामारतिविधावितिकिंचपुण्यकृतब्रह्मचारिणोयोगिनेभवतिएवत्स
र्वसिद्धीःसाधयतीत्यर्थः इत्युक्तप्रकारेणतद्विचित्रचरितैस्तस्यमंगलस्यविचित्राणिफलयथायोग्यंनानाप्रकाराणिव
रितानिकर्माणितैर्मधुरःस्निग्धोरविःतदगारंगःतस्यमंगलस्यश्रृंगारंगृहंदाश्विकस्तद्छछतिप्राप्नोतिसःतद
गारंगःसन्मुदितएवमासानांमार्गशीर्षस्मीतिभगवद्वचनात्प्रशस्तेमासेमंगलगृहेप्रीतमनाएवासीदित्यर्थःअ
थाध्यात्मंउपरुध्यमाहमंगलउपरुंतद्विषयेरविरात्मामुदितोभवतिएतत्सुखप्राप्तिःपुण्यकृतएवभवतितदु
क्तंउरसिनिपतितानांस्तनेषुधम्मिल्लतानांमुकुलितनयनानांकिंचिदुन्मीलितानां॥सुरतजनितखेदस्विन्नगंडस्थ त
लीनामधरमधुवधूनांपुण्यवंतःपिबंतीतितद्विषयस्यसुखदुःखहेतुत्वंश्रुतथाहिसत्यंजनावल्लभेनप
क्षपातालोकेषुसर्वत्रापितथ्यमेतत्॥नान्यन्मनोहारिनितंबिनीभ्योदुःखैकहेतुर्नचकश्चिदन्यइतिचतुर्थपादस्तु

पुण्यवद्दिषयः पूर्वकाव्यानुरोधात्इतरत्सर्वसमानं॥ इश्चिकश्चिभ्योनीश्वकत्वेनैकोर्थःओत्रश्चूछेदनइति
धातुपाठात्शिश्नंश्नथतेरितिनिरुक्तात्श्नथतेर्वधकर्मणात्उक्तंचैतत्संतनादश्नाम्ध्वजाद्यगतिनासंमू
छितानिर्जलेतुर्यदादशावद्वितीयमतिमत्रैकादशाभरत्नी॥साषष्ठीनृपंचमस्यनवमश्चःसप्तमीवर्जिता प
प्राप्तोत्यष्टमवेदनांप्रतिदिनंतूर्णंतृतीयोभवेत्तिअष्टमवेदनांदृश्चिकपीडांअनयेवदिशासंख्यापदेसत्तद्राश
यऊहनीयाः॥ ३५॥ धनुराहसुरगुरोरितिसूर्यस्यशत्रुतयायतरागुरुमित्रग्रहमीस्यात्स्थैर्यमतोद्भुतविलंवि
तंहत्तंसुरगुरोर्ग्रहमेत्यहितसदाकुमुदबंधु निभांरविमास्थितः॥धनुषिसंगमतःकृतवान्मनःपरिभवायरि
पोरिहभास्करः॥ ३६॥भास्करःसूर्यःसदाहितंमलक्ष्मोधनेनपरिणामसुरःखंसुरगुरोर्ग्रहस्यतेर्ग्रहंधनुरत्यप्राप्य २९
कुमुदबंधुनिभांकुमुदबंधुश्चंद्रइवसदृशीजनदर्शनसुखदांरविकांतिमास्थितःप्राप्तःसन्धनुषिसंग

मतःधनुर्धन्वतेर्गतिकर्मणोवधकर्मणोवेतिनिरुक्तात्वधसानेस्यधनुषःसमागमेनेत्यर्थःइहगुरुर्ग्रहस्यैकसंबंधि
ज्ञानमपरसंबंधिस्मारकमितिन्यायात्स्मृतस्यरिपोःशत्रोःपरिभवायपराजयायमनःकृतवान्उद्यक्तोजातइत्य
र्थःइदमत्रबोध्यंजयकामोराजन्योगुरुंसंश्रुत्यगुरुतःप्राप्तशस्त्रःसन्सर्वान्शत्रून्जयतितथाचश्रुतिःसइ
द्राजाप्रतिजन्यानिविश्वाशुषेणतस्थावभिवीर्येण॥ इहस्पतिंयःसुभृतंबिभर्तिवल्गूयतिवंदतेपूर्वभाजं॥ इतिपू
जयतिपूर्वभाजंप्रथमसकलवस्तुभोगार्हंइहस्पतिर्लोकेतुब्राह्मणःपुरोहितःतदुक्तंतत्रैवब्राह्मणेइहस्पतिर्दैवै
देवानांपुरोहितमसमन्यन्मनुष्यराज्ञांपुरोहिताइतिगृह्यसूत्रंचसंग्रामेसमुपोढ्येराजानंसन्नाहयेदितिथा
चराज्ञोलोकेपुरोहिताअपिदानमानेःपूजनीयाएवतेषांलोकप्रवर्तकत्वात्तराज्ञःप्रजापुण्यषष्ठांशराज्ञाहकत्वादि
तिअथाध्यात्मंपायुमाहभास्करआत्मासुरगुरोःसुरादेवाःइंद्रियाण्यत्रदेवाउच्यंतइतिनिरुक्तात्इंद्रियाणि

तेषांपोषकस्यरसनस्यसदाहितंरुचिजनकत्वेनसुखकरं ग्रहंस्यानंतदुक्तंभेषजशास्त्रे कासश्वासज्वरहराविषक्ष
पिप्पलीयुता॥त्रायंतीमधुनालीदाभिंडिनीचाग्निबोधिनीतिभिंडिनीमालानारंवयित्रीतनाग्निबोधिनीक्षुधःकत्रे
तदासर्वेंद्रियाणांपुष्टिर्भवतीतिभावःपायुमेत्यमलशोधनेस्थितेत्यर्थःकुमुदबंधुनिभंकोपार्थिवशरीरेसुदाह
षीविकासोयेषांतेषांयदाकुत्सितावात्यजडविषयासुदायेषांतेषांमुदहर्षइत्यस्माद्धातोःषिद्भिदादिभ्योङःस्त्रि
यांटाबनुशासनात्मुदाशब्दःवह्निभागुरिरल्लोपमवाप्यारुपसर्गयोः॥आपंचैवहलंतानांयथावाचा
निशाकैरितिचचूनाद्धाकुमुदानामिंद्रियाणांबंधुःसहायकेनतत्प्रियकरंमनस्तदुविसदृशीशरीरसुखदांरू
विमास्थितःशरीरपोषणतत्परःसन्घनुषिदृवीक्तनिरुक्ताद्रोगनाशकेपायोसंगमतःमलशोधकत्वेनतत्रा
सक्तत्वात्दुःखशरीरेरिपोःसकलकार्यनाशकस्यरोगस्यपरिभवायनाशायमनःकृतवान्मलक्षोभशांत्यारो ३०

गशांतिर्भवतीतिभावःउक्तंचसर्वेषामेवरोगाणांनिदानंकुपितामलाइतिअतएवलोकेपौषेमलमासइत्युच्यते घनुः
शब्दःपायुशब्दयोर्नाशनपालनाभ्यामेकोर्थःउक्तनिरुक्तात्॥अत्यर्थंतुप्रतिजन्यानिबाह्यविषयसुखानिस्वुषेण
बलेनवीर्येणरेतसाअभितस्तोभुंक्तेयःआरोग्यकामःदृढस्यातिरसनंप्रशस्तत्वेनदृश्यतेसर्वपोषकत्वेनस प्रमाता०
र्वेंद्रियोत्कृष्टंज्ञानातिकीदृशंस्वेभावंइतरेंद्रियपोषकत्वेनप्रयुक्तस्यविषजस्यप्रथमरसग्राहकंशोषमहनीयं॥
॥३९॥मकरमाहअथेवमितिअथशब्दंवरंविंदीस्यभीतोहित्वायत्तदीयायमंदोदद्यावुच्चसंस्था॥सतांप्रेरकःस्नानदा
नादिकार्यं ततस्तद्गृहकोष्ठरश्मिग्रहेशः॥३६॥अथशब्दइतोमरुस्थानंनिशीथोर्द्धसूर्येस्योत्तरायणंचे
तिज्ञापनार्थंःतथाचतःपूर्वकर्कादिषण्मासाःमध्यक्रोर्द्धदक्षिणायनंचेतिज्ञेयंदक्षिणोत्तरअयनेरात्रिर्दिव
साविंतुआगामिरात्रिर्दिवसोसुखत्वामिप्रायेणअथानेतरंमंदःशनिःएवंरिपुनाशपरमनस्करंविंदीस्य

स्वगृहागतं दृष्ट्वा रिपुलाद्भीतः चंचलः सन्नजतएवमकरश्चेदुक्तंज्योतिःशास्त्रेतदीयायतस्य सूर्यस्यासौहि २
तायवक्ष्यमाणप्रकारेणमित्रायमंगलायसूर्यप्रीत्यर्थंमंगलप्रीत्यर्थंवाऽर्घसंस्थोदद्योस्वगृहंमकरमुच्चस्थानंम
तवानित्यर्थः उक्तंचैतज्ज्योतिःशास्त्रेमंगलस्योच्चंमकरइतिकिंचस्नानदानादिकार्यंसूर्यप्रीतिकारणेप्रातःस्नानादि
कर्मणिआदित्याश्चानिलहोमादिमकरस्थरवौमाघेतद्विधानात्।सतांश्रद्दधानानांप्रेरकःप्रवर्तकःनबुद्ध्व
यंकृतवान्यतएवमंदः पापोयुच्यतेततोधर्मप्रवर्तकत्वात्यहेशःसूर्यः तद्गृहंशनिस्थानंमकरेकालरश्मिः
ईषदुष्णास्तिम्मारश्मयःकिरणायस्यसःकोष्ठरश्मिःकर्वंचोष्णइतिसूत्रेवकारणदीषदर्थेकुशब्दस्यकादेशस्ता
दृशःस्थितः अथाध्यात्मंचक्षुराहअथकायवाङ्मनोधनानंतरंएवंरविंसैमानंवीक्ष्यस्वविषयप्रत्यक्षेप्र मा २
ष्टृंदृष्ट्वाआत्मविरुद्धंममविषयंहनिष्यतीतिभीतंमंदोऽल्पप्रकाशकंचक्षुःश्रुतिःस्मृत्यादिपुस्तकदर्शनं २१

नस्नानदानादिकार्यप्रेरकंसत्तदीयायतस्यालनोस्मैहितायोरुवक्ष्यमाणरीत्यासुखकरायघ्राणायोच्चसं पस्त्रगो-
स्थोदद्यौतत्प्रकाशिंचकारत्यर्थः अलौकिकज्ञानजनकवेदादिविचारशीलस्यविदुषःप्राणायामब्रह्मचर्यो
घ्राणोपस्थप्राशस्त्यंभवतीतिभावःउक्तंचैतद्रघुवंशेपथःश्रुतेर्दर्शयितारंरामलीमसामादत्तनपङ्क्ति का
मितितनस्तद्गृह्येक्षविषयेप्रपंचेयहेशःइंद्रियेशआत्माकोष्ठरश्मिरीषदुःखप्रवर्तिर्भवतिधार्मिणांकति
पयकल्याणविषयसान्निध्यात्मकरस्थरश्मेश्चक्षुःप्रकाशकत्वेनेकोर्थःमकरमाज्ञानंतत्करोती
तिव्युत्पत्तेःदोषरात्रित्वात्साधुत्वं॥अथवामास्यास्तीतिमःअर्शआद्यचूमंज्ञानवंतंकरोतीतिमकरशब्द
व्युत्पत्तेः॥३६॥कुंभमाहद्वितीयइतिद्वितीयेगृहेकुंभनाथस्यगत्वाचंप्रकोपंसुतानाहतोऽतः॥समीरणो
रुष्टनदक्षाश्रपत्राःकृताधूलिभिर्धूसरंव्योमजातं॥३७॥यहेशःकुंभनाथस्यशनेर्द्वितीयमकरोत्तरंगृहस्था

नगत्वाकुंभंप्राप्येत्यर्थः सप्तमीतुसमर्थस्यस्यैस्थशाब्दगमनस्यबुद्धिपूर्वकत्वप्रतिपादनायद्वितीयायास्तद्बु
द्धिपूर्वकत्वद्योतकत्वमुक्तंकाव्यप्रकाशेतद्यथालिख्यतेभूमिंविहरवनतःप्राणदयितोनिराहाराःसख्यःसततरुदि
तोज्झननयनाःपरित्यक्तंसर्वंहसितपठितंपंजरशुकेत्वयावस्थेयंविसृजकठिनमानमधुनेत्यत्रभूमिमितिनिरूपा
वितिनेहिबुद्धिपूर्वंकंक्रियतीतिप्रकोपंबहांतंकोघंचकारकृतवान्क्रोधकरणेहेतुःसुतेपुत्रेज्ञानवानहतःपिदृत्व
नापिपूर्वंनदर्शितःअतःकारणात्रुष्टेनक्रुद्धेनसमीरणेनवायुनासमीरमारुतमरुज्जगत्प्राणासमीरणाइत्यमरःद
क्षाअपत्राःकृताःवृक्षजातयउछिन्नपर्णाःसंपादिताइत्यर्थःतदानीद्योमाकाशंधूलिभिरजोभिर्धूसरंमलिनंजातंप्रा
दुर्भूतंअथाध्यात्मंचरणमाहयद्देहाख्यात्मकुंभनाथस्यकुंभिआछादनेकुभीत्येकइतिधातुपाठात्कुंभउपानद्याद्यः छो
चरणस्तस्यनाशःयथोपपत्तिकंचक्षुस्तस्यद्वितीयेगृहेपूर्वज्ञानसाधनंउत्तरंगतिसाधनंतस्मिन्नात्मातत्रैमे ३२

तिसिद्धांतकौमुदी।

णिस्थितेत्यर्थः॥प्रकोपंविशोभंचकारयतःसुतेआत्मजन्येचरणेवाहनाभावादनादृतोप्रीतःनबुचरणस्यात्मजन्य
तेकिंप्रमाणमितिचेत्श्रुतिसर्वेषामिंद्रियाणामात्मजन्यत्वात्तन्मध्यपातिनश्चरणस्याप्यात्मजन्यत्वंतथाचश्रुतं
इंद्रियमिंद्रलिंगमिंद्रदृष्टमिंद्रसृष्टमिंद्रजुष्टमिंद्रदत्तमितिवतिअत्रेंद्रआत्मेतियाज्ञवल्क्यइंद्रियाणिमनःप्राणोज्ञा अ
प्रभवेन्मनोहरमिदंरूपंपुराणोमुनिरिति॥ १॥ ब्रह्मन्ध्ययनस्यनैषसमयस्तूष्णीं बहिस्तीयतांस्वल्पंजल्पवृ
स्पतेजडमतेनैषासभावश्रेणेः॥ वीणांसंहरनारदश्रुतिकथालोपेरलंतुंबुरो सीतारत्नकभल्लभग्नहृदयःस्वस्थो

नलकेश्वरइत्यादिनिंदारूपंयद्वासर्वथानूक्तानमाम्नायमार्गमितियोजनीयं॥एतद्वेषकर्मअस्मिन्प्रवर्तमानेयु
गेकलिकालसमस्तंप्रतिपरसमनुष्योऽक्षणइत्यव्ययीभावेऽचप्रत्यक्षंतथातेनप्रकारेणादृष्टंस्वर्क्षयोग्यंजातंत
थाकर्थमिथ्याव्रतःश्रुतिस्मृत्यविहितविरुद्धाचरणःधर्मलिंगीतिवत्अतएवनीचएज्यःधर्मतत्वमजिज्ञा
सवोनीचास्तेःपूज्यःसक्रियान्वासनस्वादुभोजनस्यूतवचनेमाननीयःपुरुषःद्विजंब्राह्मणंक्षत्रियंवैश्यंद्वे
ष्टिद्विजानांवैदिकेमार्गमात्रवर्तित्वात्द्विजमित्येकवचनंद्विजत्वाभिप्रायेणयज्ञानांतपसामित्यादियाज्ञ
वल्क्यस्मृतेःयद्वाद्विजंब्राह्मणंद्वेष्टीत्येवक्षत्रियवैश्ययोःभ्रुह्योरिदानीमभावात्द्वेषकर्मतुब्राह्मणाइदानीं
लोभग्रस्ताअनियतानारागद्वेषरहिताअर्थयाचमानाःसिरस्फूर्ताहततेजसःसंतिवयंतुनिस्पृहास्वपरिग्रहस्व
भावाःकेवलंलोकानुग्रहार्थमेवदर्शितस्वरूपाःस्मःवैदिकमेत्रास्मत्तोसिध्यंत्येवफलादर्शनात्तंत्रमं

त्रास्मत्तोसिध्यंत्येवप्रत्यक्षफलदर्शनादित्यादिनिंद्यास्वस्मृत्याचजगद्वंचनरूपंअभाध्यात्मंविरुद्धात्मभिःकेव ल
शरीरात्मानिभिर्भोगतत्परैःपूजितःपोषितंकविस्तृकृत्सर्वथानूक्तानमाम्नायमार्गंतपोज्ञानज्ञानात्परमितिश्रुतिः
विषयाविनिवर्तंतेनिराहारस्यदेहिनः॥रसवर्जंरसोप्यस्यपरंदृष्ट्वानिवर्ततइतिस्मृतिःपरंब्रह्मभासकंसच्चिदा
नंदमात्मानंरसोविषयप्रीतिःतद्विहितवर्मास्थितंउपवासपरमित्यर्थः इममित्यंरसनंद्वेष्टिद्वेषकर्मतुस्वपोष
णायमांसादिनिषिद्धभक्षणेप्रवर्तनरूपंउन्नरादैत्यत्रार्थेतत्रद्विजंरसनं॥८७॥सर्वेरितिसर्वैःप्रमाणैर्विदितात्म
तत्वस्यत्रैवसंविष्टमनामनीषी॥तर्कोहि वाग्जालविधातुरस्यव्यर्थश्रमस्येंडुसुतोनमित्रं॥८८॥सर्वैःश्रु
तिस्मृतिपुराणैरबाधितार्थकतेनज्ञातैःविदितात्मतत्वःज्ञातसच्चिदानंदस्वरूपःतत्रैवसच्चिदेकंब्रह्मणिसू
र्यएवतस्यैवपरमार्थत्वात्अन्यस्यतुछत्वात्संविष्टमनाःनियतचित्तःअतएवमनीषीविद्वत्तेनाभिमतःइंदुसु

तोषुधः कृतार्थत्वाभिमानात्तत्तर्कीदिवाग्जालविधातुः तर्कः काणादगौतमतरूपः आदिशब्देनसौगतादिनास्तिक
मतानितेषांवाग्जालंवाचांशब्दानांजालमिववृक्कंजालंसमूहः तस्यविधातुः प्रकाशकस्य व्यर्थश्रमस्य व्यर्थोनिश्च
योजनःश्रमः प्रयत्नायासोयस्मात्तस्यास्य हृदस्थतर्कमित्रंशत्रुर्भवतीत्यर्थः ननुतर्कीदिवाग्जालविधातुः श्रमवैयर्थ्यं
कथमितिचेदुच्यतेशृणुतत्रदृष्टान्तमुदाहियतेतद्यथाप्रतियोग्यदानिश्चधर्मीनप्रयोगितावच्छेदकइतिवितामणिगो
रायंथमवतारयतादीधितिकृतत्सार्वकशिरोमणेरघुनाथकवेर्व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभा
वमादायव्याप्तिलक्षणंतथाहिहेतुतावच्छेदकसंबंधेनयत्समानाधिकरणाःसाध्यतावच्छेदकावच्छिन्नव्या
पकतावच्छेदकप्रतियोगिताकायावंतोभावाः स्वविशिष्टहेत्वधिकरणावच्छेदेनप्रतियोगिसमानाधिकरणा
स्तत्तंव्याप्तिःवह्निमान्धूमादित्यादौहेतुतावच्छेदकसंबंधःसंयोगादिःतेनयत्समानाधिकरणाहेत्वधिक

MEMORIAL

रणपर्वतादिवृत्तयःसाध्यतावच्छेदकंवह्नित्वादितदवच्छिन्नस्यवह्न्यादेर्व्यापकताद्रव्यत्वादिनिष्ठातदवच्छेदिकाप्र
तियोगितायेषांतादृशायावंतोऽभावाः घटत्वेनद्रव्यत्वाभावेनद्रव्यभावादयः तावंतः स्वविशिष्टहेत्वधिकरण
वच्छेदेनतावदभावभावविशिष्टपर्वतादिवच्छेदेनप्रतियोगिसमानाधिकरणाः द्रव्यत्वद्रव्यादयधिकरणवृत्तयः
तत्तंहेतुत्वंधूमादिनिष्ठमितिलक्षणसमन्वयः अथकृत्यानिहेतुतावच्छेदकसंबंधग्रहणादयमात्माज्ञानादि
स्वात्मत्वेसाध्येसमवायेनहेतोर्ज्ञानस्यविषयतयाधिकरणेघटादौवर्तमानस्यात्मत्वेनात्मत्वाभावस्यो
त्मत्वसामानाधिकरण्याभावेपिनक्षतिःसमवायेनज्ञानाधिकरणआत्मनिवर्तमानस्यघटत्वेनात्मत्वाभावस्य
ग्रहणात्एवंसाध्यतेत्यादिग्रंथांतरेपियेनसंबंधेनव्यापकतेनैवसंबंधेनप्रतियोगिसामानाधिकरण्यमितिवि
वक्षणीयंतेनायमात्मामहाकालत्वादित्यादौसमवायेनात्मत्वंसाध्यतेनतादृशात्मत्वाभावस्यापिकालिक

विशेषणतयात्मत्वाधिकरणेमहाकालेसंयोगेनातिप्रसंगः समवायसंबंधेनव्यापकतावच्छेदकप्रतियोगितावच्छेदकस्यात्मत्वेनात्मत्वाभावस्यसमवायसंबंधेनप्रतियोग्यात्मत्वसामानाधिकरण्याभावात्अभावेषुयावत्लोपादानात्मभूतत्वमूर्तत्वोभयवान्मूर्तत्वादित्यादौहित्वावच्छिन्नाभावस्यप्रतियोगिउभयंतत्सामानाधिकरण्येपियावद्तं ...गतियोर्भूतत्वाभावमनोन्यत्वाभावयोराकाशनिष्ठभूतत्वमनोन्यत्वरूपप्रतियोगिसामानाधिकरण्याभावान्नातिप्रसंगः साधनसमानाधिकरणस्यगोत्वाद्यभावस्यतत्साध्यवत्त्वभावस्यचातथात्वाद्वह्निमान्धूमादित्यादावव्याप्तिः तद्वारणायसाध्यतावच्छेदकेत्यादिहत्वधिकरणावच्छेदेनेतिविवक्षणाद्गोमानगोत्वादित्यादौनातिप्रसंगः हेतुमतिप्रलयेगवाद्यभावस्यप्रतियोगिसामानाधिकरण्याभावात्स्वविशिष्टेतिविशेषणात्कपिसंयोगाभाववान्मेयत्वादित्यादौसंयोगाद्यात्मकस्यसाध्याभावस्यस्वविशिष्टहेत्व ९७

धिकरणद्रव्यवृत्तित्वेनप्रतियोगिसामानाधिकारण्यान्नाव्याप्तिरितिनतु धूमवान्वह्नेरित्यादौधूमत्वाद्यवच्छिन्नप्रतियोगिताकधूमाद्यभावस्यधूमवद्वृत्तित्वविशिष्टगोत्वाभावाभावात्मकतयावह्निधूमोभयाभावात्मकतयाचगोत्वाभाववह्निरूपप्रतियोगिसामानाधिकरण्यादतिव्याप्तिरित्याशंक्यसएवाहतीयंलक्षणमूचेतद्व्ययथायत्समानाधिकरणानांसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगितानांयावद्भावानांप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यंतत्वमितिवह्निमान्धूमादित्यादौधूमसमानाधिकरणानांसाध्यतावच्छेदकंवह्नित्वादितद्वच्छिन्नंवह्न्यादितत्सामानाधिकरण्यात्लक्षणसमन्वयः धूमवान्वह्नेरित्यादौनातिव्याप्तिः धूमत्वादिनाताद्दशधूमा

घभावस्यतादृशगोत्वाभाववत्त्वादिरूपप्रतियोगिसामानाधिकरण्येपिप्रतियोगितावच्छेदकं धूमत्वादितदवच्छिन्नधूमादि
सामानाधिकरण्याभावात्प्रतियोगितावच्छेदकावच्छिन्नग्रहणात्तवह्निमान्धूमादित्यादौवह्नित्वादिनाऽऽर्द्रत्वाभावस्ययाव
दंतर्गतस्यहेत्वधिकरणेऽर्द्रत्वप्रतियोगिसामानाधिकरण्येपिनासंभवःप्रतियोगीतावच्छेदकावच्छिन्नवह्न्याद्यसामा
नाधिकरण्यात्पूर्ववदुक्तौतुवह्निमान्धूमादित्यादौवह्निऽर्द्रत्वाभयत्वावच्छिन्नप्रतियोगिताकघटाद्यभावस्यप्रतियो
गितावच्छेदकावच्छिन्नवह्न्यर्द्रत्वाभयसामानाधिकरण्याभावात्तदसंभवःतद्वारणायतादृशव्यापकतावच्छेदकरूपाव
च्छिन्नेतिशेषंपूर्ववद्बोध्यंइयंतर्कविद्याबृहस्पतेरनभिमतेतिवुनाशंकनीयंयद्यपुनरनुभविकोलोकानांस्वरसःवा
ही घटत्वेनपटोनास्तीतिप्रत्ययोनतदातादृशाभावनिवारणेगीर्वाणगुरूणामपिशक्यमितिमंतव्यमितिवदनातार्कि ९८

कशिरोमणिनेवृतर्कविद्यायांबृहस्पत्यभिमतेर्थेननात्रान्येतत्रैवान्यादृशानिव्याप्तिलक्षणानिचकृतानवस्था
नात्एतावत्पदार्थेप्रतिसंधानाभावेपिगोपालादिप्राकृतजनानामपिसकलेष्वसिद्ध्यत्एतद्ग्रंथएवयत्नःइहंतुपंडि
तंमन्याभिप्रायेणाकंवस्कृतस्कचतुर्दशानामपिविद्यानांसदसद्भेदैकतात्पर्येणसार्थकत्वमेवसुविज्ञानंविकितुषजना
यस्यश्वासस्ववचसीपस्पृधाते।।तयोर्यत्सत्यंयतरद्ऋजीयस्तदिन्नोमोवतिहंस्याहसदितिश्रुतेःसुविज्ञानंअबाधितविशेष
ज्ञानंविकितुषावदुभेविकित्वांश्चेतनावानिरुक्तात्पस्पृधातेपरस्परंस्पर्धेतेप्रमाण्येप्रकाशयतःसत्यमबाधितार्थकंतत्रापिऋजी
यःप्रियंतदित्ऋवेदभाष्यमेततदेवनिरुक्तमेतपदृश्यतेण इच्छेदानर्थक्यंसोमःमनोदेवताचंद्रमाःस्मर्यतेअध्यात्मंतुचं
द्रमानुगृहीतंमनःहंत्यासतहंतिअसदितिपदच्छेदःसंहितायांदीर्घपाठःयस्यमनसिचंद्रमोऽनुग्रहोनास्तितस्यमनसि
रावणदुर्योधनयोरिवासदेवतिष्ठतीतिभावःसोगतादिमतानिनोपन्यस्यंतेग्रंथविस्तरभयात्प्रकृतानुपयोगाच्चनवुत

कैविद्यायाःकुत्रोपयोगइतिचेन्नैवंप्रत्यादिदृष्टयारूपादिसामान्याभावेसाध्येपृथिवीत्वादिकंस हेतुरेवेतिवदतातात
र्किकशिरोमणिनातत्त्वज्ञानदृष्ट्यात्मनिसंसाराभावस्योक्तप्रायत्वात्प्रकृतोपयोगात्प्रकृतमनुसरामःगुरुद्वेषोन
र्थहेतुरितितूक्तंप्राक्सोम्यलोकेअथाध्यात्मंइंदुसुतःइंदुर्मनःसच्चिदानंदात्मकरसंप्रतिसुतंअभिषुतंशिथिल
संस्कारंकृतंयेनसःआरुरुक्षुर्योगीअस्यारुद्दृश्ययोगिनोनमित्रंद्वेषंकरोतीत्यर्थः शेषंपूर्ववत्कीदृशस्यास्यतर्की
दिवाग्जालंविधातुःव्यर्थश्रमस्यारुरुक्षुदृष्ट्याथेःपूर्ववत्वरूपतर्कीहिमादिविद्वेदांतादिशास्त्रंतर्कबलं
विनाडरूढेवेदांतविषयेब्रह्मणिबुद्धेरप्रवृत्तेःततद्वाग्जालंयस्मान्नहिमतथाचसूत्रंशास्त्रयोनित्वादितितस्यप्रका
राकस्यातएवविविधाअर्थाविभूतयोयस्मात्सःयद्वाविशिष्टोनित्योर्थस्त्रिविधदुःखात्यंतनिवृत्तिरूपःस्वस्वरूपावा
प्तिरूपोवायस्मात्सःश्रमोयोगाभ्यासरूपोयस्यतस्यविदितात्मतत्वोत्रविदितमात्मतत्वंहरिहरादिदेवतारूपंये २१

ये-

नसःकिंवेंदुसुतःइंदुर्लतात्मकःसोमःसुतःकंड्येनद्राविताननसयजमानःअस्यसर्वसमस्यत्यागिनोनमित्रंकीदृशःविदि
तात्मतत्वःविदितमात्मतत्वंब्राह्मणस्यगृहस्थस्यममयज्ञएवाधिकारःमहायज्ञैश्चयज्ञैश्चब्राह्मीयंक्रियतेतनुरि
तिस्मरणात्एवंभूतंस्वरूपंयेनसःतत्रैवयज्ञएवविद्युर्वेदयज्ञइतिब्राह्मणात्तदाशेषंपूर्ववद्द्वेषकर्मतुवेदकोपदेशान्नि
दरूपंअपरंवाध्यात्मंइंदुसुतःवक्रुर्गीरीत्यत्रोक्तरीत्याश्रोत्रंतद्वाश्रोताअस्यरसनस्यनमित्रंविदितात्मतत्वःविदि
तमात्मतत्वंशरीरपोषणारूपंयेनसःतत्रैवशरीरपोषणएवव्यर्थश्रमस्यविपरीतार्थकश्रमस्यनवाउद्देशःक्षुधमिद्धं
दहुरुताशितमुपगच्छेत्मित्यवृत्तिश्रुतेःमृत्यवोरोगाःशेषंपूर्ववद्द्वेषकर्मतुवेदकोपदेशान्निरोधरूपंतदुक्तंभ
गवतानात्यश्नतस्तुयोगोस्तिनचैकांतमनश्नतइति॥८८॥लग्नेवृश्चेसोर्यीरजोभीतिरजोभियुक्तोबुधआत्मशत्रोः
संसज्जतेतावपिशुक्रमंदौ॥परस्परप्रीतहृदोविलोक्यादृष्टाहितंस्वीयगुणेषुयुक्तं॥८९॥रजोभियुक्तःसत्वतमःप्रव

तीक्ष्णः प्रकृतिगुणैरजस्तेन विशिष्टो बुधः आत्मशत्रोः सर्वदोपास्यत्वेन परप्रेमास्पदत्वेन चात्मा सूर्यः तस्य शत्रू शुक्रमंदौ तयोः कर्मणि तमः कुलपालनरूपे संसज्जते नितरामासक्तो भवति अतः शुक्रमंदयोस्तत्पाल्यपालकत्वेन हितो भवतीति भावः तावपि तमः कुलपालकत्वात् सूर्यवत् शत्रू अपि शुक्रमंदौ भृगुशनी द्विषद्धितं द्विषन्मित्रं चेद्दृष्टं तस्य मित्रं चेद्दृष्टं शुक्रमंदशत्रुसंबन्धित्वेन धर्म्येषु गुणेषु स्वयोः शुक्रमंदयोरिमे गुणाः रजस्तमः प्रवर्तकत्वादयः तेषु सक्तं तत्परं विलोक्य दृष्ट्वा परस्परप्रीतहृदौ अन्योन्यहितकरणान्मित्रे भवतः अयं भावः सर्वेश्वरे सूर्ये स्वशत्रौ विद्यमाने भावयोः परस्परोपकारौ कथं सेत्स्यत इति भीतौ शुक्रमंदौ तादृशसूर्यप्रीतिपात्रं स्वं धर्म्यं हितकारिणं दृष्ट्वा निर्भयौ सन्तौ परस्परोपकारोद्यतवंताविति तत्र शनौ शुक्रोपकारउक्तः ग्रहो ज्ञेति श्लोके शुक्रेऽन्युपकार स्त्वनुपदमेव वक्ष्यते अथाध्यात्मं रजोभ्युक्तो बुधः श्रोता आरुरुक्षुर्योगी चात्मशत्रोरुक्षरीत्या स्वकृचक्षुषा विषयेषु स्वकृचंदनवनितादर्शनमेघनस्पर्शनसेवन १००

रूपेऽक्ष्या चार्यदर्शनोपसर्पणात्तच्चरणस्पर्शनपूजनरूपेषु संसज्जते नितरामुपसर्पणतत्परत्वात्तन्मित्रं भवतीत्यर्थः तावपि आत्मशत्रू अपि शुक्रमंदौ ते अपि स्वकृचक्षुषा द्विषद्धितं वक्ष्यमाणरीत्या द्विषन्मनः तस्य जन्मौषधिमंत्रतपः समाधिजन्यसुरसंपादनेन हितकारिणं स्वीयगुणेषु स्वकृचक्षुषा रेषु स्वर्येषु गुणेषु सक्तं विलोक्य परस्परप्रीतहृदौ अन्योन्यहितकरणादन्योन्यमित्रे स्तः हेतुः पूर्ववत् स्वकृचक्षुषा करस्वशुक्रमूपलं चोक्तलक्षणं चक्षुरुपकारोऽवश्यते ॥ ८९ ॥ तमइतितमः कुलेशुक्रयमौ हितौ स्तस्तस्माद्घीदृग्नतयोर्हितस्त्वे ॥ स्वस्थायने चंचलवासमार्किश्चक्रेत्ततो द्वेष्टि शनिं महीजः ॥ ९० ॥ यतः शुक्रयमौ भृगुशनी तमःकुलेराहोर्वैशेत्पालनेन हितौ स्तः मित्रे भवतः तस्मात्तामसकुलहितकरणात्सवीदृसूर्यचंद्रौ तयोः शुक्रमंदयोर्नीहितस्त्वे हितकरणे नतिष्ठतः स्वतेजसातन्नाशकत्वात्शत्रू स्त इत्यर्थः किंचयतश्चार्किः सूर्यपुत्रः शनिः स्वस्थायने स्वस्वामिकेमकराद्युत्तरायणे चंचलवासंचंचलः चरः मेषराशिः सएववा

सोवसतिगृहमितियावत्तावद्दर्शं चक्रेकृतवान्ततःस्ववसतेःचंचलत्वकरणात्महीजोमंगलःशनिंद्वेष्टिज्ञानेःशत्रु
भवतीत्यर्थःमंगलगृहंमेषराशिश्चेतिज्योतिःशास्त्रप्रसिद्धिःअर्कस्वगृहेणंगृहेचदर्शनेनार्कपूजकस्यमंगलस्याप
कारकरणमयुक्तमितिसूचनायश्रुतोपिपापलंशनेरितिभावःअथाध्यात्मंशुक्रयोलूकचक्षुर्घोतमःकुलेष्वज्ञानक
ल्पितेभूतयामेहितोत्तमःतत्प्रकाशनेनमित्रंभवतःतस्माद्रवींदूआत्ममनसीतयोःलूकचक्षुषोर्हितस्तोतत्कार्यसंपाद
केनस्तःनन्विदंविरुद्धंआत्ममनसीविनालूकचक्षुषोःस्वकार्यसाधनेसामर्थ्याभावादितिचेन्नैवंआत्ममनसोस्तत्त
शानेलूकचक्षुर्विषयस्यसमूलस्योच्छेदसाधकत्वात्अतःशत्रूभवतइत्यर्थःकिंचयतआर्किश्चक्षुःस्वस्यायनेज्ञा
नमार्गेचंचलवासंघ्राणस्यवासःस्थानंनासिकावायुःप्राणःतंचंचलंचक्रेसदागतित्वाच्चंचलएवासीदितिभावःत
थाचश्रुतिःआतेनयातंमनसोजवीयसारथंयंवाजिनंभवश्चक्रुरश्विना॥यस्ययोगेदुहिताजायतेदिवउभेअह्नीसुदि १०१

नेविवस्वतइतिअस्याअर्थःअघ्राणदेवतारूपावश्विनौरूयेतेहेअश्विनौमनसोजवीयसामनोजवीयःवेगवत्तरंअ
वंज्योतिर्निहितंदृशा,येकंमनोजविष्ठंपतयत्स्वंतरितिश्रुत्यंतरात्ततोपिवेगवत्तरेणतेनरथेनघ्राणरूपेणायातमाग
च्छतंनेनंकेनचिदभवऋभुनामकाऋषयःवांयुवयोःघ्राणरूपंरथंक्रीडास्थानंरथारंहतेगतिकर्मणःलिरते
वीस्याद्विपरीतस्यरममाणोस्मिंस्निषत्तीतिवारपतेर्वारसंतेर्वेतिनिरुक्तात्चक्रुःकृतवंतःयुष्मत्साध्ययाघ्राणायामप
राचश्रुतिरितिभावःनन्वस्मत्साध्याकिंफलमितिचेत्तत्रयस्यतियस्यघ्राणरूपस्यरथस्यसाध्ययोगेविनहतिनिरो
धेदिवःद्योतमानस्यहृदयाकाशस्यसकाशात्दुहिताहिताहूरेहिताद्योग्धवीतिनिरुक्तात्परिणामसुखा
नलविद्याजायतेप्रादुर्भवतितदाविवस्वतःसूर्यानुगृहीतस्यात्मनउभेअहनीकर्ममार्गज्ञानमार्गरूपेतथाचश्रु
त्यंतरंअहश्चकृष्णमहरर्जुनंचेतिअत्रनिरुक्तंचअहश्चकृष्णरात्रिःशुक्लंचाहरर्जुनमितिसुदिनेइष्टसाधकेजा

येतइत्यर्थःतथाचजीवन्मुक्तिरित्यध्यात्मंअधिदैवेतुस्पष्टोऽर्थःततःकारणात्महीजोघ्राणंज्ञानंचक्षुर्दृष्टि
द्वेषकर्मतुस्वकीयद्रगत्यावक्रविषयकारीरायुःक्षपणरूपं॥९०॥मांदेतिमांदायनेस्थैर्यमसावद्यप्रतुष्ट
चित्तोऽर्कसुतेशनिश्चुक्रः॥स्वस्यायनेचंचलताविधातूरिपोरपीदोःपरवान्समोऽसि॥९१॥असौसूर्यजःशुक्रः
मांदायनेमकराद्युत्तरायणेस्थैर्येस्थिरगृहत्वंवृषभःशुक्रगृहंस्थिरइतिज्योतिःशास्त्रप्रसिद्धं।तदवाप्यप्रा
प्यार्कसुतेशनोप्रतुष्टचित्तःप्रीतमनाअस्तिशनेर्मित्रंभवतीत्यर्थःअर्कसुत्यहणंशनेःरिपुपुत्रत्वेपिस्वसुरव
कर्तृत्वमात्रपरंअतएवशुक्रःशुभइतिभावःस्वस्यायनेककीदक्षिणायनेचंचलताविधातुःचरगृहत्व
कर्तुःतुलाशुक्रगृहंचरमितिज्योतिःशास्त्रप्रसिद्धंअतोपिरिपोरपीद्दोऽयंइत्यपरवान्तद्देशवासात्स्वफल
जननेतस्यापेक्षणाच्चैतदधीनःअतःसमोऽस्तिशत्रुमित्रभावहीनोभवतीत्यर्थःअथाध्यात्मंअसोआत्मशत्रुःशु

क्रःलक्रमांदायनेज्ञानमार्गेस्थैर्यस्याश्रयत्वंमनःसंयोगाभावेज्ञानसामान्याभावस्यसुषुप्तौदर्शनात्तत्रस्यावश्यकत्वाच्चलत्वमवाप्यप्रतुष्टचित्तःचक्रविषयेप्रीतमनस्कमस्तिलक्रचक्षुषोमित्रंभवतीत्यर्थःप्रीतिकर्मदृक्प्रा
क्रकिंचस्वस्यायनेचांद्रकर्ममार्गेचंचलेदिधातुःग्रहणातिसर्जनव्यापारवशादस्थिरत्वसंपादनेनरिपोरिपोर्दो
र्मनसःपरवान्स्वस्ययथेष्टप्रवृत्तेर्मनोधीनत्वाद्शुक्रःकरःसमोऽसि॥९१॥इदानीसूर्यचंद्रमंगलबुधबृहस्प
तिशुक्रशनीनामध्यात्मेआत्ममनोघ्राणश्रोत्ररसनत्वङ्नेत्राणांमित्रशत्रुसमानत्वप्रयोजकंकर्मस्वगुरु
बुधयोरध्यात्मेआरूढारूढरुक्षोद्विशेषमाह।सुक्रेनेतिसुक्रेनसुंजानजनेनचक्रंप्रतीतिकर्मात्मकमाश्रितांगं॥
एकस्तयोःस्वप्रतिकूलवैरीनेदृग्विधोन्यःसमभावभाजोः॥९२॥प्रतीतिकर्मात्मकंप्रतीतिब्रह्मज्ञानंकर्मश्रुतिस्मृ
तिविहितमनुष्ठानंतेआत्मानोहेतूयस्यतत्चक्रंद्वादशराशिमंडलंयुक्तेनसिद्धयोगेनदृष्टंस्यातिनाआश्रितां

गंआश्रितपूर्वोत्तरधनुर्मकरगृहस्थिताआलंबितमंगंमकरकुंभरूपोंशोयस्यतत्तथायुंजानजनेनयुंजानोयोगसा
धकोजनोलोकोयस्मात्तेनयुंजानवरेणाबुधेनाश्रितपूर्वोत्तरमिथुनकन्यागृहस्थिताआलंबितमंगंककर्कसिंहरूपोंशो
यस्यतत्तथादृशंभवतिकिंचसमभावभाजोःसमःसूर्यःतत्रभावंरतिंभजतःमित्रसेवकत्वाभ्यांसेवेतेतोतयो
गुरुंबुधयोर्मध्येएकोबुधःस्वप्रतिकूलवैरीस्वप्रतिकूलोनिजोभिमतकर्तृत्वेनाभिमतोगुरुर्भोमोतयोर्वैरीशत्रुर्भ न ८
वतिअन्योगुरुःईदृग्विधःईदृक्स्वप्रतिकूलवैरित्वरूपाविधाप्रकारोयस्यसःनतादृशोऽनभवतीत्यर्थःसर्वोत्तमत्वा
त्अथाध्यात्मंप्रतीतिकर्मात्मकंसंसाररूपंचक्रंयुक्तिनारूढनयुंजानजनेनारुरुक्षुणालोकेनाश्रितेअंगेज्ञानक
र्मात्मकेयस्यतादृशंभवतियुंजानजनेनेत्यत्रजनयरूपंयुंजानानांवक्ष्यमाणप्रतिपादनार्थंयुक्तस्तु काश्चिद्भवतिदूरो
हणंरोहतिस्वर्गंवैलोकोदूरोहणंस्वर्गमेवतल्लोकंरोहतियएवंवेदयदेवदूरोहणं३अमोवैदूरोहायोसोतपतिक ९०२

श्चिद्ब्राह्मत्रगच्छतिसयद्दूरोहरोहतीतिब्राह्मणात्मनुष्याणांसहस्त्रेषुकश्चिद्यतीतिसिद्धये॥यततामपिसिद्धानांकश्चिन्
मांवेत्तितत्वतइतिभगवद्वचनाच्चकिंचसमभावभाजोःसमभावात्तस्यभावंसच्चिदानंदात्मकत्वंभजतःज्ञानकर्मभ्यांसेवे
तोतयोरारुरुक्षोरुरुक्षोर्मध्येएकःआरुरुक्षुःस्वप्रतिकूलवैरीस्वप्रतिकूलनिरसनपायुघ्राणोपस्थानितेषांवैरीनियमन
कर्तान्यआरूढःईदृग्विधान भवतिसिद्धयोगलाद्दूरोहोभयत्राधैकमात्रज्ञाद्यकमस्यक्तोभवतिअग्निहोत्रंजुहो
ति यवागूंपचतीतिवत्तत्रआत्माऽरेद्रष्टव्यःश्रोतव्यामंतव्यानिदिध्यासितव्यइतिवच्चदृत्तानुरोधात्॥९२॥पूर्वोक्तं
प्रपंचयतितमइतितमोन्वितागारपतिस्तथोक्तोसुंजानइंदोस्तनयोपरस्तः।युक्तस्तथोनतिविचार्यमान्यंसुरेड्यंज्यं
गुरुमाश्रयामः॥९३॥ईदोस्तनयोबुधःतमोन्वितागारपतिःतमिराडुस्तनान्वितसंबंधेतडुग्रहरूपेअंगारमिथुनकन्य
तयोःपतिःस्वामीभवतिअतएवतेशक्तःतेनप्रकारेणकथितःतथाकथंयुंजानःयोगसाधकइतिअपरस्तद्दृहस्पतिस्त

थानतमोन्वितागारपतिर्नभवतिश्रेतोयुक्तःसिद्धयोगइत्युक्तः इतिविचार्यविशेषेणज्ञात्वामान्यंबुधस्यापिगुरुत्वात्पूज
नीयंबृहलोकेपुरोहितरूपेणसर्वेषामन्नदानादिभिःसेव्यंसुरेंद्रपूज्यंपरलोकेबृहस्पतिरूपेणदेवेशास्यसर्वत्रकारेण
माननीयंतदुक्तंआलस्येणबृहस्पतिर्हिदेवानांपुरोहितस्तथान्येमनुष्यराजांपुरोहितातेमनुष्यराजामितिमनुष्यारा
जायेषांतेषांमनुष्यराजामितिषष्ठ्रीहिगुरुमाश्रयामःज्ञानप्राप्तयेबृहस्पतिंसेवामहेअथाध्यात्मंइंद्रोमनसस्त
नयःस्वास्थ्यकरणेनापत्यतुल्यआरुरुक्षोर्योगीयज्ञकर्तीचतमोन्वितागारपतिःसोम्यत्वमालक्ष्यति श्लोकबृ
योक्तरीत्याअज्ञानविषयपालकोभवतिअतएवसयुंजानइत्युक्तःअपरस्यआरूढोयोगीतथानअज्ञानविषयपा
लकोनभवतिअतएवयुक्तइत्युक्तःइतिविचार्यमान्यंआरुरुक्षोरपिज्ञानप्राप्तयेसेव्यंतंडूप्रणिपातेनपरिप्रश्नेनसे द्व
वया॥उपदेक्ष्यंतितेज्ञानंज्ञानिनस्तत्त्वदर्शिनइतिभगवदुपदेशात्सुरेंद्रपूज्यंअणिमादिभिःस्वाराजोपिमाननीयं १०४

उरुंसर्वापदेहारमाश्रयामः॥९३॥किंचयुक्तेतिस्त्रग्विणीवृत्तंजगतीत्यधिकोरस्त्रग्विणीरहतिलक्षणात्
चत्वारोरगणाइत्यर्थःयुक्तयुंजानयोःसाम्यभाजोस्तयोमित्रवर्यसदामित्रमाङ्कुर्मुदा॥चक्रिणीयोक्तच
क्रेणचक्राधिपंतंनमस्यार्इंदोर्हरेरंजनं॥९४॥मित्रंसूर्यसाम्यभाजोःसूर्यप्रीतयेरागद्वेषाभावतोयुक्तयुं
जानयोःतत्त्वेनाभिमतयोर्गुरुबुधयोःसदानिरंतरंमुदाहर्षपामित्रवर्यंहितकारिश्रेष्ठमाङ्कुर्वंतिज्योतिर्वि
दःनचात्रपुनरुक्तिदोषःसूर्यस्येताहशगुणवद्धितकारित्वज्ञापनेनाप्ययौक्तनबुधस्यगुरुभौमवैरित्वात्क
थंसाम्यभाक्कमितिचेत्शृणुसूर्यसेवासमयेसूर्यानुग्रहाज्जसिंहेतबुधस्यसाम्यभाक्कमितिहरेर्निजम
नोरूपस्यदोश्चंद्रमसोरंजनंप्रकाशकंतमतावतायंथेनोक्तप्रभावंनमःसायंप्रातर्हविर्भिस्तोषयामःनि त्यं स्यामः
दुषुअन्ननामसुनमःशब्दस्यपाठःनमोवारिवश्चित्रइतिवयंजितिसूत्रेकरणइतिवर्तमानेनमःशब्दाक्रियावि

शेषक्षयत्वयद्दानमस्कुर्मः की दृशंप्रोक्तचक्रेणचक्रिणंधान्येनधनवानितिवद्भेदेतृतीयाप्रकृत्यादिभिरुपसं
रव्यानमिति वार्तिकात्प्रकर्षेणोक्तं द्वितीयोपदेशेवर्णितं द्वादशराशिमंडलंतदभिन्नंशिशुमारनामकंकाल
चक्रंतदंतंचक्राधिपंद्वादशराशिमंडलप्रवर्तकंयश्चाघटारूपवानपिरूपांतरोत्पादनेऽसमर्थः कुलालपरतं
त्वात्तथास्यैनभवतीतिभावः ननुभीषास्माद्वातः पवेतभीषोदेतिसूर्यः भीषास्मादग्निश्चेंद्रश्चमृत्युर्धावति
पंचमइतीतिश्रुत्यापरतंत्रत्वज्ञापनात्कथंसूर्यस्यस्वातंत्र्यमितिचेत्भ्रमुक्तेतरानंदप्रवाहसामान्यात्तात्पर्यनतुस्व
तंत्रस्यसूर्यस्यपरतंत्रत्वेऽत्रदंडोध्यसुदर्शनंविष्णुचक्रमसुरनाशार्थंप्रादुर्भूतमितिपुराणप्रसिद्धंतदित्थं
विष्णुःसूर्यःतस्यदंद्वादशारंचक्रंसुदर्शनंभवतिसुधियांसुखज्ञानत्वात्तत्परिवर्तनेनपलघटीप्रहर १०५
दिवसादिरूपेणदेहाभिमानिनोऽसुराःतेषामायुःक्षयस्यजनकलाद्येतिप्रत्यक्षसिद्धमितिअथाध्यात्मं

मित्रमात्मानंसाम्यभाजोर्युक्तमुंजानयोस्तयोःएकश्लोकोक्तस्वरूपयोःसदामुदामित्रवर्यअनर्थनिवारणएवकमि
एकृतमाकुरात्मविदःकीदृशंप्रोक्तचक्रेणबुद्धिमनादशेंद्रियरूपेणसंसारेणचक्रिणंसंसारिणंचक्राधिपंबुध्यादि
प्रवर्तकंइंदोरिंदुसदृशस्यशरणंप्राप्तस्यहृदोरंजनंचैतन्यसंपादकंतदुभयत्रोक्तभावार्थःस्तोष्यभक्तयाविछुमनादिंज
गद्धादियस्मिन्नेतत्संसृतिचक्रंभ्रमतीत्थं॥ यस्मिन्नदृष्टेनश्यतितत्संसृतिचक्रंतंसंसारध्वांतविनाशंहरिमीडइतिह
रिःसूर्यआत्मावा॥ २५॥आत्मसूर्यसदास्मभ्यंतवप्रीतिर्विवृद्धये॥कर्मतत्परिवित्तेभ्यइषंस्तोतृभ्यआभर॥ ६॥ ॥ ॥
॥इतिश्रीकालोपनामहितामिविश्वनाथभट्टालजगोविंददीक्षितकृतआत्मार्कबोधमित्रशत्रुभावकथनंनामचतुर्थ
उपदेशः॥ ४॥ ॥इतिश्रुत्वाचंद्रादिरेवटाःषडपिप्रभूताग्नेःस्फुलिंगाइवतिग्मरश्मेरित्यत्रोक्तउपमानेऽग्नो
स्फुलिंगानांतद्रूपत्वमन्यत्रपक्षिनानामन्यरूपत्वंचदृष्ट्वोपमेयेसंदिहानःशिष्योणुरुंपृच्छतिआत्मभोनारितिआत्म

भानोर्यहाएतेभिन्नाबोधेनेतिसंशयं॥छिंधिशिष्यस्यमेतातश्रोतुमात्माप्रसीदति॥९५॥हेतातहेकृत्सलतवशिष्यस्य
संबंधोक्तिरवश्यवक्तव्यतार्थोमेममात्मभानोरेतेमनश्चेंद्रादयोभिन्नावाअभिन्नोबोधेतिसंशयंसदेहंछिंधितत्प्रापक
दृशाननाशयममांतःकरणंश्रोतुंतववचनंगृहीत्वाप्रसीदतितुष्यतिअन्यथासुखंनालिसंशायात्माविनश्यतीतिभ
गवद्वचनात्॥९५॥इतिदृष्ट्वागुरुःशिष्यमाहसंसारेतिसंसाररात्रेःश्रृणुजीवतारात्मस्याभवोबंधनतमोन्विताया:॥
विद्योषसाकेवलआत्मभानूरजोविनाशेसततंप्रसन्नः॥९६॥हेतातत्वमधिकारीश्रृणुसमाहितमनाआकर्णय
किंतादितित्वाहसंसाररात्रोसंसारसदृश्यामनेकभयदायीतमस्विन्यांसत्यांजीवतारात्रीवाःजीवाःशरीरिणस्तत्सद्दृ
श्यःस्थूलसूक्ष्ममध्यात्मारानक्षत्राद्यःसंतितमोविद्याया:तर्मोधकारस्तेनाविद्यायुक्तायोगोहेतुहेतुमद्भावः
तथाचतमोहेतुःरात्रिहेतुमतीतस्याःसंसाररात्रेरभावनास्तिवनसंतिवतथावान्वयव्यतिरेकाभ्यांतमःकल्पि

तरात्रिकल्पितोइतिभावः किंचात्मभानुरात्मसदृशःसर्वप्रियःसूर्यःविद्योषसातलज्ञानसदृश्यात्मोविनाशिन्योष
साऽपि कालेनकेवलःनिर्मलोस्तिउदेतसूर्यरजोविनाशेरजःपार्थिवरेणुः नहंसेसतिसततंप्रसन्नःलोकानांप्री
तिवर्द्धनोभवतीत्यर्थः इदंमध्यमलोकदृष्ट्वोक्तंततोधोलोकेतुसर्वदारात्रिरेवतत्रतमसः स्थेयीसूर्यदर्शनाभावा
त्तदुर्ध्वलोकेतुसर्वदादिवसएवसर्वदासूर्यदर्शनात्यन्मानुषंवर्षतद्दिव्यमहोरात्रमितितुमध्यमलोकाभिप्रायेण
वमर्वादिः सर्वोपरिभूभागोमध्यमलोकएवअधोलोकस्तुतद्विलंपातालनामकंभवतिऊर्ध्वः स्वर्गलोकोज्योतिर्मि
यः सर्वदासूर्यप्रकाशात्तेयेज्ञानिनःसत्संज्ञानमनंतंब्रह्मसत्कपासनेनेतत्रगछंतितत्रभूचक्षुषानाभावात्सर्वदासूर्यप
श्यंतिदुःखरहिताश्चभवंतिकर्मिणांतुचेदमः पर्यंतमेवगमनंतत्रभूछायासंबंधसंभवात्कदाचित्सूर्यदर्शना
भावोपिदुःखायैभवोपिनतःपतनमयपीतिबोध्यं॥अथाध्यात्मंसंसार रात्रौरात्रिसदृक्षेसंसारेसतिजीवतारा

MEMORIAL

तारासदृशाःजीवाःसंतितमोन्वितायाःतमोऽज्ञानंतेनकल्पितायास्तस्याःसंसाररात्रेरभावेनसंतिप्रतिजीवंबुद्धिमनइं
द्रियाणांनियतत्वात्तेषामज्ञानकल्पितसंसारकल्पितत्वंसिद्धमितिभावः किंचात्मभानुःभानुसदृशःप्रकाशमानआ
त्माविद्याघसाऽघःसदृश्यामोहनाशिन्यविद्यायातत्कार्यजीवनाशरजःशब्देनमध्यवर्तिवाचकेनश्लेषेणरस
त्तमसोरपिग्रहणेनमायालक्ष्यतेतथारजःसत्वरजस्तमोमयीमायातस्यानाशादिशेषेणध्वंसेसतितत्तोनिरं
तरंकेवलःद्वितीयरहितःप्रसन्नःसच्चिदानंदरूपआविर्भवतीत्यर्थः तथाचतत्विद्यायाश्चज्ञाननाशएवउपयोगःन
ह्यात्मप्रकाशेनतस्यसर्वदास्वयंप्रकाशमानत्वात् तदुक्तंकलव्याप्यत्वमेवास्यशास्त्रस्यसिद्धिर्निवारितं॥ अत्रलएवज्ञान
नाशायदृतिन्यासिरपेक्षितातिइदमत्रबोध्यं॥सत्वगुणातारतम्येनात्मप्रकाशतारतम्यं तथासत्वरजस्तमो गुणा
तिशयवशादेवोर्ध्वमध्याधोलोकेषुदेवमर्त्यसुरेषुजन्मेतिइतरद्दृतिदिशावसेयं॥२६॥नन्वस्तिव्यात्मभानोम ७७

नश्चंद्रस्यदर्शनात्कथंतस्यासहायत्वमित्यपेक्षायामाहअंतिकइतिअंतिकेसवितृमंडलंविधुःप्राप्यतत्प्रविशतीतिदर्शी
ने॥कोविदोवदति कोमहीतलेकेवलेसवितरितिद्वितीयकं॥९७॥विधुश्चंद्रइअंतिकेसमीपेसवितृमंडलंसूर्यबिंबं
स्वर्गीप्रगत्याप्राप्यतत्सवितृमंडलंप्रविशतितत्रलीनोभवतीत्यर्थः इतिदर्शनेइत्थंसाक्षात्कारसतिमहीतलेभूत
लेस्थितःकःकोविदःपंडितःकेवलेएकाकिनिसवितरिदृष्टेसतिद्वितीयकंचंद्रादिकंवदतिकथयतिनकोपिकोविदइ
त्यर्थः अत्रमहीतलग्रहणात्भूत्यानांमर्त्यलोकानांतथादर्शनंनान्येषांतत्राधोलोकानांसूर्यादिग्रहनक्षत्रादर्शनमे
वमुर्ध्वलोकानांतुसत्यपिदर्शनेसूर्यचंद्रप्रवेशादर्शनात्महत्तोंतरादित्यऊर्ध्वंभवतिकोविदग्रहणंसकलदृसाधनमोलि
भूतसूर्याराधनेकोविदस्यैवप्रीतिःपतंगमकूजमित्यादिश्रुतेःनेतरस्ययोवृतुष्यतिसएवकोविदइत्यर्थपरं अथाध्यात्मंवि
धुर्मनःअंतिकेधारणाध्यानसमाधिसमयेसवितृमंडलमात्मस्वरूपंप्राप्यतत्प्रविशतितदानिर्विकल्पंसमाधिःज्ञा

तज्ज्ञानज्ञेयभेदःपरेनात्मनिविद्यतइत्युक्तः इतिदर्शनेज्ञानेसतिमहीतलेआरूढयोगिदेहेस्थितःआरूढोयोगीत्यर्थः
फःकोविदःसमाहितःद्वितीयकमात्मभिन्नंवदतिनकोपिसमाहितइत्यर्थः सर्वगंसच्चिदात्मानंज्ञानचक्षुर्निरीक्षते त
अज्ञानचक्षुर्नपश्यतभास्वंतंभानुमंधवस्थितंवनात्असतारात्मनोन्येषांभावानांतत्कृताभिदा॥गतयोहेतवश्चास्य
रूपास्वमदृशोयथेतिभागवताच्च॥९॥संप्रतिसंसारेशिष्यमुद्बुजयन्आत्माकाराधनेप्रवर्तयंश्चाहचोरोपमामि
तिचोरोपमांवेदविदोवदंतिभ्रमत्संसारनिशाचरेषु॥तस्माद्दृनज्ञानगतात्मसूर्यावाल्यादिसंध्यासुरक्षाभजतं॥
॥९८॥वेदविदः वेदःअपत्येतायवोयथानक्षत्रार्थंस्तुभिः॥सूरायविश्वचक्षसइतितस्यार्थःयथायेनप्रकारेणअ
पत्येयामादिस्थानेघनुभूताःप्रकाशसमयेलयशीलाश्चतायवश्चोराःचतुर्दशसंननामसुतायुशब्दस्यपाठात्
अक्तुभिःअंजनंकज्जलंतद्वत्तमःप्रवर्तयंतिताअक्तवःनामस्योरात्रयःत्रयोविंशतिरात्रिनामसुअक्तुशब्दस्यपाठात्

नाभिःसहस्रेःप्रधानइतितृतीयात्रसहस्रशब्दयोगंविनापिभवतिरुद्रोसूनृतिनिर्देशात्सहस्रशब्दार्थोविद्यमानत्वं
एकेनापिसुपुत्रेणसिंहीस्वपितिनिर्भयं॥सहैवदशभिःपुत्रैर्भरंवहतिगर्दभी तिवत्सहैवदशभिःपुत्रैःविद्यमानेघ
वदशभिसुपुत्रेष्वित्यर्थः यैर्गछंतितेनप्रकोरणानक्षत्रान्नक्षत्राणिविश्वचक्षसंजगद्दर्शनेसुंरायसूर्यायसूर्यसुदृश्ये
त्यर्थःअस्मत्तेजोपंसूर्यहरिष्यतीतिभयात्अक्तुभिर्यंतिध्यात्मेत्यर्थस्तत्रैवस्फुरीभविष्यतितंविदंतिजानंतितेश्रु
त्यर्थज्ञाःश्रमस्सुकालचक्रवशात्गतिमत्तोरोपविषयेषुनक्षत्रेषुचोरोपमांचोराणांप्रच्छन्नहारिणामुपमांतद्वे
दंसतिसादृश्यवदंतिएकधर्मकत्वंकथयंतितत्रत्वयाद्विजितव्यमितिभावःननुतद्भिन्नत्वेसतितद्गतोधर्म
वत्समितिहिंसादृश्यंचंद्रवन्मुखमितिसादोप्रसिद्धंतथाचतत्रैवोपमासिद्धोसाधर्म्यमुपमाभेददृष्टेरुपमालक्ष
णेभेदयहणेव्यर्थंनतुतेनानन्वयालंकारव्याहृतिःफलंअनन्वयालंकारेतांदृशसादृश्याभावाद्दितिचेन्नैवंत

कृतभूयोधर्मवत्त्वमित्येवसादृश्यलक्षणेतात्पर्यीतत्रतत्रउपमायत्रसादृश्यलक्ष्मीरुल्लसतिहृद्योः॥ इत्यत्राप्यदीक्षि
तैःसादृश्यलक्ष्मीरित्यत्रनतुसादृश्यमात्रंतथाचात्रत्वयेदुरिदुरिवश्रीमानित्यादौत्वस्यत्वेन सादृश्यंनान्वेतीतिव्यु
त्पत्तेरितितद्ग्रंथस्यापित्वत्स्मिन्त्वसादृश्यसत्वेपिचमत्कारिसादृश्यंनान्वेतीत्यर्थेतात्पर्यमितिप्रतिभातिअ
नन्वयालंकारचमत्काररूपउपमानांतरव्यवच्छेदमादायेवनतुसादृश्यमादायेतिमंतव्यंएतेनकाव्यप्रकाशकुवल
यानंदौव्याख्यातौतस्मात्सौरोपमाविषयत्वनिरूपितहेतोःलंश्रुतवान्बाल्यादिसंध्यासुबाल्यंशिशुलंआदिशा
ब्दनयौवनंवाईक्षंचतत्सदृश्यःसंध्याःप्रातर्मध्यसायंकालरूपास्तासुदिनज्ञानगतात्मसूर्यज्ञानसदृशंप्रकाश
कंदिनंसूर्यदृशेनयोग्यकालःतत्रगतःप्राप्तःआत्मसदृशःप्रियःसूर्यःतंऋचासावित्र्यागायत्र्या तत्सवितुर्वरे
ण्यंभर्गोदेवस्यधीमहिधियोयोनःप्रचोदयादितिरूपयाभजप्रीतिंजनयकार्यःस्तुतःक्षत्रियवैश्ययोपासकसा १११

त्या-

वित्र्यादिष्टुभातथाजगत्येतिव्याख्येयंअथाध्यात्मंवेदविदःऊचुरीश्रुतिज्ञाःअमत्सुमन्मनोवैविषयेणसुखंममा
नेनविषयेणसुखमितिबुध्याइतस्ततःप्रवर्तमानेषुसंसारनिशाचरेषुनिशासदृशेसंसारेप्राप्तेसुजीवेषुचौ
रोपमांअनात्मनामायाकल्पितत्वात्अनात्मीयानांविषयाणांमात्मीयत्वेनस्वीकरणात्वदंतितस्मात्संध्यासदृश्यः
बाल्याद्यवस्थास्तासुदिनज्ञानगतात्मसूर्यदिनसदृशंसकलभयनाशकंज्ञानंतत्प्रज्ञानंतत्रगतःसूर्यसदृशःप्रका
शकआत्मातस्माभजसेवस्वअत्रसंध्यासुकेचेत्यत्रऋत्यकइतिप्रकृतिभावःअत्रेदंबोध्यंयथासूत्रेदेशानिबंधनेनि
संध्यभवतितत्रअस्तसूर्यबालादित्यवहारोभवतिवस्तुतस्तुयथातत्रविद्यांसूर्यसंध्याद्यभावःउदयाद्यभावात्तथात्मनि
बाल्याद्यभावःजन्माद्यभावात्ततथाचयथासूर्यश्चाद्युपाधिरहितस्तथातथात्मनिदेहाद्युपाधिरहितस्तमितितथाच
श्रद्दधानामनस्विदामर्कस्यांतर्यामित्वेनभजनमुपाधिनिरसनार्थमितिसिद्धंतादृशभजनप्रकारस्तुतौ हृद्दा

रण्यकेतद्यथाभूमिरंत रिक्षंद्यौरितिअष्टावक्षराण्यष्टाक्षरएहवाएकंगायत्र्यैपदमेतदुहास्माएतत्सयावद्देषुलो
केषुतावद्धजयतियोस्याएतदेवंपदंवेद॥१॥ऋचोयजूंषिसामानीतिअष्टावक्षराण्येष्टाक्षरेहवाएकंगायत्र्यैपद
मेतदुहैवास्याएतत्सयावतीयंत्रयीविद्यातावद्धजयतियोस्याएतदेवंपदंवेद॥२॥प्राणोपानोव्यानइतिअष्टावक्षरा
ण्येष्टाक्षरंहवाएकंगायत्र्यैपदमेतदुहैवास्याएतत्सयावदिदंप्राणितावद्धजयतियोस्याएतदेवंपदंवेद॥३॥अथा
स्याएतदेवतुरीयंदर्शतंपदंपरोरजायएषतपतियदेवचतुर्थंतत्तुरीयंदर्शतंपदमितिदद्दशाइवह्येषपरोरजाइति
सर्वमुहैवैषउपर्युपरितपतियंहैवंविच्छ्रियायशसातपतियोस्याएतदेवंपदंवेद॥४॥

सैषागायत्रीएतस्मिंस्तुरीयंदर्शतंपदंपरोरजसिप्रतिष्ठितातद्वैतत्सत्येप्रतिष्ठितावक्षुर्वैसत्यंचक्षुर्हि ११०

वैसत्यंतस्माद्यदिदानींद्वौविवदमानावेयानामहमद्राक्षमहमश्रौषमितियएवब्रूयादहमद्राक्षमितितस्माएवत्रदधा
म॥५॥तद्वैतत्सत्यंबलेप्रतिष्ठितंप्राणोवैबलंतत्प्राणेप्रतिष्ठितंतस्मादाहुर्बलंसत्यादेयज्ञीयइत्येवचैषागायत्र्यध्या
त्मंप्रतिष्ठिता॥६॥साहैषागयांस्तत्रेप्राणावैगयास्तत्प्राणांस्तत्रेतद्यद्गयांस्तत्रेतस्माद्गायत्रीनामसयामेवाभूमचा
हैषैवसासयस्माअन्नाद्यतस्यप्राणांस्त्रायते॥७॥तांहैकेसावित्रीमनुष्यभमचाहुःवागनुष्टुबेतद्वावमनुष्यमशति
नतथाकुर्याद्गायत्रीमेवानुब्रूयाद्यदिहवाअपिबह्विवप्रतिगृह्णातिनहैवतद्गायत्र्याएकंचनपदंप्रति॥८॥सेयंइमां
स्त्रीलोकान्पूर्णान्प्रतिगृह्णीयात्सोस्यैतद्द्वितीयंपदमाप्नुयादथयावदिदंप्राणियस्तावत्प्रतिगृह्णीयात्सोस्या
एतत्तृतीयंपदमाप्नुयादथास्याएतदेवतुरीयंदर्शतंपदंपरोरजायएषतपतिनैवकेनचनाप्यंकुतएतावत्प्रतिगृह्णीयात्।
॥९॥तस्याउपस्थानंगायत्र्यस्यैकपदीद्विपदीचतुष्पदीपदसिनहिपद्यसेनमस्तेतुरीयायदर्शतायपदायपरोरजसे
×एतत्प्रथमंपदमाप्नुयादथयावतीपैत्रयीविद्यायत्तावत्प्रतिगृह्णीयात्सोस्या×२

सावदोमाप्रापदितियंद्विद्यादसावस्मैकामोमासमद्भूतिवानहैवास्मेसकामःसमृध्यतेयस्मादेवमुपतिष्ठतेतस्मादप्रापमितिवा॥९०॥एतद्वैतज्ज्ञानकोवेदेहःबुडिलमाश्वतराश्विमुवाचयन्नुहोतक्षायत्रीविद्ब्रूथाःअथकथंहस्तीभूतोवहसीतिमुखंह्यस्याःसम्राण्नविदांचकारेतिहोवाच॥९१॥तस्याअग्निरेवमुखं ... यदिहवाअपिवह्निवाग्नोक्ष्यन्दधतिसर्वमेवतत्सदृक्षमेवंहैवंविद्यद्यपिबह्निवपापंकरोतिसर्वमेवतत्संप्यायभुङ्क्तःपूतोऽजरोऽमृतःसंभवति॥॥९२॥ब्राह्मणंपंचमोध्यायः॥ ॥अस्यार्थःभूमिरंतरिक्षंद्यौरित्याक्षराणिपादःइत्यादिपूरणइतिच्छंदःसूत्रात्मकंगायत्र्या अष्टाक्षरंगायत्र्याःषष्ठंयर्थचतुर्थंप्रथमंपदंयोब्राह्मणोवेनिसब्राह्मणोभूम्यंतरिक्षद्युस्थानेषुयज्ज्ञातव्यंतत्सर्वंनिश्चितंजयतिहवैनिपातोप्रसिद्धार्थकोएवमुत्तरत्रप्राणःपानोवियानइत्यूहेःप्राणिजीवजातैरोषंस्पष्टंअथशब्दःत्रयाणांपदानांशब्दात्मकत्वंचतुर्थस्यार्थात्मकत्वमितिद्योतनार्थंअस्याःगायत्र्याएतदेवार्थात्मकमेवनतुशब्दात्मकंतुरीयं ९९

चतुर्थदर्शनंदर्शनयोग्यंपदंप्राप्तव्यंकिंतदर्थात्मकमित्याहपरोरजाःरजोमायाततःपरःतद्संबद्धःस्वयंप्रकाशात्परश्चस्यपूर्वनिपातःआदंतताचात्रैवनिपात्यतेसकःपरोरजाइतितत्राहयइतियःएषःदृष्टिगोचरःसचतुर्थपदप्रकाशतेचतुर्थत्वेनप्रसिद्धंपरमंपुनरावृत्तिकारणंपदंयत्तत्तुरीयंदर्शीतंपदंतत्साक्षात्कारेणतदात्मकंभवतीतिभावःननुससर्वैःप्रत्यहंसाक्षात्क्रियतेकुतोनतथातदात्मकत्वमितिचेत्तत्राहदृदृशेवेतिप्रत्यंदृष्टइवननुदृष्टःदियस्मादेषःसूर्यःपरोरजाःअतइंद्रियग्राह्यानभवतीत्यर्थःनचात्रपूर्वापरविरोधःपरोरजस्त्वेनसंवितःसूर्यःपरोरजःपदंप्राप्यतीत्यर्थतात्पर्यात्तद्दहलोकअर्थात्मकगायत्रीचतुर्थपदज्ञानफलमाहसर्वमितियथैषःसूर्यःहियस्मात्सर्वभूप्रेरकोऽवितर्कउपर्युपरिउपरिसमीपंद्वातपतितापंहरतिनचात्रनीसायांद्विर्वचनंऽपर्यध्यसःधेसामीत्यइतिसूत्रात्तल्लक्षणाप्रतिपदोक्तयोःप्रतिपदाक्षस्यैवग्रहणात्अत्रेदंवोध्यंयथासाकंमध्याह्नेसूर्येऽपरि

समीपदेशस्थत्वात्तापकर्तीप्रकाशकर्तीचभवतितथोदयास्तसमयेयेषांमध्याह्नस्तेषांतथाभवति तदास्माकं वि
प्रकृष्टदेवाकरस्तत्तापकर्त्रीप्रकाशकर्तीचनभवतितथेवाध्यात्मंयौवनेसकलेंद्रियाणांपाटवात्आत्मानंकृत्यं
प्रकुलत्वाद्दुःखाःश्रयोविद्वोषज्ञश्चभवतिशैशववार्द्धकयोस्तुतमआधिक्यान्मुग्धःइंद्रियापाटवाच्चैतामग्नश्च
भवतिअतएतादृशानर्थनिरूप्यर्थंसायंप्रातःसंध्योपासनंविहितमितिभ्रमरकीटन्यायेनसर्वदैतत्तुरीयपदानुसंधा
नेप्रत्यस्तूर्यंगच्छतिनपुनरावर्ततेयावज्जीवंतितावत्सकलसौभाग्येनसर्वत्रश्रेष्ठोभवतिएतेनवक्ष्यमाणंगायत्युप
स्थानमंत्रंकदापिपरित्यजेत्सावदेमितिमंत्रात्मकंपरिकल्प्यगायत्र्याएतत्तुरीयंपदमितिवदंतःपरास्ताःनतुविश्वा
मित्रकल्पादिसूत्रेषुलिखितत्वाच्छ्रुतिमूलत्वाद्गायत्युपासनेसाद्गुण्यार्थमष्टाक्षरायंगायत्र्याश्चतुर्थःपादोज
प्यतइतिचेन्मैवंसकलसंमतऋग्विधानादिकल्पयंथेष्वस्पष्टत्वात्कल्प्यमानकल्पेक्षयाप्रत्यक्षश्रुतेःप्राबल्यात् ११२

विश्वामित्रकल्पस्त्वयमेकमुख्यःप्रत्यक्षश्रुतिसिद्धत्वात्अनयाऋचासर्वेषांगायत्रीछंदसांमध्येस्थितायाःसावित्र्या
गायत्र्यास्तत्सवितुरित्यृचायुपासनस्योक्तत्वात्तत्सवितुरित्यृचोविश्वामित्रत्वात्विश्वस्यहवैमित्रोविश्वामित्रआसवि
श्वंहास्मैमित्रंभवतियएवंवेदेतिब्राह्मणात्मंत्रस्यऋषित्वात्तथाचोक्तमृग्विधानेऋषिंसर्वेमिमंजप्त्वासपुत्रंनियतःशु
चिः॥सहितांफलमाप्नोतिऋग्वेदस्यनसंशयइतिसपुत्रंमाधुछंदसंनेत्राइंद्रविश्वाइत्यारभ्यसंतिभूयसीरित्यंतेन
सहितंऋषिंवैश्वामित्रंमधुछंदसंअग्निमीळइत्यारभ्यभवंतुनुष्टयइत्यंतमित्यर्थःप्रकृतमनुसरामःसेषुगायत्रीत्रिप
दाचतुर्विंशत्यक्षराएतस्मिन्नर्थऋचेतुरीयेदर्शतेपरोरजसिवाक्येनप्रतिष्ठितातेतुरीयंप्रसिद्धंदर्शतपदंपरोरजः
आदित्यरूपंतद्रूपागायत्रीसत्येप्रतिष्ठितातत्रज्ञातेत्यर्थःकिंपुनस्तत्सत्यंश्रुणुचक्षुर्वैसत्यंलोकेचक्षुःप्रसिद्धंश्रोत्रा
दीद्रियापेक्षयाश्रेष्ठमितिश्रुतेरधिकार्थकंननुचक्षुषापित्तंखलुपीतइत्यादिभिर्भ्रान्तिहेतुत्वात्कथंसत्यमितिचेत्शृणुच

पदे

हेत

×रूपलात्गायत्र्युपासनेनादित्यप्रसादेचक्षुःप्रसादोभवतिचक्षुषआदित्यव्याप्ति×१

तुष्यद्गायत्र्यनुगृहीतंचक्षुःप्रमायाएवकरणंभवतीतिगायत्रीतुरीयपदस्यादित्यस्यचक्षुःसमर्पकत्वादादित्यस्य लोकेप्रसिद्धंचक्षुःसंयंतस्माद्यदिहनौ द्वौविरुद्धंभाषमाणावागच्छेतामहमद्राक्षंदृष्टवानस्मिएतद्विरुद्धमहमश्रौषंश्रुतवानस्मीतिवदतःतयोर्मध्येयएवश्रद्दध्यात्तस्यैववचसिविश्वासंकुर्मःयस्मृद्ध्यादहमश्रौषमितितस्यवचसिविश्वासंनकुर्मःश्रवणापेक्षयादर्शनस्यप्रबलस्यलोकेप्रसिद्धत्वात्चक्षुषोऽर्थेनसाक्षात्संबंधात्श्रोत्रस्यत्वर्थेनस्वविषयशब्दवाच्यनपरंपरासंबंधात्तद्धेतत्सत्यंतुरीयपदादित्यानुगृहीतंप्रसिद्धंगमुख्यंचक्षुःप्रमायाएवकरणंबलेप्रतिष्ठितमाश्रितंअशक्तचक्षुष्कस्यचक्षुःप्रायेणप्रमाकरणंनभवतीतिभावः किंपुनस्तद्बलंश्रेष्ठंप्राणोवैबलंतच्चक्षुःप्राणेप्रतिष्ठितमाश्रित्यास्तिंबलवतोरेतःसंपत्त्याचक्षुर्बलवद्भवतीतिभावःअतएववैद्यकशास्त्रज्ञैरक्षिरोगवतोरेतःसेकोनिषिद्धःकृतःरेतःसिक्त्याप्राणक्षयेक्षिक्षयात्रेतःसि ११३

क्तेःप्राणक्षयकारणत्वंतुतत्कणारणिमणिन्यायेनैवबुभुक्षायांभोजनाकरणेऽपिप्राणक्षयात्तस्मादाद्रवदितिश्रुतेर्विषयःबलंप्राणःसत्यात्प्राणाधीनात्प्रमाकरणाच्चक्षुषोऽतीवबलवत्तरोभवतिप्राणस्यचक्षुराधारत्वात्तदेतेनचतुर्विंशत्यक्षरगायत्र्यभिधेयंतुरीयमादित्यरूपंपरब्रह्मज्ञानचक्षुषिप्रतिष्ठितंतत्प्राणचक्षुःप्राणायामेप्रतिष्ठितमित्यपिस्वयंज्ञानचक्षुषःप्राणायामादिसमाध्यंतयोगाभ्याससाध्यत्वात्एवमुक्तप्रकारेणउक्तेर्कएषाऽभिधानाभिधेयरूपागायत्रीअध्यात्मंप्रतिष्ठिताबाह्यप्राणरूपेणात्मनिरक्षणायस्थिताऽहेपागायंस्तत्रेचतुर्विंशत्यक्षरानिश्चयेनबाह्यपागायत्रीगयान्त्रक्षितवतीकेतगयाःप्राणावैगयाःशब्दकरणात्प्राणाःगयानामप्रसिद्धाःतत्तस्मात्प्राणांस्तत्रेतद्यद्यस्माद्भयांस्तत्रेतस्माद्भयत्राणाद्गायत्रीनामभवतिसआचार्योमाणवकमुपनीययामेवत्रिपदामावांसावित्रीगायत्रीमन्वाहेमेभवतूहीतिऋक्सानुवक्तिएषेवसाम्नीत्यादिनायंथेनोक्तप्रभावेवमाणवकायोपदिष्टासावित्रीगा

यत्रीवो ध्यासत्र्यावर्ययिस्मेमाणवकायाचाह सावित्रीगायत्रीमनुवक्तितस्यमाणवकस्यप्राणान्त्वादीनिसवाणीं द्रि
याणित्रायेतपापेभ्यानिवर्तयतिअयंभावःउक्तरीत्याभिधानाभिधेयरूपगायत्र्यनुसंधानेनसत्वरध्यात्वात्मानंदेस
तुष्मुद्दयाकामात्मनःपापेनानिवर्ततेनिरंतरमनुसंधातानतोंतःकरणस्यस्थैर्यसतितत्रसच्चिदानंदात्मनःप्रति
विंबात्सच्चिदानंदात्मानुभूत्याकृतार्थोभवतीतितस्मादियंसावित्रीगायत्र्येवोपदेष्टव्यापास्यावतांमाणवकायानु
वक्तव्यांहैकेगायत्रीप्रभावाभिज्ञाःसावित्रीसवितृदेवताकांअनुष्टुभमनुष्टुपूर्वांछंदस्कामश्चंअन्वाहुःमाणवका
योपदिशंतितेषामयमाशयःवागनुष्टुप्भवतिएतद्वाचंसवितृप्रतिपादिकांयाचमनुत्रूमउपदिशामःअनेनवायु
पदेशेनसर्वोपिवागर्थीज्ञातःस्यादितिनतथाकुर्यात्सावित्रीमनुष्टुभंनैवानुब्रूयात्किंतुगायत्रीमिवानुब्रूयात् ११४
गायत्र्यनुवचनेनानुष्टुबनुवचनस्यापिफलंभवतीतिभावःननुचतुर्विंशत्यक्षरगायत्र्यपेक्षयाद्वात्रिंशदक्षराया

अनुष्टुभआधिक्यात्फलमप्यधिकंभविष्यतीत्याशंकांनिराकरोतियदीतियदिहवाअपियद्यपिनिश्चितंप्रसिद्धं व
क्तिवनतुबह्वनुष्टुबनुवचनफलापेक्षयागायत्र्यनुवचनफलाधिक्यात्प्रतिगृह्णातिसावित्रीमनुष्टुभंगुरोःसका
शादाहृतनहेवतद्गायत्र्याएकंचनपदंप्रतिनेत्यर्थेतत्अनुष्टुबनुवचनंतादृश्यागायत्र्याएकेनापिपदेननुल्यं
नैवभवतिनिश्चितमित्यर्थःयत्तुकश्चिद्व्याचख्यौतांहैकेशाखिनःसावित्रीमनुष्टुभंतत्सवितुर्वरेणीमहवयंदेव
स्यधीमहीत्यचमन्वाहुरितितदसत्तादृशशाखायाअनुपलब्धेःव्याख्या
तुरिदानींतनत्वात्किंचतादृशशाखांतरकल्पनेनश्रुत्योर्विरोधेऽपूर्व्याहुतयःसावित्रीमन्वाहुपलक्षणार्थत्वात्
सर्वीयथाशाखिवाचयीतेरूपनयनकल्पस्यैविकल्पापत्यापेक्षतादृशानुष्टुबनुवचनेमहान्शिष्टाचारवि
रोधःस्यात्सकृत्तश्रुतेस्तत्सवितुर्वरेणीमहइत्यचोनुपदानादुक्तव्याख्यानमेवसाधुश्रुतेःसर्वेभ्यश्छंदोभ्यःप्र

आ बो· ११५

गायत्रीसंपूर्णतासंपादनसंअनुष्टुक्व्यः योमाएवकः इमानभूम्यादीन्त्रीन्महाभूतादीनांपुराणप्रसिद्धानांलोकानामेतेवांतर्भावः तदाहुः सप्तसोर्याणिछंदांसिशंसेद्यथेवाग्नेर्यथोषस्यैयथाश्विनःसप्तवैदेवलोकाः सर्वेषुदेवलोकेषुराधोतीतितन्नाहत्यंत्रीण्येवशंसेत्त्रयोवाइमेत्रिवृतोलोकाएषामेवलोकानामभिजित्याइतिब्राह्मणादनुकथमंतर्भावइतियत्पृष्णमद्यतेसर्वकर्मसुपृज्यतेसोमहाग्निर्भूमिर्घृतःपुरोहितःअंतरिक्षंपुरोधातृतपतितापयतित्वसर्वमसौतपःसूर्यद्युस्थःपुरोहितःद्यौःपुरोधातासएतेत्रयोग्नेर्ज्योतिर्मयाःलोकाभूर्भुवःस्वर्लोकारूपसकामानांपुनरावृत्तिकारकाःसत्वंरजोगुणाःसत्वरजस्तमोरूपाःतत्रसात्विकःसूर्यःरजसोवायुःतामसोग्निःएतेषांसप्तानामधिष्ठानंसच्चिदानंदात्मकमद्वितीयंतुरीयंब्रह्मैवतिएवंसंख्याकाल्लोकान्मूर्तीन्पृथ्वीनूस्वस्वसमृद्ध्याप्तानूप्रतिगृह्णीयात्प्रादद्यात्प्रतिग्रहोनामअस्मिन्जन्मनिजन्मांतरेवादत्तस्यपुनरादा ११५

नंउभयोपिप्रतिग्रहःपुरुषस्यदूषकोभवतिलोभनदैन्यव्यंजनात्प्रतिग्रहत्यागरूपसंतोषकोभवतिओदार्यणाप्राशस्त्यात्सएवंलोकत्रयस्यप्रतिग्रहीतात्प्रतिग्रहदोषनिवारणायगायत्र्याउक्तस्वरूपायाएतत्प्रथमंलोकत्रयप्रापकंतत्सवितुर्वरेण्यमित्यात्मकंपदमष्टाक्षरमानुयात्तज्जपतथैवभावनाभ्यामुपासीनश्चभावःयोयत्र ६
तिगृह्णातिसतेनदरिद्रातीतिधर्मशास्त्रसिद्धांतात्ब्रह्मांडदानप्रभृतंत्रैलोक्यराज्यंक्रियताकालेननश्यतितदाब्रह्मांडदातात्रैलोक्यराज्येनदरिद्रातिगायत्रीप्रथमपदोपासकस्तुब्रह्मांडदातात्रैलोक्यराज्येनसंपन्नोभवतिगायत्र्युपासनमाहात्म्यात्तनिर्लोभेनतेनत्रैलोक्यराज्यस्यपरिक्षीणस्यप्रतिग्रहादितिएवमुत्तरत्रएतेनक्षत्रियादिर्नृपतदैहलौकिकविषयसुखलोभेनसर्वजन्मदानसाधितमर्थंप्रजाभ्योगृह्णातिसःपूर्वपुण्यक्षयेदरिद्रातियस्तुनिर्लोभःसन्प्रजानस्तिस्रोगृह्णातिधर्मेणप्रजापालयतिचसःततोप्यधिकेन

राज्येनइहामुत्रचसमृद्धोभवतीत्यपिबोध्यंअथगायत्रीप्रथमपदप्रभावज्ञः त्रैलोक्यकामः यःयावतीयंत्रैलोक्य
प्रापिकात्रयीविद्यासकलकर्ममार्गप्रकाशिकातावत्प्रतिग्रहीयात्सः प्रतित्रयहदोषनिवारणायास्यागाय
त्र्याएतत्त्रय्याविद्यायाःप्रापकंभर्गोदेवस्यधीमहीत्यात्मकंद्वितीयंपदमनुयात्त्रय्याविद्यायाःसरसत्व
स्त्रियायोपासीतअथगायत्रीपदत्रयप्रभावज्ञःत्रैविद्यकामःयःपावदेतत्त्रैविद्यसाधकंप्राणिजीवजातंतावत्प्र
तिग्रहीयात्मत्यक्षेपोपादधातसःप्रतित्रयहदोषनिवारणायास्यागायत्र्याएतत्सकलजीवप्रापकंधियो
योनःप्रचोदयादित्यात्मकंसवितर्यभिलक्षपोपादनात्तृतीयंपदमनुयात्सकलजीवोपस्तिस्त्रैयीयोप
सीतइयंसिद्धिर्भगवतेयंप्रव्रजंतमनुपतमेयतकृत्यैहूपायनोविरहकातरआजुहाव।।पुत्रेतितन्मंनयात्म य
रामिनेदरूसर्वभूतहृदयंमुनिमानतोस्मीतिश्लोकेवयासकेःशुकस्यवर्णिताभुपेतंविषयसुखविमु ११६

रवेअथगायत्रीपदत्रयोपासकस्यास्यागायत्र्याएतदेवपदत्रयस्यार्थभूतंतुरीयंदर्शितंपदंपरोरजायएषआदित्यस्तप
तिकेवचनगायत्र्युपासनमंतरेकेनाप्युपायेननाप्यनेवप्रामुंशक्यंसर्वाधिष्ठानत्वादपरिछिन्नत्वाच्चकुतउक्तंतर्के
अन्यस्मात्कस्मात्तुंदंउपासनात्एतावृत्तसर्वाधिष्ठानुमपरिछिन्नंचप्रतिग्रहीयात्प्रामुयादगायत्र्युपासनमंतरेण
नान्यस्मात्कस्मात्तुंदंउपासनादित्यर्थःतस्मात्सकलदोषनिरास द्वासच्चिदानंदाद्वितीयब्रह्मप्रकाशिकाविछ
क्तिरूपागायत्र्येवोपास्यागायत्र्याःसकलजडदृश्यजीव्यत्वात्ततस्याउपस्थानपूर्वोक्तप्रभावायागायत्र्याअभिमुखस्थि
त्याप्रार्थनंतत्तुत्रिपदायाःशब्दात्मिकायाःगायत्र्याअमूर्तत्वात्तनसंभवतिचतुर्थस्यपदस्यादित्यरूपस्यमूर्तत्वात्त
दभिमुखस्थित्याप्रार्थनंचतुष्पदायाअपिगायत्र्याःभवतितस्मादुपासकआदित्याभिमुखस्तिष्ठन्गायत्रीमुपतिष्ठे
तानेनमंत्रेणकोसोमंत्रइत्यतआहेहगायत्रित्रंत्रैलोक्येनेकपदीभसित्रय्याविद्यायाद्विपदीभसिपाणिभिस्त्रिपदी

अस्तिअभिधेयेनतुरीयेणपदेनचतुष्पदीअसिआत्मनाअपदसिअविद्यमानंपदंयस्यासौतादृशीभवसिहियस्मान्नप
दंसेनप्राप्नोषिआत्मलेनसदाप्राप्तत्वात्अतोनमस्तेनमोरूपत्वत्प्रापकायतुरीयायदृशीतायपदायपरोरजसेव्या
प्तंअयंभावः हेतभासकंयद्रजस्तत्तस्यंपरासिअतः सदाप्राप्तासिवयंतुरजोभिभूतदृष्टयःभेदबुध्यालानप्राप्ता
स्मः अतस्त्वांनमामइतिअस्तेत्वत्प्राप्तिविघ्नकृत्दस्युः कामःअदस्त्वत्प्राप्तिविघ्नकृत्तंमाप्रापत्प्राप्नोतुइतिशादो
मंत्रसमाप्त्यर्थः यंद्विष्यात्तयमुद्दिश्यद्वेषंकुर्यात्ततस्यअसावित्यत्रानुकनामेतिनामगृह्णीयात्असावेदामाप्रापदि
तिमंत्रेकदेशस्थानेअस्मेकामोमासमृद्धीतिवाअभिचरतापाठ्यंअस्मेदत्तायाभिप्रेतःकामोऽभिलाषःमासमृ
द्धिसमृद्धिंनप्राप्नोतित्यर्थः नदेवास्मेदत्तायसःअभिप्रेतःकामः समृध्यतेसमृद्धोभवतियस्मेयमुद्दिश्यएवंप्रयो
कामोमासमृद्धीतिपठनेनोपतिष्ठतेअभिमुखस्थिलानमस्करोतितत्रैवस्थानेअहमदःप्रापमितिवापाठ्यंअहंअ

दःदेवदत्ताभिप्रेतंनप्राप्नुयामित्यर्थः एवंऋत्येवोपस्थानमंत्रैकदेशोविकल्पितःसंप्रतिगायत्र्यामुखविधानायार्थ
वादःप्रकल्प्यतेएतद्वैतत्गायत्रीसंवर्दनिश्चितंप्रसिद्धंवक्ष्यमाणंवचनंजनकोवैदेहःविदेहएववैदेहःनित्यंदेहा
भिमानरहितःजनयतीतिजनकःद्वितीयजन्मदाताआरूढोगुरुःमातुर्यदग्रेजायतेद्वितीयंमौञ्जिबंधनात्॥ब्राह्मे
एक्षत्रियविशातस्मादेतेद्विजाःस्मृताइतियाज्ञवल्क्यस्मृतेःबुडिलमाश्वतराश्विमुवाचअश्वःसूर्यतरःसंसारस
मुद्रनौर्यस्यसःअश्वोजीवोयस्यसःअश्वतराश्वःतस्यापत्यंआश्वतराश्विःसर्वधर्मोक्तिरुद्धारयोग्यत्वात्यतंबुडि
लसंसारसमुद्रमग्नंआरुरुक्षांशिष्यमुपेत्येदंपप्रच्छयन्नुवितर्कोदासंवोधनेतत्स्मरणेहबुडिलयद्यस्माद्गायत्रीविद्वं
तत्गायत्रीशेत्थीतिजब्रूथाःउक्तवानसिअथकृतार्थःकथंकेनप्रकारेणहस्तीभूतोवहसीहस्तीमतंगजःसद्यहस्तीजातः
यथाहस्तीस्वजानंवहतितथात्वंउपदिष्टांगायत्रीकेवलंवहसिहृद्यनुसंधत्सेनतुतयास्वात्मानंकृतार्थमन्यसेइतिशब्दःप्र

श्रसमाप्त्यर्थः इति पृष्टो बुडिलो जनकं विज्ञापितवानित्याहेत्यंप्राट् गायत्युपासनमाहात्म्यात्सम्यक्सविदानंदात्मनाराज्ञ
तिकृतार्थः शोभतेतादृशाहियस्मादहं अस्यागायत्र्यामुखंप्राप्तिसाधनंनविदांचकारनैवज्ञातवानस्मिइतिहोवाचइत्यंनिश्चि
तंविज्ञापितवान्तमुवाचजनकः श्रृणुतस्या अग्निरेवमुखंगायत्र्याअग्निरेवमुखंप्राप्तिसाधनंनलन्यत्यथाराज्ञःपुरो
हितआहवनीयोग्निः जायागार्हपत्योग्निःपुत्रोअन्वाहार्यपचनोग्निः एवमग्नित्रयेणसम्यङ्नदादशराजमंडलंराज्यंव
शीभवतियथा चाहिताग्नेराहवनीयाद्यग्नित्रयेणसम्यङ्नदादशाहः प्रजापतियज्ञः सम्पद्यततथासंवत्सरात्मनःसूर्य
स्यग्रीष्मवर्षाहेमंतत्रयेणसम्यङ्नदादशमासाः सम्यङ्भवंतितथैवस्थूलशरीराभिमानिनोविश्वस्यजीवस्यपित्तक
फवातत्रयेणसंपन्नेनबुद्धिमनोज्ञानेंद्रियकर्मेंद्रियकरणसमूहः संपद्यतेएवंत्रिपदागायत्र्याःयथाधिदैवंतेराजपुरोहि
तएवमुखंयथाचाधियज्ञेआहवनीयएवमुखंतथाधिदैवंतेचतुर्मासात्माग्रीष्मएवमुखंतथैवाध्यात्मेपित्तात्माग्नि

र्योग्निरेवमुखंअपराध्यात्मंतुसत्वगुणएवमुखंपित्तकफवातानांसत्वरजस्तमसांचदुःखसाधनत्वाद्हित्वंयदि
एवाऽपियद्यपिनिश्चितंप्रसिद्धंवाकिंवाग्नेनतुबकुअग्नेःसर्वभक्षत्वात्अभ्यादधतिलोकिकाःप्रक्षिपंतिसर्वमेवत
त्प्रक्षिप्तंसःअग्निःदहतिभस्मीकरोतिएवंहैवएवमेवनिश्चितंएवंवित्अनेनप्रकारेणाग्निर्गायत्र्याःमुखमितिजानातिसः
गायत्रीमुखज्ञःयद्यपिवह्निपाकंकरोतिनतुबकुगायत्रीमुखज्ञानमाहात्म्यात्सर्वमेवतत्पापंसंस्यागायत्रीमुखज्ञा
नेनसम्यक्भक्षयित्वाभस्मंविनाशंप्रत्यर्थः अयंभावःयथाराजापुरोहितापदिष्टंब्राह्मणसंतोषार्थमेवराज्यंकरोमिनत्वा
त्मभोगायेत्यनुसंधाताप्रजादंडनात्पापात्तद्राष्ट्रंइवन्मुच्यतेयथाचाहिताग्निःश्रौतविहितमाहवनीयार्थमेव
यागंकरोमिनत्वात्मस्वर्गसुखायेत्यनुसंधातात्तद्धिंसनात्पापान्मुच्यतेतथासोसूर्यःग्रीष्मसमाप्त्यर्थमेवरसमादत्तेनदृ
क्षादिशोषणात्पापात्सदामुक्तएवास्तितथैव स्थूलशरीराभिमानीविश्वोजीवःकेवलमोदर्याग्न्यर्थमेवरस्यस्निग्ध

स्थिरं हृद्यमनंभक्षयतिनतुजिह्वालोल्यायसःतादृशादात्पीडनात्पापान्मुच्यतेइतरेषांसर्वेषांपापानांभोजनपोप
जीवकत्वात्गायत्र्यनुग्रहणभोजनपोषविनष्टसर्वपापविनाशोभवत्येवेतिशुद्धःगायत्रीतुरीयपदादित्यानुसंधाननि
र्मलमानसःअतएवशुद्धःबहिरपिशुद्धत्वेनमाननीयःअतएवाजरःगायत्रीतुरीयपदादित्यानुसंधानेनस्वात्मनिसुधा
दिभिन्नेज्ञातेसतिशरीरजरासंबंधेपिस्वात्मनस्तस्वाभाव्यैकावस्थारहितोभवतिअमृतःअतएवमरणरहितोभ
वतितत्रसंभवतिसच्चिदानंदात्मनासंपद्यतेनसपुनरावर्ततइत्येतन्नोक्तायिकापिव्याख्यातएवंपुरुषार्थत्व
तुष्टयसंपादयित्रीगायत्रीतत्तदर्थफलमिपास्यतिअत्राशक्तानामर्पितत्तदर्थफलानांगायत्युपासनमुक्तमृग्विधानेअ
थवेदादिगीतायाःप्रसादजनकंविधिं॥गायत्र्याःसंप्रवक्ष्यामिधर्मकामार्थमोक्षदं॥नित्ये नैमित्तिकेकाम्यत्रितय
तुपरायणं॥गायत्र्यास्तुपरंनास्तिइहलोकेपरत्रच॥मध्याह्नमितभुग्भोनीत्रिस्नानाचनतत्परः॥जपेल्लक्षत्रयंधी

मानूनन्यमनसाक्रियइत्यादिधीमान्गायत्रीतुरीयपदादित्यनुसंधाताअक्रियःवाग्यादिचलैर्यैरहितःनान्यद्ध्यानस
क्रियइत्यादिपाठस्तुयैकतत्परास्मिन्नोव्यापारइत्यर्थः॥अभिचारेपितत्रैवोक्तंअक्षरप्रतिलोमंयंयस्मिन्शुभ्यतकर्म
णि॥तद्ध्रौव्यंविजानीयादेतद्ब्राह्मणाबलं॥व्याघातकेध्वंसमिधोअक्षरप्रतिलोमया॥शुक्रयात्सार्षपंतेलंवैभी
तकंतुतत्स्रुवः॥यद्वेत्यादिनंशत्रोरपिवोच्चाटनंपुनः॥पञ्चःसंपीड्यैकत्रीन्वर्णान्शत्रुप्रमापयेदितिअत्रकश्चि
द्वेत्रिलक्षंपुरश्चरणमुक्तंकलाउक्तसंख्यावतुर्गुणोजपोविहितःअतोद्वादशलक्षंपुरश्चरणंभवतीतित्तदयुक्तं
अतश्चतुर्गुणजपविधिवचनाभावात्नचतुकलोक्तचतुर्गुणंप्रोक्तंमितिवचनंजपचातुर्गुण्यविधायकंद्रष्टव्यमिति
चन्मेवदइदंवचनंयत्रपठितंतत्रैवशेषःउतसर्वस्यजपविधेःआद्येतत्प्रकरणपठितत्वाभावान्नेतत्संख्याचा
तुर्गुण्यविधायकमेतद्वचनभवितुमर्हतिअंत्येश्रोतेहोतारमद्वयाद्वतिजपेदिक्षादावपिचातुर्गुण्यप्रसक्त्याम

हानूसकलमहाजनविरोधःस्यात्तस्मादत्रत्यंत्रिलक्षमेवपुरश्चरणं।अत्राप्यश्रद्दधानोनांमलिनमनसामपिनतदर्थ
प्रत्यंगायत्र्युपासनमुक्तंशारदातिलकादियंथेषुअथोवदामिगायत्रीतत्स्वरूपांत्रयीमयीं॥यथाप्रकाशतेब्रह्मसच्चि
दानंदलक्षणं॥१॥प्रणवाद्याव्याहृतयःसप्तस्युस्तत्पदादिकाः॥चतुर्विंशत्यक्षरात्मागायत्रीशिरसान्विता॥२॥स
र्ववेदोद्धृतःसारोमंत्रोयंसमुदाहृतः॥ब्रह्मादेव्यादिगायत्रीपरमात्मासमीरितः॥३॥कृष्याद्याःप्रणवस्यैतेमु
निभिःपरिकीर्तिताः॥जमदग्निभरद्वाजभृगुगौतमकश्यपान्॥४॥विश्वामित्रवसिष्ठाख्योव्याहृतीनामृषी
न्विदुः॥गायत्र्युष्णिक्तथानुष्टुब्बृहतीपंक्तियःपुनः॥५॥त्रिष्टुब्जगत्यौछंदांसिकथितानिमहर्षिभिः॥सप्ताग्नि
निलःसूर्योवाक्पतिर्वरुणोहरिः॥६॥विश्वेदेवाःक्रमादासांदेवताःपरिकीर्तिताः॥गायत्र्यासुनिराख्यातोविश्वा
मित्रोमहाऋषिः॥७॥गायत्रीछंदइत्युक्तंदेवतासवितास्मृता॥शिरसोस्यासुनिर्ब्रह्मा छंदोदेव्यादिकास्मृता १२०

कथिता

॥८॥गायत्रीपरमात्मास्यादेवतोबुधैः॥व्याहृतीःसप्ततारांश्चाहृन्मुखांसोरुयुग्मके॥९॥जठरेन्यस्यमंत्रज्ञोमंत्रवर्णान्स
तोन्यसेत्॥१०॥पत्संधिषुध्वजेनाभौहृत्कंठभुजसंधिषु॥११॥आस्यनासाकपोलाक्षिकर्णभ्रूमस्तकेपुनः॥पार्श्वाभ्यान्न
रयाम्यप्राङ्मूर्ध्ववक्त्रेषुसाधकः॥१२॥पदानिदशविन्यस्येदेषुस्थानेषुमंत्रवित्॥शिरोभ्रूमध्यहृद्वक्त्रकंठहृन्ना
भियुग्मके॥१३॥जानुनोःपादयोर्युग्मेतल्लिंगःशिरसिन्यसेत्॥ब्रह्मणेहृदयंप्रोक्तंविष्णवेशिरईरितं॥१४॥शि
वायकवचंमीश्वरायसमीरितं॥नेत्रंसदाशिवायोक्तमस्त्रंसर्वात्मनेस्मृतं॥१५॥षडंगानिप्रयुक्तानियथास्यास्त
त्यविन्यसेत्॥मुक्ताविद्रुमहेमनीलधवलछायैर्मुखैस्त्रीक्षणैर्युक्तामिंदुकलानिबद्धमुकुटांतत्त्वार्णमालिकां॥गा त्म
यत्रीवरदाभयांकुशकशांशुभ्रंकपालंगुणंशंखंचक्रमथारविंदयुगुलंहस्तैर्वहंतींभजे॥ ॥प्राणायामान्दश
राकृत्वागायत्रींसंध्ययोर्जपेत्॥सप्तव्याहृतिसंयुक्तांगायत्रीशि..रसान्वितां॥ ॥त्रिरुच्चरन्धियाप्राणान्धार

विवेद्रत्नम् २

येद्यतमानसः॥ प्राणायामैरयमाख्यातः समस्तदुरितापहः॥ ॥व्याहृतित्रयसंयुक्तांगायत्रींदीक्षितोजपेत्॥तत्तल्लक्षं विधानेनभिक्षाशीविजितेंद्रियः॥क्षीरोदनंतिलान्हूत्वाक्षीरद्रुमसमिद्वरान्॥पृथक्सहस्रत्रितयंजुहुयान्मंत्रसिद्धये॥ विधायमंडलंविद्वान्त्रिकोणंज्वलकर्णिकं॥सौरेपीठंयजेद्दत्त्वादीप्तादिनवशक्तिभिः॥ ॥मूलमंत्रेणकृत्वायोमूर्तौ देवीविचिंतयेत्॥कोणेषुत्रिषुसंपूज्याद्याद्याःशक्तयोबहिः॥ ॥आदित्याद्यास्ततःपूज्याश्चंद्रार्कादिसहिताःक्रमात्॥ततःषडंगान्यभ्यर्चेत्केसरेषुयथाविधि॥ ॥प्रह्लादिनींप्रभांपश्चान्नित्यांविश्वंभरांपुनः॥विलासिनींप्रभावत्यौ जयाशांतांयजेत्पुनः॥कांतांदुर्गासरस्वतीविद्यारूपांततःपरां॥विशालासंज्ञितामीशांव्यापिनींविमलांयजेत्॥॥ तमोपहारिणींसूक्ष्मांविश्वयोनिंजयावहां॥पद्मालयांपरांशोभांपद्मरूपांततोर्चयेत्॥ ॥ब्राह्म्याद्याःसारुणाब्जेषुपूजयेत्प्राक्तलक्षणाः॥ततोर्चयेद्ब्रह्मविष्णुशक्राद्यानायुधैःसह॥इत्थमावरणैर्देवीं दशभिःपरिपूजयेत्॥ १२१

धर्मार्थकाममोक्षाणांभोक्तास्याद्द्विजसत्तमः॥ ॥ततःसंख्यासहस्राणिमंत्रविज्जुहुयात्तिलैः॥सर्वपापविनिर्मुक्तोदीर्घमायुःसविंदति॥ ॥आयुषेसाज्यदधिकैःकेवलैर्नाथसर्षपैः॥ह्रींवीत्रिकैस्तिलैर्मंत्रीजुहुयान्त्रिसहस्रकं॥ ॥अरुणाब्जेस्मिमध्यक्तेर्जुहुयादयुतंततः॥महालक्ष्मीर्भवेत्तस्यषण्मासान्नात्रसंशयः॥ब्रह्मभिर्येजुहुयात्तत्सहस्रैर्नृपसत्तमैः॥बकुलाकिंशिहोक्तैर्नृपथावत्साधुसाधितः॥द्विजन्मनामियंविद्यासिद्धाकामदुधामततिंत्रेदंतत्तेंतस्य गायत्र्युपासनस्यप्रतिमात्वेनभूयिष्ठत्वात्परिछिन्नदृशांमलिनमनसामेतेनगायत्र्युपासनेननिरस्तसमस्त दोषत्वात्परिछिन्नधियस्तद्धृदारण्यकोक्ताभिधानाभिधेयरूपचतुष्पद्गायत्र्यनुसंधानरूपेऽपासनेप्रवर्त ते॥ततःकृतार्थश्चभवतिएवमेतदुपासकोपक्षयासात्विकस्यकिंविशुद्धचित्तस्यऋग्विधानोक्तगायत्र्युपासने नधारणादार्द्रान्निर्मलमनसस्तथाविधोपनिषद्गायत्र्युपासनेप्रवृत्तिः ततःकृतार्थताचभवतितस्मा

दोपनिषदमेवंतथाविधगायत्र्युपासनंसाक्षान्मुक्तिजनकंगायत्र्यास्तत्त्वविद्यात्वात्तुइतरत्रूपासकंगायत्र्याःपरंपरया
मुक्तिज नकंअधिकारितारतम्यात्तदुक्तमग्निविधाने अग्नौक्रियावतांदेवो दिविदेवोमनीषिणां॥ प्रतिमास्वल्पबु
द्धीनां योगिनांहृदयहारिरितितस्मात्सात्त्विकेनास्थिरचित्तेनमुमुक्षुणाओपनिषदमेवगायत्र्युपासनंयावज्जीवंक
र्तव्यमितिकिंचयद्यपिसंध्यानंदेशेदेशेनियतकालत्वात्तास्वेवअपउत्क्षेपंतिताभिरार्द्रैःस्नैलवादिनोब्राह्मणः
प्रजापत्यनुग्रहीतान्आदित्यरश्मिरक्षसान् ध्वंतिवनंतुतद्विनकालेप्यपउत्क्षेपंतितथाप्यध्यात्मंदेशेव
योवनवाधकानांप्रत्यात्मंनियतत्वात्मृत्योःसदासन्निहितत्वाच्चप्रजननानुग्रहीतान्आत्मरश्मिन्कामादीनूज
र्तुसदारंतुर्ध्वंनेतव्यमेवमाशिश्नदेवाअपिसुऋतंनइत्यस्यमाशिश्नदेवाअब्रह्मचर्याःशिश्नंश्नथतेःअपि
सुऋतंनःसत्यंवायसंवेतिनिरुक्तेनज्ञानकर्ममार्गयोरुभयोरपिविषयेब्रह्मचर्यस्यावश्यकत्वाभिधानात्ततएव १२२

कामादिरश्मिजयेस्वास्थ्यंचेति॥ २८॥संप्रतिधीदार्ढ्यायभजनीयंप्रपंचयतिअदर्शनइतिअदर्शनेनयस्यविभातिगेहे
निजेजनोयस्तमसापरीतः॥सोरण्यदेशोद्यपितंसमीक्ष्यत्यक्त्वाभयंसंचरतिस्वतंत्रः॥२९॥तमसांधकोरणापरीतःध्या
नलोचनःयोजनोलोकःयस्यसूर्यस्यादर्शनेदर्शनाभावेसाधकेरात्रिसमयेनिजेस्वकीयेनिर्भयत्वेनसंभावितेपिगेहेस्व
जनविशिष्टगृहेबिभेतिभयंप्राप्नोतिसजनःतंसूर्यसमीक्ष्यदृष्ट्वादिनसमयइत्यर्थःअरण्यदेशोद्यपिअनेकहिंस्रसं
कुलत्वेननिर्जनत्वात्भयजनकदेशोपिभयंत्यक्त्वादुःखसंभावनमुपेक्ष्यस्वतंत्रःसकलकार्येषुभन्यजनानपेक्षःस
न्संचरतिसुखेनगच्छतितथाभूयुक्तिचेत्यर्थःअथाध्यात्मंतमसामाययापरीतःमलिनहृदयःयोजनःयस्यात्मनः
अदर्शनेसंसारनिजममत्वैतायेगेहेबिभेतिसजनःतन्निस्सशुद्धबुद्धमुक्तस्वभावमात्मानंसमीक्ष्यसम्यक्विज्ञाय
अरण्यदेशोबहुदुःखविषयोपियद्यविवेकेनिद्यपिजन्मसुयत्नसंसारिण्यामरमणीयासुसमाधिरूपस्वस्व

सुभात्मस्मरणा॥ हृदयंत्यक्त्वासंचरति॥ ९९॥ इदमेवंप्रभावमात्मसूर्यस्यप्राप्तावुत्कंठांनिराकुर्वन्नष्टमिश्लोकैःतत्सा
धनंभजनमेवेतिदर्शयन्नाहद्रष्टुमितिद्रष्टुंद्विजायंरुतंदहशोवाहृतिपुष्पैःपरिषूजयंति॥यद्ध्यानतोगच्छतिशुक्र
मूर्ध्वंतमात्मसूर्यंभजवेदवेद्यं॥१००॥यंसूर्यंद्रष्टुंवीक्षितुंदर्शनयोग्यकालेसवितुमित्यर्थःउदयसमयेनेक्षितो
द्यंतमादित्यंनास्तयंतंकदाचन॥नोपरक्तंनवारिस्थंनमध्यंनभसोगतमितिमनुस्मृत्यासूर्यदर्शननिषेधात्उद्यंतम
स्तंयंतमादित्यमभिध्यायन्कुर्वन्ब्राह्मणोविद्वान्सकलंभद्रमश्नुतेऽसावादित्योब्रह्मेतिब्रह्मैवसन्ब्रह्माप्येति
यएवंवेदेतिश्रुतेश्चरुतंदेहशोवाःरुतंसंपादितंदेहस्यशरीरस्यशोचंस्मितंविहितमार्गेणबाह्याभ्यंतरशुद्धत्वं
यैस्तेद्विजाब्राह्मणायंसूर्यंद्रष्टुंनिपुणैःमनोव्यापारकुसुमैःपरिषूजयंतिआराध्यंतेनविषयीकुर्वंतीत्यर्थःकिंचय
ध्यानतःयस्यसूर्यस्यस्मरणात्शुक्रंरेतःऊर्ध्वगाद्भवतिऊर्ध्वगामिभवतीत्यर्थः॥ततःऊर्ध्वरेताभवतितदोदृक्षदृशी १२२

चिरजीवीचभवतितच्चक्षुर्देवहितंपुरस्तात्॥पश्येमशरदःशतंजीवेमशरदःशतमितिश्रुतेः॥एतादृशोधिकारीसंत
मुक्तप्रभावंआत्मसूर्यआत्मसदृशंसकोपियंसूर्यसूर्यशब्दाभिधेयंसूर्यशब्दार्थरूपसुतरांईरयतिकामान्प्रेरयतीती
त्यर्थःनिरुक्तादीप्रसिद्धःलोकेसाधुलंतुराजसूयसूर्यमृषोद्यरुच्यकुष्यकृष्टपच्याव्यथाइतिनिपातनात्
विदवेद्यंवेदःऋग्वेदादिःतेनयैर्ज्ञेतन्मात्रगम्यमित्यर्थःसच्चिदानंदात्मकंभजभजनप्रकारस्तूक्तः एवमुत्तरत्रअथो
ध्यात्मंयमात्मानंद्रष्टुंज्ञातुंरुतंदेहशोवाःरुतंयमनियमासनप्राणायामप्रत्याहारैर्देहस्यशोचमारोग्यंयैस्ते
द्विजाःद्रहनिपुणैःपुण्यसदृशीभिःप्रीतिजननीभिःसमर्पणीयाभिश्चश्रवणमननानिदिध्यासनरूपाभिर्हीनाभि
र्यपरिषूजयंतियध्यानतःशुक्रमूर्ध्वंगच्छतितमात्मसूर्यंसूर्यसदृशंचैतन्यसंपादकमात्मशब्दवाच्यंवेदवेद्यंवेदः
तत्तज्ज्ञानेतत्प्राप्यंस्वरूपंभजअनुभवएवमुत्तरत्रापि॥१००॥कुलेतिकुलोदराग्नेरुपठनेःश्रुतीनांयत्पूजकानांद्रि

यदेवतानि॥पुष्णंतिसंतःसकलाश्रयंयंतमात्मसूर्य०॥१०२॥संतःश्रद्धावंतःश्रद्धयाग्निःसमिध्यतेश्रद्धया हूयते
हविः॥श्रद्धांभगस्यमूर्धनिवचसोदयामसीतिश्रुतेः तत्रनिरुक्तंश्रद्धयाग्निःसाधुसमिध्यतेश्रद्धयाहविःसाधुहू
यतेश्रद्धांभगस्यभागधेयस्यमूर्धनिप्रधानांगेवचनेनावेदयामइतिश्रुतीनां देवताप्रकाशकानांमंत्राणांपठनेरुच्चार
णेःमंत्रार्थचिंतनेश्रद्धोदरान्नोउदरसंबंधीअग्निःतद्दोषकोग्निराहवनीयादिःतत्रहुत्वापयआदिहविःप्रक्षि
प्ययत्सूजकानियस्यसूर्यस्यप्रीतिजनकानिइंद्रियदेवतानिइंद्रियसदृशानिकार्यसाधकानिअग्न्यादीनिपुष्णंति
प्रीणयंतियद्वायुंजंतोतिपाठ्यंतत्फलदानेप्रवर्तयंतीत्यर्थः किंवासकलाश्रयंसर्वेषांस्थावरजंगमानांमात्म
त्वादाधारभूतंपुष्णंतितथाचयाज्ञवल्क्यः योद्रव्यदेवतात्यागसंभूतोरसउत्तमः॥देवान्संतर्प्यसरसायजमानं
फलेनच॥संयोज्यवायुनासोमंमीयतेरश्मिभिस्ततः॥ऋग्यजुःसामविहितंसोरंधामोपनीयते॥स्वमंडलादसौ १२४

सूर्यःसृजत्यमृतमुत्तमं॥यज्ञन्मसर्वभूतानामशनान्नशनात्मनामितिअथाध्यात्मंसंतःऋतीनांपठनेसदर्थचिंत
नेश्रद्धोदराग्नोउदरंजठरंतत्संबंधिनिभुक्तस्यपरिणामहेतोरग्नोरुक्तलोभोजयिताभुक्तावेत्यर्थःयत्सूजकानि
यस्यात्मनःउत्तरोत्तरारोग्यसंपादकानिसंतोषकानिचइंद्रियदेवतानिदेवतासदृशानिमनोरथपूरकानिइंद्रि
याणिमनआदीनिपुष्णंतिसकलाश्रयंदेहेंद्रियमनोधियांचैतन्यसंपादकंयमात्मानंपुष्णंतिइहोभयत्रऋतिः
विधाद्धृत्विद्वतुसोम्यमध्वायुर्दधद्यज्ञपतामविक्लुतं॥वातजूतोयोअभिरक्षतित्मनाप्रजाःपुपोषःपुरुधावि
राजतीअस्याअर्थःअधिदेवतंविधाट्विशिष्टेतज्ञासूर्यःदृहन्वेदसोम्यंमेयागसंपादकंसंद्रलोकप्रापकंचमधुरवा सो
दिष्टरसंपिबतुअग्न्यालोकनमुरेवनप्राश्नातुकिंकुर्वन्यज्ञपतोयजमानेअविक्लुतंअविध्वस्तंआयुःइहलोकेयशारू
पंपरलोकेचिरस्थायिलरूपंदधत्पोषयन्वातजूतोवायुनाहविःप्रापणेनसवितायःसूर्यःस्वनाआत्मनामंत्रेणो

इंद्रादेरात्मनइसनुशासनात्स्वयमेकजन्यानपेक्षः अमृतदोननाभिरक्षतिसाक्षात्रीँल्लोकान्पालयतिप्रजाःपुपोषद्वंद्वादि
देवतावृधयन्नासन्नत्रअत्रत्मनेत्यरुष्यतेअतएवपुरुधाविराजतितत्फलदानेइंद्रादिदेवतारूपणाविज्ञेशोभातिअ
त्रापित्मनेत्यनुरुष्यतेइतराप्रकाश्यत्वात्अध्यात्मनुसदाभासमानः आत्माबुद्धमनःप्रसादकंरस्यान्निगंधंस्थिरं
हृद्यमन्नंप्राश्नातुआरुरुक्षोयोगिनिव्याध्यनभिभूतंनिजीवनंसंपादयन्सन्प्राणायामैश्रीतोयास्वचेतन्यनसा
क्षात्काशयतिदेहेंद्रियमनोधियोवर्धयतिवदन्गृह्णन्गच्छन्उत्सृजन्आनंदन्पश्यन्शृण्वन्स्पृशन्पश्यन्भुंजन्
श्वसन्कल्पयन्जानन्प्रकाशेतेस्वयमेवप्रकाशात्तमात्मसूर्यंभजवेदवेद्यं॥१०१॥इंद्रादीतिइंद्रादिदेवाःसक
लाःस्वरूपंयस्याश्रुतेवेदविचारशीलैः॥भजंतिभक्त्याखिलदिक्प्रसिद्धंतमात्मसूर्यंभजवेदवेद्यं॥१०२॥वेद
विचारशीलैः वेदः इंद्रंमित्रंवरुणमग्निमाहुरथोदिव्यःससुपर्णोगरुत्मान्॥एकंसद्विप्राबहुधावदंत्यग्नियमं १२५

मातरिश्वानमाहुरित्यात्मकःतस्यविचारश्चिंतनंतद्यथाविप्रोमेधाविनःएकमद्वितीयंसत्नामासमानंआत्मांकंकर्मए
यस्कात्बहुधावदंतिनानारूपमुपदिशंतिइंद्रंपरमैश्वर्याश्रयंआहुःउपदिशंतिइंद्रनादिंद्रशब्दवाच्यंकथयं
तीत्यर्थः तथामित्रंजगन्मलदूरीकरणात्मित्रशब्दवाच्यंकथयंतिवरुणंजगच्छादनाद्वरुणशब्दवाच्यंकथयंतिअ
ग्निंजगद्दहनाग्निशब्दवाच्यंकथयंतिअथोदिव्यःदिविभवःसःइंद्रादिशब्दप्रसिद्धःसुपर्णःसुष्ठुगमनात्सुपर्णिश
ब्दवाच्यःकथ्यतेगरुत्मान्पक्षीदक्षिणोत्तरोर्ध्वगमनाद्गरुत्मच्छब्दवाच्यःकथ्यतेकिंबाग्निंहविर्भोगनयनादग्निश
ब्दवाच्यमाहुःकथयंतियमंलोकनियमनाद्यमशब्दवाच्यंकथयंतिमातरिश्वानमंतरिक्षेवायुमंतिर्यंतरिक्षेश्व
सितिमातरिश्वनितीतिवेतिनिरुक्तात्आकाशेवर्धनाज्जगज्जीवनाच्चमातरिश्वशब्दवाच्यंकथयंतीतिशीलंस्व
भावोयेषांतेवेदार्थज्ञैः सकलाःसंपूर्णाःइंद्रादिदेवाःआदित्यरुद्रमित्रादयःयस्यसूर्यस्यस्वरूपमुच्यतेसूर्यएवइं

द्रादयो देवादित्युपदिश्यतेकिंचवेदविचारशीलाअखिलदिक्प्रसिद्धंसंज्ञाः प्राच्यादयोदशदिशाः चंद्रबिंबंसूर्यबिंब
तत्रसर्वेमनीषिभिः प्रकाशकत्वेनज्ञातंभक्त्यातत्तद्देवताविभागेनआराध्यज्ञानेनचभजंतिसेवंतेअथाध्यात्मंवेदविचा
रशीलैःअत्रवेदविचारेअथाशब्दःसर्वसमुच्चयेभुक्तभोगआहिताग्निःमार्गद्वयेनोद्वेगामीभवतीतिसूचनार्थः
दिव्यःहृदयाकाशेदर्शनीयःअग्निर्भुक्तस्यपरिणामहेतुर्यमंसंयमनकर्तारंमातरिश्वानंप्राणंशेषमुन्नेयंयस्यात्मनःइंद्रादि
देवाःपाण्यादीनींद्रियाणिस्वरूपंचेष्टाद्वाराज्ञापकंउच्यतेकथ्यतेयद्वाआकारःकथ्यतेअस्यखानिलतेजांसि
जलंभूश्चेतिधातवः॥इमेलोकाएषआत्मातस्मात्सचराचरमितियाज्ञवल्क्यस्मृतेःपाण्यादिषोडशएवात्मनःषो
षणंभवतीतिभावःकिंचवेदविचारशीलाअखिलदिक्षुदशसुइंद्रियेषुबुद्धिमनसोश्चतद्विषयभोक्तृत्वेनज्ञात
मात्मानंभक्त्याग्रहणादितिविभागेनाराध्यज्ञानेनचभजंतिउपासतेएवमधिकारीलंघमात्मसूर्यंभजेवेदवा॥१०२॥

मुखेतिमुखादिसप्ताश्वरथेस्थितंयंपश्यंतिकर्मीध्वनिमानवाद्याःदेवाअपीछंत्युदयंतमात्म०॥१०३॥कर्मीध्वनिगमन
भोजनादिकर्ममार्गेस्थिताःमानवाद्याःमनुष्यप्रभृतयःसर्वेप्राणिनःयद्वाकर्मीध्वनिश्रुतिस्मृतिविहितेअग्निहोत्रादि
मार्गेसाधकत्वेनस्थितास्त्वमनुष्येषुश्रेष्ठाःब्राह्मणादयःमुखादिसप्तास्वरथेमुखादिसप्तमुखमेकंनासिकेद्वेअक्षिणी द्वे
श्रोत्रेद्वेतद्वत्रसग्राहकाःसप्ताश्वाःयस्यसःसप्तत्वाहरितोवहंतिदेवरथं॥शो विष्कंचंविचक्षणेतिश्रुतेः॥शो विष्कंभं
तेजोमयमूरुंविचक्षणेपश्यन्सचासोरथश्चप्रवहवायुःतत्रस्थितमारुह्यपश्यंतिसाक्षात्कुर्वंतिकिंचदेवाअपित्वा अन्या
दयःअपिशब्दाद्ब्राह्मणादयोमनुष्याःयदीयंयस्येमंसकलकार्यसाधकंउदयंप्रादुर्भावमिच्छंतिदेवाइविभागप्राप्यर्थं
ब्राह्मणादयउपासितुंप्रतीक्षंतइत्यर्थःअथाध्यात्मंकर्मीध्वनियोगमार्गेस्थिताःमानवाद्याःमुखादिसप्तास्वरथेसप्ताश्व
सदृशाविषयेषुप्रवर्तमानामुखादयःतत्रच्छिद्रोपलक्षिताःसप्तप्राणाःसप्तवैशीर्षन्प्राणाइतिश्रुतेःतद्युक्तरथदेहस्थि

तभोरूपेनोपलक्षयंतिदेवाअपिइंद्रियाण्येकत्रेदमाउच्यंतइतिनिरुक्तात्इंद्रियाण्यपिअपिशब्दात्योगिनोयदीयमुदय
मिच्छंतिइंद्रियाणिदूरदर्शनदूरश्रवणादिवृत्तिपाटवप्राप्त्यर्थंयोगिनोज्ञातुंप्रतीक्षंतइत्यर्थःएवमधिकारीत्वंतमात्मस्व
र्यंभुजइत्येवंचा॥१०३॥संसारेतिसंसारराज्ञेजगतिप्रशास्तिंवदंतिविद्योषसियंसमीक्ष्य॥तमोविनाशेसततंप्रकाशंतमोराहु
स्तस्येव॥१०४॥विद्योषसितत्वज्ञानसदृश्यांवित्तेनैर्मल्यकर्त्र्यांउषसिविभातकल्पायांरजन्यांयंसूर्यंसमीक्ष्यसम्यक्साक्षा
त्कृत्यसूर्यादेवीमुषसंरोचमानांमर्योनयोषामभ्येतिपश्चात्॥यत्रानरोदेवयंतोयुगानिवितन्वतेप्रतिभद्रायभद्रमितिश्रु
तेःमर्योनयोषांमर्यइवतिर्यञ्चानरइतिसंहितायांदीर्घदेवयंतःदेवभावंजिगमिषवःयुगानिवितन्वतेजन्मानिकुर्वंतिइ
त्यर्थःऋतत्रेतादापरकलिरूपान्कालविभागान्विस्तारयंतिअपिचयत्रउषसियुगानिकर्माणिस्नानसंध्यादीनिकु
र्वंतिअत्रमर्यग्रहणात्मरणधर्मीणोयुवतिमभिलक्षितानामरादितिसिद्धंतथानत्वसूर्योजारउच्यतइत्यादिषुलोकदृष्ट्या १२७

च्यतेनतुभवतीत्याद्येर्थतात्पर्यंएतेनदेवानांजन्मभोजनसुरतादिवर्णनंलोकदृष्ट्येवनतुवस्तुतइतिसर्वत्रबोध्यंदिवो
डुहितृत्वादुषाःसूर्यस्यस्वस्रावस्तुतस्तुजारउच्यतेजारजयतिस्तुतिंप्रापयतितादृशाःकथ्यतेजरास्तुतिर्जरतेस्तुतिकर्मण
इतिनिरुक्तात्॥जगतिअस्मिंलोकेसंसारराज्ञेःसंसारसदृश्याअनेकभयदायातमस्विन्याःप्रशास्तिंशोभनत्वंवदंतिननु
पूर्वस्यारात्रेःप्रशास्तिंकथयंतिधार्मिकाःतथाचश्रुतिःविधाजमानउषसामुपस्थेऽहंरुद्रेसनुमद्यमानःएषमदेवः
सवितावल्गुदयःसमानंनप्रमिनातिधामेतिउषसामितिबहुवचनंमुनरकोलसूर्यदर्शनात्पूजार्थंएताउत्याउषसःकेतु
मकृणुतेतिमंत्रनिरुक्तेभिधानात्उपस्थात्समीपसमयात्तुल्यकालोपपत्तेःसमीपसमयेप्राप्यरेभःस्तोतृभिरनुमद्यमानः
तत्कालंपूज्यमानःचल्गुदहावीरियेषसमानंमुरुव्यधामहविःनप्रमिनातिनेवनाशयतिकिंतुफलसंबद्धंकरोतीत्यर्थःकी
दृशंतमोविनाशेसततंप्रकाशंतमोराहुःनस्यविनाशेतत्संभवाभावेतमःसाध्यकामरुत्सखामेघास्तेषांविनाशेचदिवा
तमःरुण्वंतिपर्जन्येनोदवाहेनयत्पृथिवींव्युंदंतीतिश्रुतेःरुण्वंतिमरुतःकुर्वंतियद्यस्माद्व्युंदंतिविशेषणाद्वीकुर्वंती

स्यर्थः निरंतरंभासमानंअथाध्यात्मंविद्योषसिउषःसदृश्यांभयनाशिन्यांतत्वविद्यायांयमात्मानंसमीक्ष्यजगतिजंगमेदेहे संसाररात्रेः रात्रिसदृशस्यभयदस्यसंसारस्यप्रशस्तिंवदंतिविवेकिनःतदुक्तंभूतानांप्राप्तिनःश्रेष्ठाइत्यादिकीदृशंतमोविनाशेतमोमायाकामादयः रात्रवश्चेतषामात्यंतिकेध्वंसेसतितततंप्रकाशंनित्यंशुद्धबुद्धमुक्तस्वभावंएवमधिकारीलंतमात्मानमस्मर्यं भजत्वेदेवद्यं॥१०४॥मर्त्यलमितिमाकूर्ययमस्मिलोलंविचार्ययंतत्त्यजहातिनूनं॥ध्यात्वातुयंगच्छतिदेवभावंतमात्मानस्मर्यं॥१०५॥मर्त्यलंब्राह्मणानांमरणधर्मत्वंयंस्मर्यमाकूर्यएतादृशोयमस्यप्रभावइतिश्रुलालोलमस्थिरंचलंभवतिब्राह्मणाःयंस्मर्यंविचार्यअयमेवममकर्मपाशेभ्योमोचकइतियुक्तिभिर्मत्वाततत्मर्त्यलंनूनंप्रजहातिनिश्चितंत्यजतिनपुनर्ग्रहातीत्यर्थः किंचयंस्मर्यं ध्यात्वातुनिरंतरंनिदध्यास्यतुशब्दःश्रोतृषुमंतृषुचकश्चनेवंध्यायतीत्यर्थविशेषद्योतकः देवभावंगच्छतिज्योतिर्मयशरीरंप्राप्नोतित्यर्थः अथाध्यात्मंयमात्मानमाकूर्यदेहेंद्रियमनोधीभिन्नंश्रुता १२८

नाहंदेहादिःकिंतुअक्षरोहमितिबुध्यामर्त्यस्थलोलमस्थिरंतत्यमात्मानंविचार्यअयंश्रुतआत्मादेहेंद्रियमनोधीभिन्नः नित्यत्वात्नित्यत्वस्यनानायानिदर्शनास्त्यादियुक्तिभिः निश्चित्यतन्नूनंप्रजहातियमात्मानंध्यात्वातुदेवभावंगच्छतिदेहभयत्रश्रुतिः॥विष्टीरामीतरणिंतेनवाघतोमर्तासःसंतोऽमृतत्वमानशुः॥सोधन्वनाऽऽभवःसूरत्वक्षसःसंवत्सरिसमष्टच्यंतधीतिभिरितिवाघतःकर्माणांवोढारःतरणिंतेनक्षिप्रेतेनरामीकर्माणिविष्टीकृत्वामर्तासःसंतःमरणधर्माणःस्तेसाअमृतत्वममरत्वमानशुःप्रापुःकथमित्यपेक्षायामाहसोधन्वनाःशोभनसाधनस्यपुत्राःसंबंधग्रहणंफलोपायथोः भिन्नजन्मसंसिद्धत्वायऋभवऋषयोमनुष्याःसूरत्वक्षसःआत्माकेदृष्टारःतमुद्दिश्यैवत्यर्थःसंवत्सरेदृश्यमनोधीभिर्हीदशात्मन्यात्मनिहादशारशिभिर्हीदशात्मनिसूर्येधीतिभिर्जनैरग्निहोत्रादिहोमैश्चसमृच्यंतसम्यक्युक्तावभूवरित्यर्थः चतुर्विंशहवैसंवत्सरेनुदितहोमीगायत्रीलोकमाप्नोतिद्वादशोदितहोमीसयदाह्योसंवत्सरावनुदितजुहोत्यथहास्यैकोऽनुताभवत्यथयउदितेजुहोत्यमितिब्राह्मणंचगायत्रीलोकरूपंव्याख्यातः एवमधिकारीलंतमात्म

× तिसंवत्सरेणैवसंवत्सरमाप्नोतियएवंविद्वानुदितेजुहोतितस्मादुदितेहो ××

दशं

स्सूर्यमभेदेवद्यं॥१०५॥यमितियंसिंहिकाडुर्मतिर्जातपापस्वर्भानुभिन्नंव्यवधानयुक्तंपश्यंतिनान्येपुरुषाविभिन्नं
तमात्म०॥१०६॥व्यवधानयुक्ताःव्यवधानंछादनंचंद्रबिंबंतेनयुक्ताःछन्नदृष्टयःपुरुषाःभूतलवासिनःपुरुषग्रहणं
सात्विकत्वादभ्रांतत्वद्योतनायसूर्यसिंहिकाडुर्मतिर्जातपापस्वर्भानुभिन्नंडुबुद्धिसदृशीअनर्थहेतुःसिंहिका
तस्याःसकाशाद्जातःउत्पन्नःपापःभयहेतुःस्वर्भानूराक्रुतिर्तमभिन्नंछन्नंनिःप्रपंचंपश्यंतिदृष्टांतत्कालविहितं
कर्मकुर्वंतीत्यर्थःतदानीमुपरिभोगकिरणानांसत्वाच्चंद्रस्यैदस्वर्भानुत्वंविधुंतुदत्वंतुसूर्यव्यवधानात्तस्यैवस्वप्रकाशय
हितत्वात्तज्जननीसिंहिकातुभूमिरितिबोध्यंअन्येघुस्थानाअतएवाव्यवधानाःसूर्यलोकवासिनःपुण्यकृतःपुरु
षाःविभिन्नंनपश्यंतिव्यवहितंनसाक्षात्कुर्वंतिकेतुभिरंतरंनिर्मलमेवपश्यंतितथावश्रुतियंवैसूर्यंस्वर्भानुरात्तमसा
विध्यदासुरः॥अत्रयस्तमन्वविंदन्नत्र्यन्वेअशक्नुवन्निंतिअत्रयःअत्तीतिअत्पापंतत्रायंतेसडुपदेशेननिवर्तय १२९

आम्नायोवेदःसयश्चायंपुरुषेयश्चासावादित्येसएकःसयएवंविदित्यात्मकःतंविदंतीतितेवेदार्थज्ञाःउपासकोपा
स्यकयोउपासकोब्राह्मणाःउपास्यश्चासोकश्चेतिविग्रहःसुखरूपत्वात्तेव्योमंडलरूपःसूर्यःतयोरेकमद्वितीयंएता
वत्साद्दश्यमानमाविद्यकत्वान्मिथ्येतिभावःयत्स्वरूपंमायानुपहितंब्रह्मविदंतिभजनादिभूतज्ञानचक्षुषासाक्षा
कुर्वंतिअत्रेयंप्रक्रियायथावनवृक्षत्वेजलाशयजलयोर्वासमष्ट्यात्मनिप्रायेणैकत्वंबहुत्वव्यपदेशाःवनमेकमत्रवृक्षा
बहवइतिएकस्मिंजलाशयेबहूनिजलानीतिवातथाआधिदैविकःप्रपंचःसमस्तस्थापिलात्समष्टिरूपःआध्या
त्मिकःप्रपंचस्तुव्यस्तव्यष्टिरूपःयथावनेनष्टेसमूहेवृक्षानष्टाःसमूहावाभवंतियथावाजलाशयेशुष्केपूर्णे
वाजलानिशुष्कानिपूर्णानिवाभवंतितथाधिदैविकेनष्टेसतिसर्वाध्यात्मिकःप्रपंचोनश्यतिसमूहेसमूहा
भवतितस्यतदात्मकत्वात्किंचसूर्यस्यसर्वात्माभिमानात्समष्टित्वंजीवस्यव्यस्तात्माभिमानाद्व्यष्टित्वंचंद्र १२०

स्यसर्वसंकल्पविकल्पप्रकृतित्वात्समष्टित्वंमनसोव्यस्तसंकल्पविकल्पप्रकृतित्वाद्व्यष्टित्वंदिशःसकलश्रोत्रात्मक
त्वात्समष्टित्वंश्रोत्रस्यकर्णविवरावच्छिन्नाकाशात्मकत्वात्व्यस्तशब्दकरणत्वाच्चव्यष्टित्वंवायोःसकलस्पर्शनात्मकत्वा
त्समष्टित्वंत्वचोव्यस्तस्पर्शग्राहकत्वाद्व्यष्टित्वंआदित्यस्यजगच्चक्षुरात्मकत्वात्समष्टित्वंचक्षुषोव्यष्टिरूपग्राहक
त्वाद्व्यष्टित्वंवरुणस्यसकलरसनात्मकत्वात्समष्टित्वंरसनस्यव्यस्तरसग्राहकत्वाद्व्यष्टित्वंअश्विनोःसकलघ्राणात्मक
त्वात्समष्टित्वंघ्राणस्यव्यस्तगंधग्राहकत्वाद्व्यष्टित्वंअग्नेःसकलवागात्मकत्वात्समष्टित्वंवाचोव्यस्तवचनकरणत्वाद्व्य
ष्टित्वंइंद्रस्यसकलपाण्यात्मकत्वात्समष्टित्वंपादस्यव्यस्तगमनकरणत्वाद्व्यष्टित्वंमित्रस्यसकलपाय्वात्मकत्वात्समष्टि
त्वंपायोस्तोत्सर्गकरणत्वाद्व्यष्टित्वंप्रजापतेःसकलोपस्थात्मकत्वात्समष्टित्वंउपस्थस्यव्यस्तानंदकरणत्वाद्व्यष्टि
त्वंब्रह्मचर्येणवैराग्येणचोपस्थप्रसादेसतितदात्मकोदेवतारूपःसमष्टिःप्रजापतिःप्रसीदतिएवंसूर्यादेवोपिदेवता

पालेर्व्यस्तग्रहणकरणत्वाद्व्यष्टित्वंउपेंद्रस्यसकलपादात्मकत्वात्समष्टित्वं ४३

रूपाः समष्टयो जीवादीनां प्रसादसंतितदात्मकाः प्रसीदंति अत्रेदमपि बोध्यं श्रुतौ तत्तत्कर्मभिस्तास्तद्देवता अग्न्यादयः
स्तूयंते तानि कर्माणि वागादिषु औदराग्न्यादिषु चाध्यात्मदृशा प्रत्यक्षाणीति अन्यच्च पृथिव्याः स्थावरजंगमात्मकत्व
त्समष्टित्वं देहस्य व्यस्तात्मकत्वं द्यष्टित्वं अंतरिक्षस्य सकलांतरालात्मकत्वात्समष्टित्वं हृदयाकाशस्य व्यस्तांतरालत्व
त्मकत्वाद्यष्टित्वं दिवः सकलमूर्धात्मकत्वात्समष्टित्वं मूर्ध्नो व्यस्तात्मकत्वाद्यष्टित्वं एवं पृथिव्याग्नेः सकलभोग
दिव्योदर्याकरजतेजआत्मकत्वात्समष्टित्वं देहे वाडौदर्याग्नेश्च व्यस्तात्मकत्वाद्यष्टित्वं अंतरिक्षे वायोर्जगत्प्राण
त्मकत्वात्समष्टित्वं हृदयाकाशे प्राणस्य व्यस्तात्मकत्वाद्यष्टित्वं दिवि सूर्यस्य समस्तात्मकत्वात्समष्टित्वं मूर्ध्नि जी व
स्य व्यस्तात्मत्वाद्यष्टित्वं तत्र मह्याः पृथिव्याः वेष्टनमंतरिक्षं भवति तद्वेष्टनं द्यौर्भवति जलतीरस्थमनुष्यं प्रति १२१
बिंबवत् एतद्विपरीतमध्यात्ममहान्देहस्यांतर्गतं पंचप्राणमनोबुद्धिदशेंद्रियसमन्वितं। अपंचीकृतभूतोत्थं सूक्ष्मां

गभोगसाधनं भवति सूक्ष्मांगस्यांतर्गतं कारणशरीरं भवति तत्र सुषुप्तिसमये जीवः मलिनसत्वविद्यासूक्ष्मवृत्तिभि
रानंदमनुभवति सुप्तोत्थितस्य तस्य सुखमहमस्वाप्सं न किंचिदवेदिषमिति परामर्शात् कारणशरीरस्यानंदम
यकोशात्मत्वं सूक्ष्मांगस्य तु विज्ञानमयमनोमयप्राणमयकोशात्मत्वं देहस्य तु अन्नमयकोशात्मत्वं तेषां
कोशावरावरकत्वात्कोशात्मत्वं तत्र देहे जीवस्य इंद्रियवृत्तिकालीनमर्थभानं जागरणं भवति सूक्ष्मांगे तु इंद्रियवृत्त
भावकालीनार्थोपालंभः स्वप्नो भवति कारणशरीरे तु सर्वप्रपंचापरतिः सुषुप्तिर्भवति तदानीं जीवस्य दुःखमोहयोर
प्यनुभवात्कदाचित्कआनंदानुभवः द्यु स्थानस्य सूर्यस्य तु शुद्धसत्वप्रधानमायोपहितत्वात् ससर्वदानंदमेवानु
भवति तत्र सर्वदा सर्वान्तर्यामिनिवृत्तेः तादृशपरमात्मनिसूर्यगायस्योपासनमहिम्नाजीवात्मनिलयंगते सतिसर्वो ध्या
ध्यात्मिकप्रपंचोलयंगच्छति तथाहि मनः चक्षुषि प्रविशति श्रोत्रादिशांप्रविशति त्वक्चासुंप्रविशति चक्षुरादित्यंप्रवि

शतिरसनंवरुणंप्रविशतिघ्राणंदस्रौप्रविशतिवाग्ग्निंप्रविशतिपाणीरिंद्रंप्रविशतिपादउपेंद्रंप्रविशतिपायुमि
त्रंप्रविशतिउपस्थंप्रजापतिंप्रविशतिएवंपांचभौतिकंशरीरंयथायथंपंचभूतानिप्रविशंतिउक्तंचउपाधिविलयाद्वि
ज्ञानविशेषविशेषानुनिः॥ जलेजलंवियद्योम्नितेजस्तेजसिवायौथतितदासजीवोमुक्त इत्यर्थतयदातुप्रारब्ध
वशाज्जीवतितदाजीवन्महात्मसूर्यस्तायुज्यंगतवतिसतिमनआदीनिइंद्रियाणिभूतानिचव्यष्टिरूपाणिउक्तरीत्या
समिष्टिभिश्चंद्रादिभिर्देवताभिःसायुज्यंगच्छतितोदेवतात्मकेस्तेमनआदिभिर्महात्मसूर्यात्मकोजीवःसर्वकः स भास-
र्वकारकश्चयदाछ्यात्भवतितदासजीवन्मुक्त इत्यर्थतेनिरंतरपरमानंदानुभवात्एवंचयथावृक्षतदवाछिन्नाकाश
योर्वनतदवाछिन्नाकाशोआधारभूतोतथाध्यात्मिकस्यप्रपंचस्योक्तरीत्या १३२
धिदैविकःप्रपंचआश्रयोभवतितस्यचउभयप्रपंचहेतुमायानुपहितंब्रह्मैवाश्रयभूतंभवतितस्माज्जीवचैतन्यस्यस्व

पोपहितंचैतन्यमाधारभूतंभवतितस्यचसाक्षात्जीवोपहितंचैतन्यस्यतुपरंपरयाआधारभूतंभवतिइहचैतन्यंब्रह्मैवभव
तितद्दानेसतितत्रजगद्भ्रमनाशात्तदधिष्ठानंब्रह्मैवभवतिउक्तंचतावत्सत्यंजगद्भातिशुक्तिकारजतंयथा॥यावन्न
ज्ञायतेब्रह्मसर्वाधिष्ठानमद्वयमितितस्मात्सर्वानर्थनिवृत्तयेज्ञेयंसच्चिदानंदलक्षणंब्रह्मैवसत्यंसवरूपेयाःस्वरूपेमकं
भवतीतिइत्थमुक्तरीत्याप्रसन्नंनिर्मलप्रकाशंयंसूर्यआत्मानंचत्वमपिउपासकःपश्यसिजानास्यसिएतादृशज्ञानस्यए
तादृशोपासनायाश्चदूरभवत्वात्दूरयोगःअपिशब्दात्मादृशउपासकाःपरमंतइतिगम्यतेतथाचश्रुतिःमहिन्यो
तिर्विभ्रतंत्वादिचक्षणेभास्वंतंवक्षुषेवक्षुषेमयः॥आरोहंतंबृहतःपाजसस्परिवयंजीवाःप्रतिपश्येमसूर्यंतिअस्याभ
र्थःहेविचक्षणसर्वतमहिज्योतिःमहोनजःबिभ्रतंदधतंअतएवभास्वंतंप्रकाशवंतंचक्षुषेवक्षुषेमयःप्रतिचक्षुषंचक्षुरु
षंसकलभवधारणात्सुखरूपंबृहतःपाजसस्परिआरोहंतंमहद्बलंपरिवर्ज्यअपपरीवर्जनेपचम्यपापरिहारस्यतु

शासनात्उच्चरंत्वात्वांसेव्यंवयंसेवकाजीवाअज्ञोभिश्रताःप्रतिपश्येमस्वोद्धारायप्रतीक्षमाहिहेसूर्यसवितृनमध्यात्मे
तुज्योतिःचैतन्यंवक्षुषेचक्षुषेसर्वेसांविषयज्ञानायआरोहंतंहृदयकुपाजसस्मरिसिद्धप्राणायामाभ्यासवशात्मन्द्री
नमृतिरुद्धछंतवयमारुरुक्षवःजीवाःजडाःनादेहेंद्रियमनोधियांचैतन्यसंपादकाःहेसूर्यभविष्यत्सवितामंडलंव्य
संबोधनंत्वाग्नयश्रुपासनमहिम्नासवितारंप्रतिपश्येमइच्छामिछमतिरेवमधिकारीलंतमात्मसूर्यंभजेदेवंयं॥
॥५७॥संप्रत्यधिकारिणंशिष्यंमत्वासेवासाधनेप्रवर्तयन्तत्राभिमुक्तप्रवृत्तिज्ञापयन्नाशास्तेद्वाभ्यांएकाग्रेतिए
काग्रचित्तःशुचिरर्घ्यपाणिःसेवस्वसेवामहमात्मसूर्यं॥सचंद्रवत्पूर्णकलंमनोनःकरोतुसंसारनिशिप्रसन्नं॥१०८॥
एकाग्रचित्तःसमाहितमनाःशुचिःबाह्याभ्यंतरशुद्धिमान्अर्घ्यपाणिःअर्घ्यंपूजाहविरादिद्रव्यंसूर्यप्रीत्यर्थमुत
क्षेपणार्थंचपाणौहस्तेयस्यसः तंआत्मसूर्यंआत्मसदृशंपरमात्मस्वरूपंसूर्यंसेवस्वअनुदिनंसूर्यंज्योतिर्ज्योतिःसू १३३

र्यःस्वाहेतिमंत्रेणवासूर्यायस्वाहेतिमंत्रेणवाहोमेनसूर्यायनमइतिमंत्रेणगंधपुष्पनैवेद्यसमर्पणेनचअनुरात्रिंतुसूर्य
बुध्यैवमादित्योवाअस्तंयन्नग्निमनुप्रविशतीतिश्रुतेःअग्निर्ज्योतिर्ज्योतिरग्निःस्वाहेतिमंत्रेणवाअग्नयेस्वाहेति
मंत्रेणवाहोमेनजलोक्षेपणेनचपूजयेत्तथाचोपस्थानेउपस्थाप्यनेदिवेदिवेदोषावस्तर्धियावयं॥नमोभरंतएमसी
तिमंत्रेणअग्निशरीरेनसूर्यंएवाभिध्यायतेनवाजलक्षणाहानिःशंस्याआसवाक्येनशक्तिरितिनिश्चयात्मंत्रार्थस्तूहे
अग्नेअग्न्यात्मकअग्निप्राण्यवासूर्यदिवेदिवेप्रत्यहंदोषावस्तःसायंप्रातःधियाकर्मणाज्ञानेनचवयंसेवकाःनमोभ
रंतःपयआदिहोम्यंद्रव्यमानयंतःहव्यहोभिर्ऋंदसीतिवार्तिकेनहव्योहस्यभवंकिंचनमस्कारंकुर्वंतःनचात्रम
त्रानुसंधानंभूअभरणइतिभादिधातुपाठात्त्वात्वामेवउपेमसीसमीपंआगछामइतिसेवामहेत्वान्यावयमेवमेवं
पूजयामःसतांसेव्यःआत्मसूर्यःस्वतेजसाचंद्रवत्यथास्वसेवकंचंद्राकायारात्रौशशिकलंसमग्रंभवतवावृतथा

नःसेवकानामस्माकंमनःअंतःकरणंसंसारनिशिनिद्रारात्रिस्तत्सदृशोऽनेकभयदेसंसारेपूर्णकलंसर्वविभासकंअत
एवप्रसन्नंकामादिषट्शत्रुक्षोभाभावात्निर्मलंकरोतुकृपयाविषयतयाप्रविशतुततएवहृताथवियंस्यामितिभावः
इदमत्रावधेयंखल्वासचंद्रस्यपृथिवीमंडलेनसमस्तसूर्यव्यवधानेप्रकाशाभावोभवतितुथातत्रत्यानांसर्वपोषक
सूर्यव्यवहितानामस्मिन्घालोदिपित्रादिलोकानांभयंभवत्येवतदानीविहितंसुत्रादिभिर्दत्तंश्राद्धंतदमुत्रोपास्ति
तंभवतितेननतेषांतृप्तिसुखंभवतिपृथिव्यास्तुसूर्यसर्वथैवपिसूर्यछादकंचंद्रबिंबस्याल्पत्वात्वलयाकारसू
र्यदर्शनात्सर्वदासूर्यदर्शनाभावाभावेपिभूमिष्ठानामस्मदादीनामविरेणपृथिवीबिंबेनसूर्यव्यवधानात्तरा
त्रिर्भवतितदभावाद्दिनंभवतितस्मादस्मदपेक्षयाविरेणचंद्रलोकस्थानांशुक्लाष्टम्यांप्रदोषोभवतिपूर्णिमा
यामर्द्धरात्रःकृष्णाष्टम्यांह्यर्द्धमिध्यङ्नवकृष्णादर्शनेनभयाभावात्चंद्रलोकंयज्ञैर्दानैःतपोभिश्चकं

कर्मठाजयंतितदूर्ध्वःसूर्यलोकःसर्वदासूर्यदर्शीनारकृतोभयःतंलोकंगायन्त्युपासनमहिम्नात्यागिनःप्राप्नुवंति
नतेपुनरावर्तंतेततस्मात्तत्रगमनेयत्नीयमितितथाचश्रुतिःअनृणाअस्मिन्ननृणःपरस्मिन्नृतृतीयेलोकेअनृणाः
स्याम॥येरेवनोयेऽतपितृयाणासर्वेन्यथाऽनृणाअक्षियेमतिऋणामयमर्यतेनरहिताअसिन्भूलोकेस्यामविद्या
ध्ययनेनऋषिऋणान्मुक्ताभवेमेत्यर्थःतथापरस्मिन्पितृलोकेस्यामप्रजोत्पादनेनपितृणान्मुक्ताभवेमेत्यर्थःतथातृतीये
लोकेदेवलोकेस्यामयज्ञकरणेनदेवर्णान्मुक्ताभवेमेत्यर्थःयद्वाभूयासमितिव्याख्ययंएतदृणत्रयमुक्त्याएतेषुलोकेषुम
शास्यतेप्रेत्यतुपितृलोकमेवप्राप्नोतिकर्मणापितृलोकोविद्ययादेवलोकइतिश्रुतेःइदानींसर्वैरभपरित्यागिनं परम्र
ह्मसुतंसंन्यासकंप्रत्याहयेदेवयानाःयावंतोदेवलोकमार्गाअर्चिरादयःउतपितृयाणाअपिपितृलोकमार्गाःधूमा द
यःसर्वेन्यथःतावंतोमार्गाःसर्वेअनृणाःवर्णाश्रमधर्माश्रयदेहेंद्रियमनोधीभिन्नाःपरमार्थतःसच्चिदानंदरूपावयंआस्मि

येम आत्मलात्समंतात्व्याप्याश्रयभूताभवमित्यर्थः अथाध्यात्मंएकायचित्तः अन्नंब्रह्मरसोविष्णुर्भोक्तादेवोमहेश्व
रः॥प्रीयतांभगवानीशःपरमात्मासदाशिवइतिअन्नंअद्यतेऽत्तिचभूतानितस्मादन्नंतदुच्यतइतिश्रुतेः अतुंयोग्यं
तदन्नमाङ्कुःप्रजननंप्रजानामितिश्रुतेःरजोगुणोपहितंब्रह्मरूपं स्रष्टाभवतितत्ररसः प्रीतिविषयःसत्वगुणोप
हितोविष्णुरूपोजीवनंभवतितस्यरसयुक्तो नस्यभोक्ता संहारकःदेवःयोसावादित्येपुरुषःसोसावहमितिश्रुतेःदि
वुक्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकांतिगतिषुधातुपाठाच्चएतावद्गुणकःतमोगुणोपहितःअ
तएवमहेश्वरोरुद्ररूपःसर्वत्रसमर्थोभवतिकिंबहुनाद्यभोजनेनभगवान्ऐश्वर्यस्यधर्मस्ययशसःश्रियःज्ञान समग्रस्य
वैराग्ययोश्चैवषण्णांभगउदीरणेसकलभाग्यवान्रुद्रःप्रीयतांप्रीतोभवतुसमष्टिरुद्रःप्रीयतांतदात्मकोवि १३५
श्वःस्थूलशरीराभिमानीव्यष्टिरहंतादृशाकर्मणाताद्दशाभाग्यवान्भविष्यामीतितात्पर्यंततथाईशःप्रजाप

नीलकेशःप्रीयतांसमष्टिहिरण्यगर्भःप्रीयतांतदात्मकस्तेजसःसूक्ष्मशरीराभिमानीव्यष्टिरहंतादृशास्वाभविष्या
मीतितात्पर्यंततथापरमात्माकामाद्दिशन्नुदाहृतःशंकरःप्रियतांसमष्टिशंकरप्रीयतांतदात्मकःप्राज्ञःकारणशरीराभि
मानीव्यष्टिरहंतादृशयुष्मैरेताभविष्यामीतितात्पर्यंततथासदाशिवः एवंत्रिपुरभैरवसहितपरमानंदस्वरूपीयः प्रीयतांतादृ
शगायत्रीतुरीयपदपरमानंदप्रीत्यासएवाहंअविद्याविनिर्मुक्तःपरमानंदस्वरूपोभविष्यामीतितात्पर्यमित्यर्थःव
स्थिरमनाःशुचिःशुचिःशौचतेजसतिकर्मणइतिनिरुक्तात्प्रदीप्तोदरज्वलनःस्नातश्चापितुंचित्स्वरूपनिष्ठेतनित्यमु
न्मनुपस्थितं॥पूजयेदशनैर्नित्यंभुंजीयादविकुत्सयन्॥———— भुंजीतनजुगुप्सितं॥दद्याच्चपूजयेच्चै
वशुक्लयाचशुचिःसदा॥कृत्वैतन्नास्तिकिंचित्स्यान्नजंव्याधिमाप्नुयादित्यग्निधानात्तत्पूर्व्यपाणिःआत्मसु
खार्थरसस्निग्धस्थिरहृद्यभगवदुपहितान्नहस्तःत्वंसेवस्वआत्मसूर्यंसूर्यसदृशंसेव्यमात्मानंसंतोषयननुन

आ·बो· १२६

पूर्वेद्युरात्मनइति निषेधाद्रात्मार्थपचनस्यपापहेतुत्वादमोघमन्नंविंदतेऽप्रचेताःसत्यंब्रवीमिवधइत्सतस्य॥ना
र्यमणंपुष्यतिनोसरायंकेवलाघोभवतिकेवलादीतिश्रुतेः अर्यमणंसूर्यंतद्हिभूतीःप्रजापुत्रादीश्वसवामहेवयंत
वमेवसंतोषयामःउत्तरार्द्धव्याख्यातंउपलाग्नेइतिमंत्रार्थेत्वत्रहेअग्नेजाठराग्न्यात्मकपुनर्मआत्मापुनरायुरागात्पु
नःप्राणःपुनरासूनमागात्वैश्वानरोरश्मिभिर्वावृधानःअंतस्तिष्ठत्वमृतस्यगोपाइतिश्रुतेः आसूनमभिप्रेतंजठरा
ग्निंप्राप्यवान्नेनप्राणादेत्यादिश्रुतेःशेषंसमानं॥९८॥किंवदोषांत इतिदोषातेतमसिविनाशितेप्रसन्नःसूर्य
त्मादिज्ञातुसमूलवस्तुजातं।संपाद्यप्रयतःहृदस्तद्ध्यैमिषंभूदेवाविगतभयाश्चरंतुभूमौ॥९९॥दोषांतेदोष
रात्रिःतस्याअंतेउषःकालेतमसिअंधकारेविनाशितेकेनत्येपक्षायांसन्निहितत्वादुषःकालेनैवध्वंसंप्राप्तेइत्य
र्थःप्रसन्नः नीहाराभावेनिर्मलःसूर्योत्मासूर्यएवात्मासमस्तवस्तुज्ञातंसकलेार्थसमूहंदिज्ञातुदर्शयतुकिंचभू १२६

आ·बो· १२७

हृतंहृत्सहचारिमनःयेषांतानिताहृच्छानिसंतिदृष्टमात्रप्रीतिकरंपरिणामसुखत्वात्तद्ध्यैतस्यात्मनःपूजा
संपादकंरेतऊर्ध्वनयनंसंपाद्यनिरंतरंकुलाद्ध्वरेतस्कान्येवभूमौमत्कविषयेपदेहेविगतभयाःऊर्ध्वरेतस्कत्वादे
वमरणादिभयरहितानिर्मलायत्नंबलंपुंसांशुक्रोपनंचजीवितमितिवैद्यकशास्त्रात्चरंतुविषयानालंतुकामा
दिबंधाभावादुःखाभावइतिभावः॥९९॥दुःखंदुरीकर्तुमिदंसर्वदादेहशोषणं॥:आत्मसूर्यतर्पंद्वाद्यविभू
तिरस्कृतसूनृता॥५॥ ॥इतिकालोपनामकाहिताग्निश्चनाथभद्रात्मजगोविंदभट्टकृतेआत्मार्कबोधे
आत्मार्कोपासनकथनंनामपंचमऊपदेशः॥ ॥इदानींगुरुशिष्यसंवादमुपसंहरन्शिष्यस्यकृता
र्थत्वमाहइतीतिइतिवदतिगुरौस्वशिष्यवर्यःप्रसन्नःसपदिविगतशंकःपूजयामाससूर्यं॥नियततरणिभू १२७
क्तिप्राप्तबुद्धिःसमंताद्धिततमसिनष्टेस्वात्मरूपंददर्श॥९०॥इत्थंप्रकारेणस्वहितोपदेशेनपरमार्थ

देवाःभुविदेहद्योतमानाःप्रयतहृदःशुद्धचित्ताःसंतःइष्टंसूर्यप्रीतिकरंतद्ध्येसूर्यंहृद्यकंसंध्यासमयेजलोत्क्षेपणंसंपाद्यकृत्वानदुहवाएतेब्रह्मवादिनःपूर्वाभिमुखाःसंध्यायांगायत्र्याभिमंत्रिताआपउर्ध्वंविक्षिपंतिताएतांआपोवज्रीभूत्वातानिरक्षोऽसिमंदेहारुणहीपंप्रक्षिपंतियत्प्रदक्षिणंप्रक्रमंतितेनपाप्मानमवधून्वंतीतिश्रुतेःभूमौभूत्वलेविगतभयाःविहितसर्वकर्मयोग्यत्वापापीयसोममकर्मफलंकथंभविष्यतीतिचिंतारहिताःसंध्याकर्मणासर्वपापक्षयात्संध्यामुपासतेयेतुसततंशंसितव्रताःविधूतपापास्तेयांतिब्रह्मलोकंसनातनमितिवचनात्तत्रंतुगछंतुवाभक्षयंतुवाफलस्नेहनकर्मकुर्वंतुवाअथाध्यात्मंरोषासत्वरजस्तमोगुणाःतद्वृत्तीमायातस्याअंतेतत्त्वज्ञानेतमसितत्त्वज्ञानेनविनाशिते सतिसूर्यात्मासद्वाआराध्यःआत्मासमस्तंपरिदृश्यंवस्तुआत्मस्वरूपंसच्चिदानंदात्मकंजातंमनसिप्रादुर्भूतंदृशानुकिंचभूदेवाःभुविदेहद्योतमानानिइंद्रियाणिप्रयतहृदःप्रयतंश्रेष्ठानि

साधनेप्रवृत्तिकरणादात्मीयगुरोरतुलंघनीयवचनेउपदेष्टरिवदतिआत्मसूर्यमहिमानंकथयतिसतिवर्तमानकालनिर्देशात्अनुपरतेसतीतिगम्यतेयस्यचभावेनभावलक्षणमितिसप्तमीसपदिष्टावदुपदेशोत्तरकालेमविकतशंकःप्रध्वस्तसंदेहःअतएवप्रसन्नःनिर्मलचित्तःशिष्यवर्यःशिष्येषुउपदेश्येषुस्वल्पश्रवणेनबहुज्ञत्वात्श्रेष्ठःसूर्यश्चैतन्यभावंपूजयामासगायत्र्युपासनप्रकारेणासिषेवेततःनियततरणीभक्तिःनियतास्थिरातरणीसंसारासिंधुतरणोपायभूतेसूर्यभक्तिरारा ध्यबुद्धिर्यस्यसःअतएवप्राप्तबुद्धिःउत्पन्नतत्त्वविद्यःततएवसमंतात्ववाततमसिनष्टेजीवचैतन्यस्यमलिनसत्वप्रधानाःविद्योपाधिकत्वात्सर्वत्राध्यात्मिकेप्रपंचेगुरुत्वादावरकत्वाच्चव्यापकेअज्ञानआछादनेध्वंसेसतिस्वात्मरूपंददर्शस्वस्याध्यात्मिकप्रपंचसर्वोत्कर्षणाभावयामः॥११॥इदानींविमेकर्णिपतयेतानिचक्षुषेदृज्योतिर्हृदयंआहितंयत्॥विमे

मनश्चरति दूरआधीः किंस्विद्दृश्यामिकिमरूपनिष्पेमेकणीविपतयतः मम श्रोत्रे अनात्मविषया न्प्रतिविपरीतग
छतः मम चक्षुर्दृष्टिर्वितथाविपरीतंग छतियद्युतितात्पर्यभूतंहृदयेअंतःकरणेआहितंस्थापितंस्तितंवाज्योतिरा
त्मभूतंचैतन्यंइदंयोगिभिर्दृश्यंविपरीतंश्रोत्रा द्यनभिमुखमसीत्यर्थः ननुमनसोभ्यंतरत्वात्तत्तज्ज्योतिर्ग्रह
कंस्यादित्यतआहमेमनःविचरतिममांतःकरणंविपरीतंइंद्रियाधीनंसत्गछतिअतएवदूरआधीःआत्मानि
विप्रकृष्टदेशेसर्वत्रप्रसरणशीलाबुद्धिर्यस्यताहशाहंकिंस्विद्दृश्यामिस्वित्संदेहेआत्मज्योतिर्विषयकंकिंव
दृश्यामिनकिमपिसाधनाभावात्एवंचकिमनूमनिष्पेउपदपूरणार्थः तथाकंवाचंतयिष्यामिसाधनाभावा
दितिश्रुत्यर्थविचारणेनइंद्रियाणिप्रमथीनिहरंतिप्रसभंमनइतिभगवदुक्त्यर्थावधारणेनचसुदुर्निग्रहं १२८
मनोमत्वातन्निश्चलंकर्तुंसकलार्थप्रदेआत्माकेवलंभिःश्लोकैःप्रवर्तनियदीयतियस्मैयद्धाधीनंभवतिसके

साधनेप्रवृत्तिकरणादात्मीयेगुरौअनुकूलं मनोयवचनेउपदेष्टरिवदतिआत्मसूर्यमहिमानंकथयतिसतिवर्तमानकाल
निर्देशात्अनुपरतेसतीतिगम्यतेयस्यचभावेनभावलक्षणमितिसप्तमीसर्वादिष्टादुपदेशोत्तरकालमेवविज्ञानस्य
कःप्रध्वस्तसंदेहःअतएवप्रसन्नःनिर्मलचित्तःशिष्यवर्यःशिष्येषुउपदेश्येषुखल्वश्रवणेनबहुजन्मात्श्रेष्ठःसूर्य
श्चेतनप्रभांवृजयामासगायत्युपासनप्रकरणेसिषेवेततःनियतनतरणेभक्तिःनियतास्थिरातरणेसंसारसंतरणे
पायभूतेसूर्यभक्तिराराध्यबुद्धिर्यस्यसःअतएवप्राप्तबुद्धिःउत्पन्नत्वविद्यःततएवसमंतात्वितततमसिनष्टे जीवचै
तन्यस्यमलिनसत्वप्रधानाविद्योपाधिकत्वात्सर्वत्राध्यात्मिकेप्रपंचेगुरुत्वादाधारकत्वाच्चव्यापकेअज्ञानेआधारे
ध्वस्तेसतिस्वात्मरूपंदृश्यंस्वस्याध्यात्मिकप्रपंचस्यात्मनश्चात्माआश्रयःआधिदैविकप्रपंचःसूर्यश्चेतनरूप्यते
सायेनसच्चिदानंदलक्षणंप्रत्यक्षीकृतवान्कृतार्थोबभूवेत्यर्थः अत्रजितेंद्रियत्वंविनयस्यकारणंगुणप्रकर्षोविनयादवा

प्यते॥गुणप्रकर्षेणजनोनुरज्यतेजनानुरागेणभवंतिसंपदइतिवत्कारणमालालंकारः॥११०॥इदानींस्वस्मिन्नपिसिद्धिमाशास्यानःसाधनसंपत्तिंविनिवेदयतितथेतितथास्मभ्यंज्ञानंदिशातुतरणिःस्वात्मविषयंयतोनोऽस्मदंहसोनोहस्तंइवविनाशंहुततरं॥वयंस्यामपतयोरयीणांनियंतमनसःक्षुद्रतनवानमस्तुमौनिस्यंनिपतनभयाद्दुःखजलधौ॥१११॥तरणिःसूर्यस्तथापूर्वोक्तंसंसारमुक्तिजनकेस्वात्मविषयंस्वस्यसूर्यस्यात्मानंगतासाधारणरूपःद्वादशप्रकारकःसच्चिदानंदलक्षणश्चतदाश्रितंज्ञानंचैतन्यंअस्मभ्यंगायत्र्युपासकेभ्योजीवेभ्योदिशातुददातुननुकिंतज्ज्ञानंतत्राहयतोयस्माज्ज्ञानात्ततमइवयथासूर्यप्रकाशात्बाह्यांधकारोविनश्यतितथामोहःअहंकारोमीत्याद्याकारकःस्वात्माज्ञानंचाभ्यंतरःद्वततरंविनाशंगच्छतात्॥भ्रमेवप्रध्वस्तोभवेदित्यर्थः समष्टिःसूर्यएवसर्वंकरोतिभवतीतिनिश्चयात्ततथाचश्रुतिः विश्वतश्चक्षुरुतविश्वतोबाहुरुतविश्वतस्पात्॥संबाहुभ्यांधमतिसंपतत्रैर्द्यावाभूमीजनयन्देवएकइतिदेवःसमुदेवोविश्वतो×१ १३९

महित्वात्द्योतमानत्वाच्चसर्वेषांप्रत्यक्षःएकःअद्वितीयःसूर्यःव्यष्ट्यभिप्रायेणविश्वतश्चक्षुर्जीवनेत्रैःसर्वत्रदृष्टिर्यस्यसःतथाऽतोविश्वतोमुखःअपिजीववदनैःसर्वत्रभोजनंयस्यसउतेत्यनेनविश्वतःश्रोत्रःविश्वतोघ्राणःविश्वतस्त्वगितिगम्यतेतथाविश्वतोबाहुःजीवहस्तैःसर्वत्रकर्मयस्यसःतथाऽतविश्वतस्पात्अपिजीवचरणैःसर्वत्रगतिर्यस्यसःउतस्यनेनविश्वतोबाहुविश्वतोपायुःविश्वतऊर्ध्वःस्थइतिगम्यतेएतादृशःसन्बाहुभ्यांबाहुकर्मभ्यांसंधमतिसंबाधतेअभ्यांकर्मणीतिनिरुक्तात्सर्वकर्मप्रवर्तकाभ्यांतेजोमयजलमयमंडलाभ्यांपतत्रैःकिरणैःसंधमतिद्यावाभूमीउभौलोकौप्रकाशतिकिंकुर्वन्संजयन्रात्रौसुप्तान्ज्योतिर्मयालोकान्सम्यक्दीपयन्दिशातुभूमिस्थान्लोकान्सम्यक्चेतयन्व्यष्ट्यभिप्रायेणतुबाहुभ्यांबुद्धिमनोभ्यांपतत्रैःइंद्रियैःद्यावाभूमीसंधमतिजयतिकिंकुर्वन्संजयन्विहितानिकर्माणिसाधयन्यद्वाविहितैःकर्मभिरुभेलोकावुत्थाद्यान्निस्यर्थःयतःदुःखजलधोदुःखो

डःखप्रचुरःसंसारःसएवजलधिर्दुःस्तरत्वात्समुद्रःतस्मिन्निपतनभयात्नीचैर्मनाविंतादुःखात्अतएवभुद्भूतनवः
पथ्यभक्षणैररोगशरीराःयद्यपिसर्वाशुचिनिधानस्यकृतघ्नस्यविनाशिनः॥शरीरकस्यापिकृतमूढःपापानिकुर्वतः
इतिअत्यंतमलिनोदेहोहेहीचात्यंतनिर्मलः॥उभयोरंतरंज्ञात्वाकस्यशौचंविधीयत इतितथापिशरीरस्यविनाशोभकत्वा
नश्भुद्भूतमिहाभिप्रेतमितिबोध्यंतदुत्तरंप्रश्नोत्तरमालायांकःपथ्यतरोधर्मःकःशुचिरहयस्यमानसंशुद्धं॥कःपंडितोविवे
कीविषमवधीरितायुरवइतिअतएवनियतमनसःअप्रमत्तचित्ताःतथाचश्रुतिःविश्वाहात्रासुमनसःसुचक्षसःप्रजावं
तोअनमीवाअनागसः॥उद्यंतंत्वामित्रमहोदिवेदिवेज्योग्जीवाःप्रतिपश्येयमसूर्यंइत्यस्यार्थेःसर्वाण्यहानिलोलक्षी
कृत्यप्रसन्नचित्ताःप्रदीप्तबुद्धयःपुत्रपौत्रादिसंततिमंतःभृत्यादिजनसंपन्नश्चधर्मैश्वर्यवैराग्यज्ञानसंततिर्मतोवाअमीवंसंवि
तंपापंआगःक्रियमाणंपापंताभ्यांरहिताःजीवाअद्याप्यविद्योपाधिकावयंगायश्युपासकाःहेमित्रमहःमित्रंसर्वेषांस १४०

कलकार्यसेःघोरंकंचाभ्यंतरमलनाशकंवामहस्तेजोयस्यसःताहशप्रभावस्सूर्यदिनेदिनेउद्गछंतंलोचिरंप्रतिप
श्येयमअविद्योपाधिनिवृत्तयेध्यायेमेतिज्योग्जीवाइतिधीयोजनीयंएतादृशावयंसेवकाःभूयोभूयःपुनःपुनःनमस्कु
र्मःतरणिंसर्वोत्कर्षेणभावयामः॥९९॥विमेकर्णापतयतोविचक्षुर्वीदंज्योतिर्हृदयाहितंयत्॥विमेमनश्चरतिदू
रआधीःकिंस्विद्वक्ष्यामिकिमुनूमनिष्येमेकर्णाविपतयतःममश्रोत्रेअनात्मविषयान्यतिविपरीतंगछतःममचक्षुर्ह
दिविपरीतंगछतियत्श्रुतितात्पर्यभूतंहृदयेअंतःकरणेआहितंस्थापितंस्थितंवाज्योतिरात्मभूतंदेवतान्यं
हृदंयोगिभिर्दृश्यंविपरीतंश्रोत्राद्यनभिमुखमतीत्यर्थःननुमनसोभ्यंतरत्वात्तज्ज्योतिर्यीहकंस्यादित्यतआह
मेमनःविचरतिममोतःकरणंविपरीतंइंद्रियाधीनंसत्गछतिअतएवदूरआधीःआत्मातिदेशकृद्देशेसर्वत्रप्र
सरणशीलाबुद्धिर्यस्यतादृशोहंकिंस्विद्वक्ष्यामिस्विद्वसंदेहआत्मज्योतिर्विषयंकंकिंवदिष्यामिनकिमपिसाधनाभावा

तृणवंचकिमनुमानित्थंउपदृष्टृणार्थंतथाकिंचाचिंतयिष्यामिसाधनाभावादितिकृत्यर्थविचारणेनइंद्रियाणिप्रमाथीनि
हरंतिप्रसभंमनइतिभगवदुक्त्यर्थंचधारणेचसतिनिग्रहंमनोमलातन्निश्चलंकर्तुसकलार्थप्रदेआत्माकृष्ट
भिःश्लोकैःप्रवर्तयितियद्दीयतियद्दीयिष्यतीतिदानधीर्नभवतिसकलंवस्तुजगतिस्थिरप्रज्ञाएवंहृदयनिगदंतिश्रुतिविदः।
अतस्तंप्रेरयत्वंशरणमनिशंसंपरिदृढंत्रैमंत्यक्त्वासर्वमहतिसुविरंतिष्ठमहसि॥११२॥हृद्दयेहमनःजगतिभूतो
केश्रुतिविदःरथःक्षोणीयंताचातधृतिरगेंद्रोधनुरथारथांगेचंद्रार्कौरथचरणपाणिःशरइति॥दिधक्षोस्तेकोयंत्रिपु
रतृणमाडंबरविधिर्विधेयैःक्रीडंत्यानरवपुषपरतंत्राःप्रभुधियःहरेर्यात्रिपुरतृणमिवानायासेनदग्धव्यं
ततद्दिधक्षोःदग्धंमिछोस्ततवाडंबरविधिःमहासामग्रीसंपाहनप्रयत्नः इतीथंकोयंकिमर्थीयंइतीतिकिंक्षोणी
भूमिःरथःस्यंदनोभवतिशतधृतिर्ब्रह्मायंतासारथिर्भवतिअगेंद्रःपर्वतराजोहिमालयोधनुर्ज्यापेभवतिचंद्रार्कौ

सोमसूर्यबिंबेरथांगेचक्रेभवतः रथःचरणपाणिश्चक्रपाणिर्विष्णुः शरोबाणोभवतिउक्तमर्थंदृढयतिरघुनिश्च
येनप्रभुधियःसमर्थस्यबुद्धयः कर्माणिचविधेयेरवश्यकर्तव्येरुपकरणैः क्रीडंत्योरमाणाः संतिनपरतंत्राःनेवो
पकरणधीनाः संतिस्वतंत्रात्तव्यस्यभिप्रायेणतुत्रीणिपुराणिस्थूलसूक्ष्मकारणशरीराणितेषांभेदकंज्ञात्रिपु
रंशरीरत्रितयंस्वल्पत्वात्तृणमिवततद्दिधक्षोःभवतुमिछोः दाहस्त्वत्राधिष्ठानप्राप्तिर्निबंधनःतेइतिआ॰ बंडु
रविधिः कोयंभवतिइतीतिकिंक्षोणीतनुःरथोभवतिशतधृतिः गुरुःरसनंचयंताभवतिजगेंद्रःप्रमाताधनुर्भ
वतिचंद्रार्कौमनोबुद्धीरथांगेभवतःरथचरणपाणिः सोमसूर्यबिंबेकर्ममार्गज्ञानमार्गाभ्यांउपास्यमनोबुद्धीत
येवशोधनीयेतेउभेरथचरणेपाणीोगत्यनुपासनमहिम्नावशवर्तिनीयेनसःसत्वगुणः शरोभवतिस्वयं
प्रकाशसामर्थ्यात्शेषव्याख्याताथैकैकृतार्थज्ञाःयद्दासप्रयुंजंतिरथचक्रमेकोअश्वोवहतिसप्तनामा।

त्रिनाभिचक्रमजरमनर्वयत्रेमाविश्वाभुवनाधितस्थुः विषुवानूनेषतुलात्मकः तद्दृत्तंमध्यमंततउत्तरतस्त्रीणि
दृषभमिथुनकर्कीलकानिदृत्तानितत एवविषुवद्दृत्तादक्षिणतस्त्रीणिवृश्चिकधनुर्मकरात्मकानिदृत्तानितत्रमकर
दृत्तमारभ्योदक्संस्थेषुकुंभमीनमेषवृषभमिथुनकर्केषुतथाकर्कदृत्तमारभ्यदक्षिणासंस्थेषुसिंहकन्यातुलावृश्चिक
धनुर्मकरेषुमासेमासेसूर्यउदगयनेदक्षिणायनेयथाक्रमंभवतितथाचविषुवद्दृत्तंमध्यमंतदुभयतस्त्रीणित्रीणिएवं
सप्तनिदृत्तानिज्योतिःशास्त्रेगोलेप्रसिद्धानितथाचमुखादित्यसप्तकेतिश्लोकेसप्तदृत्तस्थस्यसूर्यस्यैवंसप्ताश्वत्वमि
तिज्ञेयंतानिसप्तदृत्तानिएकचक्रंएकंसत्संबिंबत्वात्अभ्यात्मिकचक्रंतुतत्प्रतिबिंबत्वादलीकंभवतिचक्रंहादशरा
श्यात्मकंयस्मिन्नुतरथंप्रवहवायुं नेतिसंबंधेतिसप्तनामासप्तानिछंदांसित्यांतानिव्याहृतिरूपाणिनामानिस्वा
नानिअभिधानानिचयस्यसः एकःसमष्टित्वात्बिंबत्वाच्चसुख्यः स्वतंत्रत्वादसहायश्चअश्वःसूर्यःअशःकस्मादश्नु १५२

तेध्वानंमहाज्ञानोभवतीतिवेतिनिरुक्तात्अथयोसौतपतीएषोश्वःश्वेतोरूपंहित्वाश्वाभिधान्यपिहितेनात्मना
प्रतिचक्रमडमंवोनयामइतीतिब्राह्मणात्कआदित्यानूइमंसूर्यंप्रतिनयामःअंगिरसोवयमेनंनयज्ञेनप्रायामः
यष्टोनुआदित्यानुदारानूयद्वासूर्यभावंप्राप्तानूअंगिरसःप्रदीप्तस्वरूपाःयेगाराआससतेंगिरसोभवन्तितिब्रा
ह्मणाद्यहतिदधक्कामतिकंदधत्रात्रिनाभिचक्रंचैत्रादयश्चत्वारोमासाएकनाभिश्रावणाद्यश्चत्वारो
द्वितीयामार्गशीर्षाद्यश्चत्वारस्तृतीयाएतेनत्रिनाभिचक्रंसंवत्सरोवर्षीदेंमंतद्दतीतिनिरुक्तव्या
ख्यातंएवंतिस्रोनाभयोयस्मिन्नतद्दादशराश्यात्मकंकीदृशंअजरंविनाजारंरहितंजरात्कृतिर्जरतेःस्कृतिकर्म
णइतिनिरुक्तात्जरास्कृतिर्भवतिसर्वाश्रयत्वादप्रमेयत्वेनस्कृतिरहितंवपुनःकीदृशंअनर्वाअर्वतोश्वाःतद्र
हितंलोकेश्वाःरथचक्रेकर्षंतेतद्दिदंचक्रंनभवतिरथिनएवोद्दत्वात्अतएवाक्षंएकोऽक्षश्चोवहतिसप्तनामे

तिअनर्वमित्यत्रैवनिपातनादकारांतंपदंयत्रसबोधिष्ठानेहृदाख्यात्मकेकालचक्रेमाविश्वाभुवनाहृदयानिस्थू
लशरीराभिमानवंतिभूतानिअधितस्थुस्तदाश्रितान्येवासन्नतस्यविवक्षातोव्यक्ष्यभिप्रायेणतुसप्तस्वप्नासशोणि
तास्तिस्रआसुमज्ज्ञरतीसिएकचक्रंरथंउपासनाजन्यफलभागितयासुरंधबुद्धिमनोदशेंद्रियमंडलंयस्मिन्नतं
प्राणंयुंजंतिसप्तनाम्नाश्वमनुजिघ्रन्पश्यन्शृण्वन्स्पृशन्मुंचन्भानंरन्नेवमात्मकाभिधानः एकोगायत्र्यु
पासनाजन्यमोक्षभागितयामुख्यःअश्वोजीवोवहतिकिंवहतितत्राहत्रिनाभिचक्रंतिस्रःपित्तःश्लेष्मवातात्मि
कानाभयोनाड्योयस्मिन्बुद्धिमनोदशेंद्रियमंडलंकीदृशीअजरमनर्वंयत्रयद्यत्रवाढायत्रेमाविश्वा भुव
नाधितस्थुः यत्रबुध्यादिहृदशमंडलेतथाचसांख्यस्मृतिसमदशेकलिंगंव्यक्तिभेदःकर्मविशेषात्तद्धि
ष्ठानाश्रयेदेहेतद्धृदातद्धृदइतिसप्तहृदाबुध्यादयोहृदशपंचतन्मात्राणिचदधिष्ठानाश्रयेतस्यकर्मणो १४३

धिष्ठानमाश्रयभूतंलिंगशरीरंतस्याधारभूतेएवंवेदार्थज्ञाःअतएवस्थिरप्रज्ञाःआत्मकैनियतबुद्धयःपंडि
ताःएवमनेनप्रकारेणनिगदंतिविशेषणकथयंतिस्वंकथंकालंसंहरणगुणयुक्तपुत्रादिपश्वादिक्षयहीन
ज्ञानाधीनंभवतियस्मात्मार्कस्वयंविकीर्षोःषष्पिपालयिषावासंजिहीर्षोर्वातत्परतंत्रमस्तिनथानशक्तिःयद्यद्यत्र कर्म २
हन्तुरगात्रभिसर्पे। सर्वंतदिंद्रेतवज्रादितिहन्तृहन्तृतंमोमे चेचक्ष्येहोतुअज्ञानंकामंवहतवानतसंबुद्धिःअ
तःकारणात्वंसस्रष्टसतत्तमात्मार्कंरारणंरक्षकंअनिशंअविद्यमानानिशास्वात्मदर्शनरूपोयस्यतंस्वेहि
तकारिणंतडुक्तंपरापिहितवान्बंधकंधूरप्यहितःपरः॥अहितोदेहजोव्याधिर्हितमारण्यमोषधमितिपरिह
रंसमर्थंप्रभोपरिहरइत्यनुशासनात्प्रेक्ष्ययथार्थंज्ञात्वासर्वंमंअन्यत्रसर्वत्रविषयेषुप्रसरणंयुक्का
नान्विस्रस्यत्यर्थःमहतिसर्वोत्कृष्टेमहसिप्रकाशरूपेआत्मार्कतथाशक्तिःवणमहांश्चसिरयुबन्ध

रित्यमहांऽआसि॥महसेसतोमहिमापनस्येतऽइदेवमहांऽअसीतिवऽइद्वारादेवोप्रत्यक्षवचनोपनस्येतइन्यतेव्यष्टोतु
हेसूर्य आत्मनूत्वंबष्महानसिकुवइत्येषोक्षायांसंवोधयतिहेआदित्यअस्तिःदेवोअवरवंऽनेद्यतिस्येतिमास्था
मितिकितोत्यनुशासनात्दितिःकार्पण्यंतद्दिरोधिओदार्यंवतेआगतआदित्यदित्यादित्यपत्कृत्तरपदाद्व्यञ्
त्यनुशासनात्नतोबष्महानसिहेमहःदेतन्यसतसेसर्वेवाधावधिभूतत्वात्सत्यस्यतवमहिमासर्वावभा
सकत्वरूपःपनस्यतेअतएवऽइदेवसाक्षाद्दृंप्रत्ययेनद्योतमानमहानसिकमन्यद्दृक्व्यंतवसर्वसाक्षिस्वा
दित्यर्थः सुचिरंतिष्ठसर्वदानिरंआत्माकेमेवस्मरत्यर्थः॥११२॥जगद्दृष्टेतिजगद्दृष्टानित्यंचरतिविपुलव्योमनिर
विःसंसेवादक्षाणांवितरतिमनोवांछितंमहः॥अतसंप्रे०॥११३॥हेविपुलमहन्परममहतोप्यात्मार्कस्यत्राह
कलादणोरपिमहत्वमुपचरितंयद्वाउदारहृदयरविरात्मार्कःजगत्लोकत्रयात्मकंस्थूलसूक्ष्मकारणशरी

ररूपंचदृष्टात्मनितिता च्छीलं दिव्यर्थंसुतन्यपश्यन्त्स्वन्व्योमनिविभाषाऽश्योरितिपक्षेअल्लोपाभावःअंतरिक्षे
अंतःकरणेचनित्यंचरतिनिरंतरंगच्छतितथाचश्रुतिः आरुक्षेनरजसावर्तमानोनिवेशयन्नमृतंमर्त्यंच॥हिरण्ययेन
सवितारथेनादेवोयातिभुवनानिपश्यन्नितिअस्याअर्थः रुक्षेनअहश्चरुक्षरात्रिःशुक्लंचाहरर्जुनमितिनिरुक्तात्
रात्रिरूपेणागमनेनरजसाज्योतीरजउच्यतइतिनिरुक्तात्दिनरूपेणागमनेनआवर्तमानःपुनःपुनरागच्छन्अन्त
रात्रौदिवाज्योतिर्मयंलोकंनिवेशयन्यथाप्रदेशं स्वयंनूतथामर्त्यंमर्त्यलोकंदिवाभूमौनिवेशयन्स्थापयन्
हिरण्ययेनज्योतीरूपेणरथेनमंडलेनवरूतस्तत्रब्रह्मांडालोकेनरथेनाहिरण्यशब्दस्यत्रब्रह्मांडवाचित्वात्भुवना
निभूम्यंतरिक्षस्वर्गरूपाणिपश्यन्साक्षात्कुर्वन्देवःप्रत्यक्षद्योतमानःसूर्यआयातिआगच्छतिव्यश्नोतुरूपे
नकर्ममार्गेणरजसाज्ञानमार्गेणअमृतंलिंगशरीरंमर्त्यंस्थूलशरीरंहिरण्यवर्त्मियेणरथेनबुद्धिरूपेणवरूत

तत्तत्पिंडात्मकेनरथेनभुवनानिस्थूल[illegible]सूक्ष्मकारणशरीराणिशेषंसमानंकिंचहेमनःइहभूलोकेदेहंत्यक्त्वेत
वादक्षाणांस्वस्यात्मार्कस्यसाक्षात्सेवाग्निहोत्र[illegible]होमादिःजपध्यानादिश्चरस्यस्निग्धास्निरहस्यान्नभोजनादिश्चत
त्रदक्षाःकर्तुसमर्थाःतेषांवांछितंभोगस्वर्गापवर्गरूपंवितरतिददातितथाचश्रुतिःपृथग्यन्प्रथमदिवद्रुतयोकृण्वतश्च
वस्यानिदुष्टराःनयेशंकुर्यस्तियांनावृमारुहमीमेवेतन्यविशंतकेपयइतियेप्रथमाःब्राह्मणादिवद्रुतयःदेवार्थद्रुतय
आहुतयायेषांतेयायज्ञकाःध्रुवस्यायशस्करणियद्वाअन्नेनामसुपाठात्श्रवोनंतस्यसंपादकानिदुष्टराद्रुरुंक्रा
प्यन्यैरितिनिरुक्तात्दुष्कराणिकर्माणिज्ञानानिचक्रमुरुक्तवंतस्तेहिरण्यशरीराःहिरण्यशरीरवुध्दिःस्वर्गलो
कमेतीतिब्राह्मणात्पृथक्दुःखप्रचुरा[illegible]संसाराद्विन्नाःसंतःप्रायुनकर्मफलंभोगस्वर्गापवर्गरूपंप्राप्तपंतःअथाय
ज्ञकानूप्याहुयेब्राह्मणाःसंतःयज्ञियांनावंगंयारूपांतरिंआरुहंआरोढुंनशक्नुवंतिकुत्सितसमर्थाविभ्रुवंतेब्राह्मणाःसंतोपि

ईमेवदेहेवनुपरलोकेन्यविशंतखगादिरेतोतेभेभ्यमृतेदेहप्रविष्टाःअतएवकेपयःकुत्सिताइत्यर्थःअतस्तंप्रेक्ष्य
तंशरणंमनिद्यांस्वंपरिहृतंधर्मंसुत्का सर्वमहतिसुचिरंतिष्ठमहसि॥११३॥स्वरोगघ्राइतिस्वरोगघ्नालोकाःश्रुतिवि
हितपूजादिकुशलायतोलब्ध्वाकामानूसुखिनइहतिष्ठंतिसुदृढाः॥अतस्तंप्रे॥११४॥स्वरोगघ्नाःस्वस्यशरी
रस्यरोगमामयंघ्नंतिनाशयंतितेआरोष्यकामाइत्यर्थःश्रेतोपिश्रुतिविहितपूजादिकुशलाःवैदिकानुष्ठानाधा
नतत्पराःलोकाःब्राह्मणाइत्यर्थःयतआत्माकीत्यकामानूआरोग्यादिसुखमनोरथानलब्ध्वाप्राप्यसुखिनःप्रसन्नम
नसःसुदृढाःबलवंइहाःतिष्ठंतिनतुरोगनाशार्थमितस्ततोदेवांतरंगच्छंतिउच्चनद्यमित्रमरआरोहन्नुत्तरां
स्विंहद्रोगंममसूर्यहरिमाणंचनाशयतिश्रुतेःहमित्रमहःतथाभ्यलमितिश्लोकेव्याख्यातंसूर्यआत्माकंहरि
माणंधर्मादिनाशकंनेकारणंतुतादृशावानुशरीरगंहरित्वर्णंचशेपंस्पष्टंअतस्तंप्रेक्ष्यतंशरणंमनिशंस्वंपरि

दृदं श्रमंत्यस्कासर्वमहतिसुविरंतिष्ठमहसि॥११५॥पदं. तविनिपूर्वतोज्ञानार्थेसुयुरुपरिचर्यासुनिरतायतः सिद्धिंलब्धा
विदधातिविनाशंस्वतमसः॥अतस्तंप्रेक्ष्य०॥११६॥सुयुरुपरिचर्यासुनिरताःसुयुरारध्यात्मविद्योपदृष्टःएतेनाध्यात्म
विद्याविद्यानामितिभगवदुक्तेःअध्यात्मविद्यायाःश्रेष्ठंतदुपदृष्टृत्वाभमानंस्वद्योतितंपरिचर्यासुसेवासुरताःतन्मा
त्रमनस्काःशिष्याःतल्लक्षणंतुब्रह्मवारिप्रकरणेयाज्ञवल्क्यजीवहृतज्ञाद्वैहिमेधाविभुविकल्पानस्यकाः॥अ
ध्यात्मा धर्मतः साधुशक्काप्तज्ञानविनष्टा इतिअत्रविशेषणपदमहिमेवशिष्यत्वबोधाद्वैशाख्यपदेनोपात्तंस्वानार्थं
विदन्विद्वैवकार्यंयत्तत्वन्यस्मैप्रयोजनायपरंतोऽभ्यस्यंतःसंतःयतआत्माकीर्तःसिद्धिंलब्धातत्वविद्यांप्राप्यस्वतमसः
स्वानर्थहेतोःस्वरूपाज्ञानस्यविनाशंविदधातिध्वंसंकुर्वंतिकृतार्थाभवंतीतियावत्तमेवविद्वानमृतइहभवतिना
न्यःपंथाविद्यतेयनायेतिश्रुतेः परस्मैपदंतुक्रियाजन्यफलस्यपरणामित्वद्योतनायआत्मनःपरमार्थतोनित्यमुद्भव १५६

दृमुक्तसभाषत्वात्अतस्तंप्रेक्ष्यत्वंशरणमनिशंस्वंपरिदृदंश्रमंत्यस्कासर्वमहतिसुविरंतिष्ठमहसि॥११५॥क्षितीशा
इतिक्षितीशाःसंपूर्णाःसुकृतफलधातुर्भगवतोयतोलब्धाराज्यंसुजनविभवांयांतिरथिवी॥अतस्तंप्रेक्ष्य०॥११६॥सं
पूर्णाःसुकृतसंपन्नाःपन्नाःक्षितीशाःराजानःराजपुत्राबायतआत्माकीर्तःराज्यंसप्तांगंतथाचः राजधर्मप्रकरणेया
ज्ञवल्क्यःस्याम्यमात्यजनोदुर्गकोशोदंडस्तथैवच॥मित्राण्येताःप्रकृतयोराज्यंसप्तांगमुच्यतइतिलब्धापुण्येविहि
तेद्विमाप्यसुजनविभवांश्चोभनलोकसंपत्तिंरथिवीपांतिआससमुद्रंकरत्रहणेनरक्षंतिकीदृशाद्दात्माकीर्तःसुकृतफ
लधातुःसुकृतंविहितंकर्मतस्यफलंसुखंतस्यप्रापयितुःपुनःकीदृशात्भगवतःएकाग्रचित्तइतिश्लोकव्याख्या
नंएतेनस्वल्पकर्मणोपिआत्माकीर्तयहान्महतीसुखप्राप्तिर्भवतीतिध्वनितंअतस्तंप्रेक्ष्यत्वंशरणमनिशंस्वंपरि
दृदंश्रमंत्यस्कासर्वमहतिसुविरंतिष्ठमहसि॥११६॥कुसीदादाविति[illegible]सीदा[illegible]दौसम्यङ्नियतमनसस्तोषनिर्

तायतोलभ्वालाभंविपुलवसवः संतिवणिजः॥अतस्तंप्रेक्ष्य०॥११७॥कुसीदादेकुसीदंद्रव्यंधनप्रयोगःआदित्य
हणात्रूपिवणिज्यपाशुपाल्यानितत्रसम्यक्अशीतिभागोवृद्धिःस्यान्मासिमासिसबंधके॥वृणिकमाछतो
त्रिचतुःपंचकमन्यथा॥कांतारणाम्रुदराकंसामुद्राविंशकंशत॥इ
सादित्यवहारशास्त्रानुसारेणनियतमनसः लोभानभिभूतचित्ताः अतएवतोषनिरताः तोषःअधिकलाभ
तृष्णाश्रा दुःतत्रनिरतानिश्चलाःएवंभूजकावणिजः वेश्याःयतआदित्यस्यसदाएतांतिलकंस्वामिनस्तथा
महागणपतश्चैवकुर्वन्तिसिद्धिमवाप्नुयादितियाज्ञवल्क्यस्मृतिवोधितएजानुद्दोहात्माकीतूलाभंलब्धो
प्रयुक्तस्यधनस्यवृद्धिप्राप्यविपुलवसवःसंतिप्रभूतधनावंतितआत्माकीनुग्रहात्तेषांकदाचिदपिचोरादि
भ्योधनक्षयोनभवतिकिंतुवृद्धतएवेतिभावः अन्येषांवणिजांतुधनक्षयोभवत्येवदृष्टोविश्वांन्वेकनाटांअर्थ १४७

दृशाअकलापणीरभिदृष्टोयःसवीन्वेकनाटानदृष्टाःसूर्यदृशोयइमान्यहानिपश्यंतिनूपराणीतिवाऽभिभवतिक
र्मणापणीश्चवणिजइतिनिरुक्तात्तनपराणीतिपरलोकेकिंभविष्यतीतिनजानंतीत्यर्थः वेकनाटानुकुसीदिनः
वेकनाटाःखलुकुसीदिनोभवंतीतिनिरुक्तात्अतस्तंप्रेक्ष्यतंशरणमनिशंसंपरिवृढंभजस्वकासर्वमहतिसु
खिरतिघमहासि॥११७॥तथेवेतितथेवान्यलोकायदुद्दयमभीक्ष्यमतिदिनंसकर्तव्यसक्ताःकृतपरिकराः
संतिसुखिनः॥अतस्तंप्रेक्ष्य०॥११८॥आत्माकीपूजापराएवस्वकर्तव्येस्वस्वधर्मीविरोधिकर्तव्यंविविधोद्यो
क्तुंतत्रसक्ताःतन्मात्रमनस्काःकृतपरिकराःरचितोद्योगाःअन्येलोकाद्विजभिन्नाःसर्वमनुष्याःप्रतिदिनंप्रत्य
हंयदुद्दयंयस्यात्माकीस्यादिभीषंअभीक्ष्यानुलक्ष्यकृत्यसुखिनःसंतिएवंधुरात्माकीनुग्रहात्धनंषड्गु
लब्धंअद्यास्मत्तोषकउदेतिअयमेवनःसर्वमनोरथान्पूरयिष्यतीतिनिश्चित्यस्वस्वमनसोभवंतीत्यर्थः

अथवाऽऽसक्तिप्रयत्नसुखानामुत्तरोत्तरंप्रतिपूर्वपूर्वस्यकारणत्वान्नेषेवान्येलोकायदुदयमृभीष्यप्रतिदिनंत्व
कर्तव्यसक्ताःसंततंतस्तथाकृतपरिकराःसंततंतस्तथासुखिनःसंतीतियोजनीयंभवतस्तंप्रेक्ष्यत्वंशरण०॥११॥
समस्ताइतिसमस्तायइक्ताःसुपरिचितातीर्थागतमदीरादृश्यंतेनिजपदपवित्रीकृतजनाः॥अतस्तंप्रेक्ष्य०॥११॥ उदा
समस्ताःसकलाःयद्वासमीचीनआत्माकीराधकत्वात्अस्तश्चित्तलयोयेषांतेयइक्ताःयुरस्यात्माकेस्याराधकाः
योगिनःसुपरिचितातीर्थादृश्यंतेसुतरांभ्यस्तानिशास्त्रादीनिशोभनानियेसंततंतल्लिंगैःसाक्षात्क्रियंतइत्यर्थः
अतएवगतमदनष्टाहंकारादृश्यंतेअतएवोदाराःअध्यात्मविद्योपदेशाद्दातारःअहंतामतामूढत्वान्मद
नश्चदृश्यंतेऽउदारोदात्तमहंतारिनियाश्चअतएवनिजपदेपवित्रीकृतजनाःनिजपदेनात्मादिदेवेस्व १४८
ननयद्वाभिक्षाकलित्वचरणेनअपवित्राप्रशस्तःसोपिपवित्रःप्रशस्तःकृतःसंपादितःपवित्रीकृतःजनोयै

सेतादृशादृश्यंतेतथाचश्रुतिःहंसःशुचिषद्वसुरंतरिक्षसद्धोतावेदिषदतिथिर्दुरोणसत्॥नृषद्वरसदृतसद्व्योमसदब्जा
गोजाऋतजाअद्रिजाऋतमितिअस्मिन्मंत्रेआत्मकीर्तिभिःस्तूयतेतत्तदधिष्ठानोपासनात्तत्पदप्राप्तयेतथाहिहंसः
समष्टिःसूर्यःशुचिषत्शुचौतेजोमलान्वितेदिवसीदतीतितिष्ठतिदिनदृश्यइत्यर्थः यद्वासीदतिक्लेशयतिअपरिछिन्न
स्यात्माकेस्यपरिछेदकरणात्क्लेशाःयथासर्वचरस्यपुंसःकारागृहनिरोधात्क्लेशाःएवमुत्तरत्रहंसः व्यष्टिरात्माशुचि
षत्श्रवणमननविद्याध्यासनेनज्वलितकारणशरीरभासमानोभवतिवसुःलोकवासार्थंस्थितःसमष्टिर्वायुरूपः
सूर्यःअंतरिक्षसत्लिंगशरीरस्थितोभवतिहोतायावाहनस्यकारयिताअमुमावहामुमावहत्यावाह्यतितंदेवहोतृ
होतृत्वमितिब्राह्मणात्अधिदैवंतेकर्तृत्वंचअग्निमग्नआवहतिकल्पसूत्रात्समष्टिरग्निरूपःसूर्यःवेदिषत्आदित्यवि
दारभ्यमेवस्थितःतत्रजाज्वल्यमानस्तिष्ठतिहोतात्वयिष्टिःस्वजीवनायमात्रादीन्यालंकानामंश्रयितादेहीआत्मावेदिषत्
×उभयोर्द्यावापृथिव्योरंतरालेसदागच्छतिवसुर्व्यष्टिःप्राणरूपआत्मा अंतरिक्षसत्×३

आ-बो-
१४९

तनुस्थो भवति अतिथिः अध्वनीनः दुरोणसत् दुरोणइति गृहनाम दुरा भवंति दुरस्पा इति निरुक्तात् गृहास्तिष्ठतीत्यर्थः
वर्तिसूर्यप्रीतये हूयमानीय इतिभावः अध्यात्मेतु अतिथिः अतसातत्यगमने इति धातुपाठात् निरंतरं सन्मार्गे प्रवर्तमानः मनोरूपआत्मा दुरोणसत् दुःखेन उरति गच्छति अधिदैवतेतु अतिथिश्चंद्रमोरूपः दुरोणसत् दुरितक्षीणां प्रवृत्तेरेकालं
तिष्ठति नक्षत्रव्यष्टिरूपेण समस्तासु तिथिषु मनुष्येषु भासमानः समष्टिः परमात्मासूर्यः अतएवनारायण इत्युच्यते नृ
षत् व्यष्टिमनुष्यशरीरेतिष्ठति आत्माअतएवनर इत्युच्यते वरसत् वरं श्रेष्ठं शुद्धसत्त्वप्रधानं मायारूपं
समष्ट्यात्मकं वर्तिष्ठतिसूर्यः अतएवईश्वर इत्युच्यते वरसत् श्रेष्ठं व्यष्टिमलिनसत्त्वप्रधानाविद्यावच्छिन्नआ
त्माअतएवजीव इत्युच्यते ऋतसत् ऋतं सत्यंमायानुपहितचैतन्यं साक्षात्तदाश्रितःसमष्टिः सूर्यःअतएवसर्वसा
क्षीत्युच्यते ऋतसत् ऋतः अविद्यानुपहितः बिंबरूपःसूर्यः तदाश्रितआत्माअतएवव्यष्टिप्रपंचसाक्षीत्युच्यते १४९

व्योमसत् परमेव्योमन्नित्यस्यपरमे व्यवन इतिनिरुक्तात्परविशिष्टंपालनंयस्मात्तत्परमदृश्यंसत्तत्रस्थितः समष्टिःसू
र्यः व्योमसत् सत्तामात्रगम्यः समस्ताधारोव्योमा सूर्यस्तत्राश्रितःप्रतिबिंबआत्माव्यष्टिः अज्राः अजयोवाएषप्रातरुदेत्यपः
सायंप्रविशतीतिब्राह्मणात्समुद्रवासिनां दृष्ट्याद्योजातः सूर्यः व्यष्टेतु अज्राः रेतोवाआपइतिश्रुतेः सिच्यतेरत
सः प्रजाः प्रजायंत इतिच ब्राह्मणात्शरीररूपाणां दृष्ट्यारेतसोजातः आत्मागोजाः पृथिवीतथाचभूमध्यवासिनां दृष्ट्या गोः
पृथिव्याःप्रादुर्भूतः सूर्यः व्यष्टेतुअयमात्मा स्मात्शरीरादुत्पन्नः आत्मायद्वागावः किरणाःतेभ्योजातःतेजोपिंडइत्यर्थः त
व्यष्टेतुगोजाः बुध्यादिकरणेज्ञापितः ऋतजाः सुद्धचैतन्याज्ज्ञातः सूर्यः व्यष्टेतुऋतः सूर्यः तस्माज्ज्ञातआत्मात
थासत्यभयः सर्वदाकुंठितान दृश्यतइतिचेत्तत्राहअद्रिजाः अद्रिर्यंवधायकः पर्वतःसुमेरुस्तस्माज्जातःव्यष्टेतुअद्रिः
शरीरयष्टिः तस्याः जातःयद्वाअद्रिः यसनपरश्छादिकानिज्ञातथामे घाश्चाद्रयःविंशन्मेघनामस्वद्रिशब्दस्यपाठा

तेभ्योजातःसूर्यःतन्निवृत्तौप्रादुर्भूतइत्यर्थःयद्वोतुअद्रिरविद्याप्रत्युपसंस्कृतिःतथाकामाश्चेतभ्योजातःआत्मानात्मवि
वृत्तौप्रादुर्भूतइत्यर्थःननुजातस्यहिध्रुवोमृत्युरध्रुवंजन्ममृतस्येतिभगवन्नियमात्कदाचित्प्रादुर्भूतस्यापिनिरोभा
वस्यानिरोभूतस्यापिप्रादुर्भावःस्यादित्याशंक्यसमाधत्तेऋतंआत्मार्कःमायानुपहितचैतन्यंभवतिसत्यंज्ञानमनं
तंब्रह्मेतिश्रुत्यंतरात्अयंभावःऔपनिषदगायत्र्युपासनमहिम्नास्वोपाध्यविद्यानिवृत्तौजीवःसूर्यात्मकउक्तरी
त्याभवतिततश्चज्योतीरूपस्यतस्यतमःसंबंधाभावात्सर्वदारात्र्यभावएवभवतितदासएवजीवोमुक्तइत्युच्यते
एवंशुद्धसत्वप्रधानमायावच्छिन्नोनारायणःसूर्यःकालपर्यायैःसर्वेषुजीवेषुऔपनिषदगायत्र्युपासनमहिम्ना
सूर्यभावंगतेषुसत्सुसूर्यस्यजीवसमष्टित्वात्औपनिषदगायत्र्युपासनमहिम्नैवस्वोपाधिमायानिवृत्तौसत्यांअसं
डसच्चिदानंदाद्वयब्रह्मात्मकोभवतिसकलसंसारकारणाज्ञानाभावान्नसपुनरावर्ततइत्यनयाश्रुत्याभि १५०

हितमितिवदंतिसूर्यभ्रमणस्यानाधिनिधनत्वश्रुत्याजीवएवंसूर्यात्मकोभगवतीतितुनलंतस्मादविद्योपाधिके
नजीवेनस्वाविद्यानिवृत्तयेसूर्यएवोपास्यइतिसिद्धंअतस्तंप्रेक्ष्यलंचरणमनिशंस्वेपरिवृढंभ्रमंत्यक्त्वासर्वमहर्ति
सुविरतिंद्यमहसि॥११९॥इदानींस्वकृताद्युपहास्यतांनिराकुर्वन्स्वस्यश्वरपारतंत्र्यमेवद्योतयंश्चरंथकृन्निरंत
रमानंदमाशास्तेयथायतीतियथामतिमयाकृतंस्मरमीश्वरप्रीतयेक्षम ध्वमिहसंगतंयदितरच्चसद्गुरुत्यः॥तनोद्भुस
न्तांप्रभुःसुखपरंपराःसर्वदाभवतितज्जनोस्तियःसकलदृत्तिसाक्षीहृदि॥१२०॥मयाअविद्योपाधिनाजीवनय
थामतियावतीसूर्यानुग्रहाद्जरत्तमोभिभवस्तोद्रुजन्यानुद्भिस्फूर्तिस्तामनन्तिकम्यस्मरणंस्मर्यतेपुराणा
दिषुवेदांतासुचतुर्दशविद्यासुश्रुतोर्थोयेनतादृशंग्रंथरचनंकृतंस्वल्पज्ञत्वजन्यभयलज्जेविहायविदितंक
स्मैप्रयोजनायईश्वरप्रीतयेमायोपाधेःसर्वनियंतुःसूर्यस्यसंतोषाययथायत्कार्यंप्रतिराज्ञाप्रेरितोभृत्यस्तत्का

आ-वो
१५१ र्यकरोतितस्मिन्स्तेराजः प्रीतिलोके दृश्यतेतथाकलिमलनंमुक्तंज्ञानंभवतिवैदिकोद्धारायस्वस्तोषायचसूर्येण
प्रेरितोहंयंथस्वनंकृतवानस्मीतिभावः समस्तात्मसूर्यप्रेरणंतुनारायणंनमस्कृत्यनरंवैवनरोत्तमं॥देवीसरस्वती
वैवतनोजयमुदीरयेदित्यात्मकंतस्यार्थःनारायणंनराणांमनुष्याणांसमूहः समस्तस्त्रीलेपिमनुष्यमात्रगम्यत्वात्
अयनंस्थानंयस्यतंनारायणंसूर्यंनमस्कृत्यसर्वोत्कर्षेणोपास्यंमत्वानरोत्तमंनराःपंचजनाःब्राह्मणक्षत्रियवैश्य
शूद्रम्लेछाःतेषुसाक्षादाराधकत्वात्सर्वयाजनेनसर्वेष्टसाधकत्वात्सर्वपिदृष्टत्वादुत्कृष्टंनरंब्राह्मणंवैवन
मस्कृत्यैवउपास्यकत्वादुत्कृष्टंमत्वैवआदित्यमीक्षयेद्वसवित्तरेषतब्रह्मचारीतंगोपायसमास्तेत्याचार्यं इत्यूपन
यनकल्पसूत्रात्हेऋतसत्यसूर्यसःब्रह्मचारीरक्षकृत्तंमाब्रह्मचार्युपदेष्टारंब्रह्मचारिणंरक्षत्यर्थः अमृतति
पदच्छेदपक्षमामामित्यर्थः परलोकेतुनरोत्तमंसर्वसमत्वात्पुराणमसिइंसर्वदेवमान्यंनरंवैवबृहस्पतिंनम १५१

रामस्तत्सूर्योमनुष्यदेहधारणेपि उपास्यः

स्कृत्यैवतथासूर्यसमत्वाद्धुंनमस्कृत्यैवअध्यात्मेनुनारायणंनरोमनुष्यदेहः अयनंयस्यसः नारायणःस्वार्थत
स्तितःसएवनारायणःएतनसूर्योपासकोजीवःसूर्योभवतीत्यपिध्वनितंह्यापोनारइतिप्रोक्ताआपोवैनरसूनवः॥
अयनंतस्याताःस्तुतेनेनारायणःस्मृतइतिपुराणाद्वातंनारायणमात्मानंनमस्कृत्यदेहेंद्रियमनोधीचैतन्यसंपादनेन
सेव्यत्वेनचोत्कृष्टंमत्वापुराणार्थस्तुक्त्यभिप्रायेणआपोरेतोरूपाःनाराःनरसंबंधिन्यइतिप्रोक्ताःप्रकर्षेण
कथिताःप्रकर्षस्तुनरेतसांसूर्योपासनयोग्यशरीरहेतुत्वात्यतआपोरेतांसिवैप्रसिद्धंनरसूनवःमनुष्यशरीरा
दुत्पन्नानिताःरेतोरूपाआपःपूर्वंसूर्यप्राप्तेःप्राक्कालेतस्यात्मनःअयनंस्थानंभवतिएतनसूर्योपासनमात्मनिकुर्वि
तरेतःसंबंधियासावित्र्यागायत्र्यासरस्वत्याकर्तव्यमेवोत्तमानामितिध्वनितंतेनरेतसिस्थितत्वेननारायणःस्मृ
तःनतुसूर्यप्राप्त्यनंतरमनुस्मृतःसूर्यसायुज्यादितिनरोत्तमंदेहेंद्रियमनोधीपुपोषकत्वादुत्कृष्टंनरंवैवनरत्वापादकं

र्य

रसनेनमस्कृत्येवंरस्यस्निग्धस्थिरहृद्यान्नप्रीत्यसत्वगुणवर्द्धनात्यापनिवर्तनाद्दुःखक्लेशमलेवनतयाश्रोत्रं सकलार्थश्रव
णनसकलार्थसिद्धेरुत्कृष्टंमलेवदेवीपुरोगादाख्यायामितिद्रौधिधानात्देवःसूर्यःतत्रापिकांसावित्रींगायत्रींउपा
सनसाधनभूतांउपास्योपासकापेक्षयाधिकांचसरस्वतींचैवसरआप्यायनात्सर्वेषांगमनादादिरेवब्रह्मतत्प्रतिपादि
कांवाचंनमस्कृत्येवंअपुनरावृत्तिसाधकतमत्वादुत्कृष्टंमलेवततःसरस्वतीतःप्राप्तंजयंजयःआदित्यप्राप्तिरूपः
सोस्मिन्नस्तीतिअर्शआद्यच्जयःनंमहाभारतादिग्रंथमुद्दीरयेत्उच्चारयेत्यद्वासवितृपदप्रापिकायाःसावित्र्याःजय
प्राणकायाश्चतुर्विंशत्यक्षरायाःउपास्योपासकस्वरूपाद्वितीयब्रह्मप्रकाशिकायाःउपासनसाधनभूतायाः
सरस्वत्याःसकाशाज्जयंसूर्यपदप्राप्तिरूपंतद्द्वारासद्विद्यानंदब्रह्मात्मकंवोदीरयेत्विशेषान्प्रतिप्रतिपादये
येतन्नरश्चेवेत्यत्रेवकारस्योपासकांतरोत्कर्षव्यावृत्यर्थःसरस्वतींचैवेत्यत्रचैवकारःसाधकतमांतरोत्कर्षव्यावृत्य १५२

र्थःततःसाद्दश्यव्यावृत्तिरूपस्यैकस्यैवव्यावर्तकत्वात्वाचोव्यापकत्वादयावद्ब्रह्मविद्विहितंतावतीवागितिश्रुतेःउ
दीरणंवाग्व्यापिमंतरानुपपन्नमित्यापेक्षिकलाभात्सरस्वतींव्यासमितिपाठस्तुप्रामादिकएवव्यासेनरनारायणा स्य
योरंतर्भूतत्वात्नमस्कारेणैवनमस्कारसिद्धेःस्वयंयादौस्वनमस्कारकथनस्ययोग्यत्वाभावाच्चउक्तयुक्तेश्चअ
यमुद्दीरयेदितिलिङ्गात्सरजयोदीरणस्याप्राप्तस्यप्रापणादवश्यकर्तव्यत्वात्ब्राह्मणस्यतादृशजयोदी
रणमावश्यकमितिसिद्धंअतःकारणात्हंसदुह्यःसतीमत्सरानभिभूतायथार्थग्राहिणीबुद्धिःप्रज्ञायेषां
तेतादृशाःयूयंइहमत्कर्तृकेतादृशजयसाधकेयंथरचनेयद्वाक्यसंगतंयोग्यंनरक्षायोग्यंचतदुभयंक्ष
मध्वंभावबोधनेनसहध्वंकिंचहृदिअंतःकरणेअंतर्यामितयास्थितःअतएवप्रवर्तितजनःस्वस्वकार्येनि
पतितलोकःअतएवसकलहृत्साक्षीसंहृणीध्यवसायादिकारणव्यापारदृष्टायःसूर्यःअस्मिन्नेनलिं

नेनानुश्रूयतइत्यर्थः तथाचेदंसर्वमेरणयेवरुतंननुस्वतंत्रेणमयेतिभावः सः सर्वजनहृदयस्थः सतांश्रद्दधतांच
लविदांयुष्माकमस्माकंचप्रभुःपालकःसूर्यःसर्वदा निरंतरंसुखपरंपराःकल्याणपंक्तीस्तनोतुविस्तारयतु॥
॥१२०॥एवंषडुपदेशैर्नस्तमोयन्नाशितंत्वया॥आत्मसूर्यस्ततःसर्वमस्माकंकाममाप्रण॥ ६॥आत्माकीजयति
सहानिजप्रकाशाच्चद्वोधाद्भवतितमोमलस्यनाशः॥तद्धेतुःकृतिरियमेवमेस्तुजेत्रीव्याख्यानांशुकजनिभूरु
वेःकृतीनां॥७॥ ॥इतिश्रीसद्गोविंदांतसिद्धांतानुभवानंदानंदितकालोपनामकाहिताग्निविश्वनाथ
भट्टालजगोविंदभट्टकृतआत्माकबोधआत्माकैश्वर्यकथनंनामषष्ठउपदेशः॥ ॥श्रीकृष्णार्पणमस्तु॥
शकें१६७३प्रजापत्याश्विनेशुक्लद्वादश्यांमंदवासरे॥दक्षिणायनेशारदेनतद्दिनेपुस्तकंसंपूर्णं॥ ॥ ॥ १५३
धामणकरोपनाम्नावेरामभट्टनलेखनं॥काळेइत्युपनामाख्येगोविंदर्क्षितस्यपुस्तकं॥ ॥तैलाद्रक्षेज्जलाद्र

जीवन्नणोरैक्यंसत्यसिद्धांतः

क्षैरक्षेच्छिथिलबंधनात्॥मूर्खहस्तेनदातव्यंएवंवदतिपुस्तकं॥अग्नउदकटिंचीवासब्धदृढिरधोमुखं॥कष्टेनलि
खितंग्रंथंयत्नेनप्रतिपालयेत्॥

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

॥इतिआत्मार्कबोधःसमाप्तः॥